# अथस्यानुभवार्ह



श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥ श्रीपुंडलीकवरदविठ्ठलरुक्मिणीकां
१ तायनमः अथस्वानुभवानंदार्थप्रकाशिका॥ ॐनमऊंकारगम्यायनमऊंका
रस्वरूपिणे॥नमऊंकारवर्णीयकृष्णायपरमात्मने॥१॥ चिकीर्षितस्यनिर्विघ्नप ग्रंथस्य
रिसमाप्तिप्रचयगमनशिष्टाचारपरिपालनफलकंविशिष्टशिष्टाचारानुमित श्रु
तिबोधितकर्तव्यताकंस्वेष्टदेवतानमस्कारात्मकंमंगलमाचरन्प्रकरणप्रति
पाद्यमर्थंसंक्षेपेणदर्शयति॥ श्री॥यस्मात्परंकिमपिनास्तिनमोस्तुतस्मैसच्चि १
त्सुखायविभवेपुरुषोत्तमाय॥ नोयत्रवागपिमनोनविबोधनायकृष्णायपूर्ण
महसेयदुनंदनाय॥१॥तस्मैकृष्णायनमोस्त्विति संबंधः॥ शरणागतानामवि

द्याज्ञस्करवदुःखात्मकसंसारकर्षणात्॥ कृष्णस्तस्मैकायवाङ्मनोभिःप्रह्वीभावो
स्त्वित्यर्थः॥अतएवयदुनंदनेतिविशेषणं॥यद्वन्अक्रूरोद्धवप्रभृतीन्अर्जुना १
नादीनन्यांश्चस्वात्मप्रदानेननंदयत्यानंदयतीतियदुनंदनः॥एतेनस्वस्या
विनिरतिशयानंदप्राप्त्यर्थंश्रीकृष्णायप्रह्वीभावःकृतइतिसूचितं॥अन्यैर्वि
शेषणैस्तस्यवास्तवंस्वरूपंदर्शयति॥तस्मैकस्मैयस्मात्निखिलदृश्याका
रपरिणतमायाधिष्ठानात्॥सद्रूपेणस्फुरणरूपेणचसर्वानुस्यूतात्स्वप्रका
शपरमानंदचैतन्यघनात्परमार्थसत्यात्स्वप्रदृश्यस्वामिकंमायाविनृ
त्यमायिकंशुक्तिरूपकलाचयेनचैतन्यादितरज्ञानकल्पितरजतमिवचपरंवि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

२ तीयंकिमपिवस्तुपरमार्थसत्यंनास्तीत्यर्थः॥ एतेनविजातीयभेदरहितत्वंरशि
तं॥ स्वजातीयस्वगतभेदरहितत्वंविशेषणांतरेणदर्शयति॥ पूर्णमद्वइति॥
पूर्णमखंडंयथोक्तभेदरहितंचतन्महश्चतत्स्वरूपायेत्यर्थः॥ पुनस्तत्स्वरू
माह॥ सच्चिदानंदायेत्यर्थः॥ सदेवसोम्येदमग्र आसीत्वि
ज्ञानमानंदंब्रह्मेति श्रुतेः॥ आनंदादयःप्रधानस्येतिन्यायाच्च॥ विभवेव्याप २
कायब्रह्मैवेदंविश्वंपुरस्ाद्ब्रह्मैवपश्चात्ब्रह्मदक्षिणतश्चोत्तरेण॥ अधश्चोर्ध्वंचप्र अ
सृतंब्रह्मैवेदंविश्वमिदंवरिष्ठमितिश्रुतेः॥ अंतर्बहिश्चतत्सर्वंव्याप्यनारायणःस्थि
तइत्यादिश्रुतेश्चव्यापकत्वंब्रह्मणः॥ तथाचदेशपरिच्छेदरहितं

ब्रह्मेत्यर्थः॥ इदमुपलक्षणंकालवस्तुपरिछेदयोः॥ सत्यंज्ञानमनंतमितिश्रुतेः॥
पुरुषोत्तमायक्षराक्षरकार्यकारणविलक्षणायेत्यर्थः॥ कार्यकारणतांहित्वापूर्ण
बोधोवशिष्यतइतिश्रुतेः॥ यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः॥ अतोस्मिलो
केवेदेचप्रथितःपुरुषोत्तमइतिस्मृतेः तथायंत्रब्रह्मणिविषयेवाङ्मनोपिवि
बोधनायज्ञापनायनसमर्थमितिशेषः॥ यतोवाचोनिवर्त्तंतेअप्राप्यमनसासह
तिश्रुतेः वाङ्मनोभ्यामगोचरमित्यर्थः॥ ननुयतोवाचोनिवर्त्तंतइतिनतावल्लौकि
कंवाक्यंतंस्यात्राप्रसक्तेः॥ तथाचवैदिकंवचोब्रह्मणोविनिवृत्तंसत्यंचैवस्या
दितिचेन्नैवं॥ यथाअशब्दमस्पर्शमित्यादिवाक्ययथावास्थूलमनण्वित्यादि

वाक्यं शब्दत्वस्फोटत्वादिनिषेधेनब्रह्मणि पर्यवसन्नंतथेदमपिवाक्यं . .वा
च्यत्वनिषेधेनब्रह्मणिपर्यवसन्नमतोनवृथा॥निषेध्यवचनत्वेननिषेधवचन
नत्वेनापिनब्रह्मवाच्यंकिंतुतैर्लक्ष्यते॥ यथाविषंभुंक्ष्वेत्यत्रपदार्थसंगतेस्तात्पर्यं
णशक्तुग्रहभोजननिवृतिर्लक्ष्यतेतथावाक्यात्रेणापिब्रह्मलक्ष्यतेनतूच्यते जात्या
दिचतुर्विधशब्दप्रवृत्तिनिमित्ताभावात्॥ ऋलंतरमपियद्वाचानभ्युदितंयेन
वागभ्युद्यते॥ तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासतेयन्मनसानमनुतेयेनाहु
र्मनोमतमिति"तथाचब्रह्मवाचानवाच्यंनमनसामंतव्यमिति॥अभियुक्तैर
प्युक्तं"योयःशब्दोयस्मिंस्तेर्थेनिरूढस्तास्मिन्नर्थेलक्षणावृतिरस्य"ज्ञात ३

व्यास्यातंडिनैरेवमेतत् प्रत्यक्पूर्णब्रह्मवेदांत्तवेद्यमिति॥ ननुमनसैवेदमाप्त .
व्यमित्यवधारणस्यकागतिरितिचेत्शृणु"ब्रह्मण्यज्ञाननाशायवृत्तिव्याप्तिपरमवधार
णमिति॥ ननुमंगलस्यग्रंथपरिसमाप्तिःफलमित्युक्तंतन्न॥ तथाहि॥ कृतेपिमंगलेआस्तिक
ग्रंथादौसमाप्त्यदर्शनात्॥अकृतेपिमंगलेनास्तिकग्रंथेसमाप्तिदर्शनात्॥ तस्मादन्वयव्यतिरे
काभ्यांसमाप्तेर्व्यभिचारात्कृतस्यकर्मणः किंचित्फलमवश्यंवाच्यं तच्चविघ्नध्वंसरूपमेवा
स्तितिचेन्नैवं॥ कृतेपिमंगलेयत्रसमाप्त्यभावस्तत्रविघ्नबाहुल्यंबलवत्तरंविघ्नोवाबोध्यः॥ त र
न्निवृत्तिस्तुमंगलमाचर्यादृष्टद्वारमंगलाचरणाद्भवेत्॥ अकृतेपिमंगलेसमाप्तेर्जन्मां
तरीयंमंगलंतच्चकल्पेनसंसारस्यानादित्वात्॥ तस्मान्नान्वयव्यतिरेकव्यभिचारः॥ मंग
लस्यशिष्टाचारानुमितश्रुतिबोधितत्वादस्तित्तस्मिन्विघ्नविनाशिनीमाप्तानुकूलाचे

ति श्रोक्ति द्वयमिति॥ तथाचविद्ध्वंसएव फलंनेति॥ यथाविविदिषंतियज्ञेनेत्यत्रचित्तशुद्धि
विविदिषोत्पत्तिरूपद्वयजननसामर्थ्यमाश्रमकर्मणां तथात्राप्यस्तुबाधकाभावात्॥ ए
वमप्रतिपत्त्यन्यथाप्रतिपत्तिविप्रतिपत्त्यादिनिवृत्तिरूपाणिशिष्टाचारपरिपालनंचेत्यादि
मंगलाचरणस्यफलानिज्ञेयानि॥ नचकृष्णोनामधर्मराजवत्कश्चनमहापुरुषोभूच्चर
त्वात्॥ अथवाइंद्रानुजत्वादाजानदेवोस्तुकश्चिद्देवलोकस्थत्वात्तस्यकथंपरब्रह्मतो
च्यतइतिवाच्यं॥ महर्षिभिःश्रुतिस्मृतिपर्यालोचनयाब्रह्मत्वस्यनिरूक्तत्वात्॥ तथा
चवचनं॥ कृषिर्भूवाचकःशब्दोणश्चनिर्वृतिवाचकः॥ तयोरैक्यंपरंब्रह्मकृष्णइत्यभि
धीयतइति॥ वस्तुतस्तु॥ नदेवःपुंडरीकाक्षोनचदेवास्त्रिलोचनः॥ अकृत्रिमंमनाद्यंतं दै
वतंपरमुच्यतइतिस्मरणात्"अकृत्रिमंकृष्णदैवतंकृष्णशब्दलक्ष्यंब्रह्मेवेति॥१॥

---

अथद्विविधोह्यधिकारीकश्चनानेकजन्मसुकृतविपाकात्तीव्रतरप्रज्ञोऽन्योमंदप्रज्ञोमा
दृशस्तुमंदप्रज्ञस्तथाहेत्वभावात्॥ तत्रतीव्रप्रज्ञस्यश्लोकेनश्लोकार्द्धेनब्रह्मसाक्षात्कारो
भवति॥ तथाचोक्तं॥ आत्मानंविंदतेयस्तुसर्वभूतगुहाशयं॥श्लोकेनवातदर्द्धेनक्षीणंत
स्यप्रयोजनमिति॥ मंदप्रज्ञस्यतुअसंभावनाविपरीतभावनयोरुदयान्नझटितिब्रह्म
साक्षात्कारोभवति॥ तादृशंगुरुशास्त्रविचारोऽवश्यमपेक्षतइतिमनसिनिधा
याह"मु०" अतिदूरतरंनिजंस्वरूपंगुरुशास्त्रान्नविचार्यतेयदि॥ निकटंगुरुशास्त्र
बोध्यनात्मकटंस्यात्स्वतएवस्वयंहितत्॥२॥ निकटंस्वहृदयांतर्वर्तिनिजंस्वरूपंस्वस्य
ब्रह्मरूपत्वंयदिगुरुशास्त्रान्नविचार्यतेतर्ह्यतिदूरतरंअतिदूरादप्यतिदूरतरं॥ दूरा

स्कदूरेनदिहांतिकेचेतिश्रुतेः दूरस्थंचांतिकेचेतदितिस्मृतेश्च॥व्यतिरेकमुक्त्वान्वयमाह॥ गुरुशास्त्रबोधनात्प्रतिबंधकाऽविद्यावृतेः स्वतनौऽस्मिन्नेवदेहेस्वयंप्रकटमाविर्भवेत्स्वप्रकाशात्मेत्यर्थः॥ ऐहिकमप्यप्रस्तुतप्रतिबंधेतद्दृष्टेरितिन्यायात्॥२॥ उक्तमर्थंदृष्टांतेनदृढयति॥ नहिनिर्मथनंविनेंधनाग्निः परिलभ्योनिकटोपिसन्नपि॥ गुरुशास्त्रविचारणंविनानहिलभ्यंनिजरूपमात्मनः॥३॥ आत्मनःप्रतीचोनिजरूपं ब्रह्मत्वंतदित्यर्थः दृष्टांतेनायमर्थःश्रुत्यासूचितः॥ अथाधिविद्यं॥ आचार्यःपूर्वरूपं॥ अंतेवास्युत्तररूपं॥ विद्यासंधिः॥ प्रवचनꣳसंधानमिति॥ शेषंस्पष्टं॥३॥ ननुविचारस्य किंप्रयोजनंचक्षुरादिनातत्प्राप्तिःस्यादित्यतआह॥श्लो०॥ स्कमेरूपेष्टेसरितांतटेवाकिं



मूर्तिमद्ब्रह्मविलोकनीयं॥त्रिधापरिछेदविहीनमेकंविनाविचारंस्कलभंनतत्स्यात्॥१॥ यदिमूर्तिमद्ब्रह्मस्यात्तर्हिमहताप्रयत्नेनमेरूपेष्टंब्रह्मचक्षुरादिनाविलोकनीयंस्यात्तत्तथैवसरितांगंगागोमत्यादिनातटस्थंविलोकनीयंस्यान्नचैवंतथा॥ दिव्योह्यमूर्त्तःपुरुषइतिश्रुतेः॥ किमित्याक्षेपे॥ त्रिविधपरिछेदशून्यं॥ एकंसजातीयविजातीयस्वगतभेदरहितं॥ विचारंविनानस्कलभंस्करवेनलब्धुंनशक्यमित्यर्थः॥ अतोवश्यंविचारःकर्तव्यइतिभावः॥२॥ यद्यप्यस्यवेदांतप्रकरणत्वात्॥ तदीयमेवानुबंधचतुष्टयंतथापिमंदप्रज्ञस्याप्यधिकारिणोयथोक्ताधिकारंविनाविचारोपिस्कदूरएवकिमुनिजस्वरूपंदूरमितितदर्थंयथोक्ताधिकारिणंदर्शयति॥ श्लोक॥ नदोषदृष्टिर्नविरागलेशोदुःखात्मकैकर्मणितत

फलेच॥ मुमुक्षुतानापि शमादिषट्कं तेषांविचारोपिसुदूरएव॥५॥ रजःकार्यत्वात् दुःखा
त्मकत्वंकर्मणः॥ दुःखानुविद्धत्वान्तत्फलेच॥ यथास्वर्गकामोयजेतेत्यत्रस्वर्गकामोधिकारी
॥तस्यअर्थेसमर्थोविद्वान्अपर्युदस्तोअधिकारिविशेषणानि तथात्रमुमुक्षुरधिकारी॥
नित्यानित्यवस्तुविवेकइहामुत्रार्थफलभोगविरागः शमादिषट्कसंपत्तिरितिअधिकारि
विशेषणानिज्ञेयानि एतादृशीशेषणविशिष्टस्यमंदप्रज्ञस्यापिमुमुक्षुतायांसत्यांविचा
रेप्रवृत्तिरन्यथादूरेसर्थः॥ विषयोवब्रह्मैक्यंशुद्धचैतन्यंप्रमेयं॥ तत्रैववेदांतानांतात्पर्यात्
॥संबंधस्तुतदैक्यप्रमेयस्यतत्प्रतिपादकोपनिषत्प्रमाणस्यचबोध्यबोधकभावलक्षणः ६
॥प्रयोजनंतुतदैक्यप्रमेयगताज्ञाननिवृत्तिस्तत्स्वरूपानंदावाप्तिश्च॥ तरतिशोकमात्म
जी

वित्ब्रह्मवेदब्रह्मैवभवतीत्यादिश्रुतेरिति॥५॥ विषयसौंदर्यादिचारंपरिकुर्वतामपित
त्प्राप्तिरनेकजन्मार्जितपुण्यसंचयंविनादुःप्रापेत्याह॥श्लोक॥स्यश्रोत्रंसंपतितंप्रपश्य
तांप्राप्तिस्तुतस्यास्तिनरस्यकस्यचित्॥ तथाविचारंपरिकुर्वतांनृणांप्राप्तिःस्वरूपस्य
वृषेणकस्यचित्॥६॥वृषेणधर्मेणेत्यर्थः॥ उक्तंचभगवता॥श्लोक॥मनुष्याणांसहस्रेषु
कश्चिद्यततिसिद्धये॥यततामपिसिद्धानांकश्चिन्मांवेत्तितत्वतइति॥६॥ वृषेणस्वरूप
प्राप्तिरित्युक्तंतत्रासाधारणंधर्मंदर्शयति॥श्लोक॥हरेर्गुरोर्भक्तिरिहैवयत्साधनंयः
प्रकरोतिनित्यं॥ ऐक्येनतस्यैवकरस्थितास्तिमुक्तिः प्रसादेनहरेर्गुरोश्च॥७॥नित्यंनियमे
नाव्यभिचारेणेत्यर्थः ऐक्येनसत्गुरुदैवतयोरैक्यभावनयेत्यर्थः॥ एवंभजतामुभ

स्वनु•

योः प्रसादेनमुक्तिः सकलेप्सितार्थः॥ तथाचश्रुतिः॥ यस्यदेवेपराभक्तिर्यथादेवेतथागुरौ॥
तस्यैतेकथिताह्यर्थाः प्रकाशंतेमहात्मनइति॥ भक्त्यामामभिजानातियावान्यश्चास्मि
तत्वतः॥ ततोमांतत्वतोज्ञात्वाविशतेतदनंतरं॥ १॥ तेषांसततयुक्तानांभजतांप्री
तिपूर्वकं॥ ददामिबुद्धियोगंतंयेनमामुपयांतितं इत्यादिस्मृतिभ्यः॥ सकलेकयेशंगु
रुदेवतात्मेतिश्रीभागवतोक्तेश्च॥ ७॥ नादैवेविन्मनुतेतंबृहंतमितिवेदेनैवोक्तंतत्र
सवेदोऽपौरुषेयःस्वतः प्रमाणंचेतिदर्शयति॥श्लोक॥ सर्वज्ञनारायणनिर्मितत्वाद
पौरुषेयः सकलोपिवेदः॥ स्वतः प्रमाणंनिपैरपेक्षितत्वान्मानांतरस्येतिसुनिश्चितो
र्थः॥ ८॥ यःसर्वज्ञः सर्वविदितिश्रुतेर्भगवतः सर्वज्ञत्वंतथातस्मादयत्नात्सर्वहुत



ऋचः सामानिजज्ञिरेइतिश्रुतेर्यस्यनिःश्वसितंवेदाइतिस्मृतेर्निश्वसितन्यायेननारा
णनिर्मितंवेदस्य॥ अतएवापौरुषेयत्वंचनुर्मखपुरुषाद्यनिर्मितत्वमित्यर्थः॥ चतु
र्मुखोपिनारायणादेववेदंप्राप्तवानित्याहश्रुतिः॥ योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्च
प्रहिणोतितस्मै॥ तंहदेवमात्मबुद्धिप्रकाशंमुमुक्षुर्वैशरणमहंप्रपद्यइति॥ वेदय
तिअधिकरिणः कर्मब्रह्मणीतिवेदः॥ सस्वतः प्रमाणं॥ तत्रस्वप्रकाशनीयार्थेप्रमाणं
तरानपेक्षितत्वं॥ यथाग्निर्भेजाहरीतकींभक्षयेदित्यत्रकिमत्रप्रमाणमित्याकांक्षाया
मायुर्वेदवचनप्रदर्शनेनश्रोतापमाणांतरनिरपेक्षएवहरीतकींभक्षयतितताश्चरोगनि
वृत्तिर्भवतीतिसुनिश्चितोर्थः स्यानुभवसिद्धइत्यर्थः॥ स्वर्गकामोयजेतेतिवाक्यश्रवणा

स्वनु०

नंतरंस्वर्गाधी प्रमाणांत्तरनिरपेक्षतयैवयागेप्रवर्तनइत्यनुभवसिद्धंच ॥ ८ ॥ ननुस्वतः
प्रमाणाद्वेदादेवफलसिद्धौभवत्यांकिंविचारस्यप्रयोजनमित्यत आह ॥ पु०स्वतः प्रमा
णत्वमिदंश्रुतीनांविचारसापेक्षतयाप्रणश्येत् ॥ अतोविचारस्यफलंप्रकल्प्यंसंदे
हविभ्रांतिविनाशमात्रं ॥ ९ ॥ यद्यपिविचारनिरपेक्षतयैवस्वतः प्रमाणवेदाद्बह्मात्म
बुद्धिः फलंतथापिप्रतिबंधकेसतितनोनफलसिद्धिरतः प्रतिबंधकनिवृत्यर्थंविरो ध
३पेक्षितः तथाचनवेदस्यस्वतः प्रामाण्यभंगइत्यर्थः ॥ विचारोनामतर्कोमनना
त्मकः तेनप्रमेयगतोसंहत्वधाश्रुतेपिदेहेंद्रियव्यतिरिक्तआत्मानसंभाव्यतेइतीयम
संभावनानिवृत्तौसत्यां ॥ ततोनिदिध्यासनेनप्रमेयगताविपरीतभावनानिवर्तते ऽ

असंभावनानिवर्तनेऽप्यथा

तोविचारस्यमुख्यंफलंप्रमेयगतासंभावनानिवृतिः परंपरयाप्रमेयगताविपरित
भावनानिवृतिरप्यतउक्तंसंदेहविभ्रांतिविनाशमात्रमिति ॥ १ ॥ पूर्वोक्तमेवविवृणो
ति ॥ श्लोक ॥ उत्पत्तिमात्रेसकलंविचारमपेक्षतेचोपनिषद्वाक्यमतिः ॥ स्योत्पत्तितोमु
लतमोनिहंतिद्दीपोयथान्यंसहकारिणंविना ॥ १० ॥ उपनिषद्वाक्यमतिरंहंब्रह्मास्मी
प्र त्यपरोक्षप्रमास्योत्पत्तिमात्रेणैवबंधकनिवर्त्तकंविचारंचकांक्षतिनिदिध्यासनमप्यपेक्ष
ते ॥ स्योत्पत्तितोमुलतमोमुलाज्ञानंब्रह्मावरकंनिहंति ॥ अत्रदृष्टांतः ॥ यथापैदीपः स्यो
त्पत्तिमात्रेनिर्वर्तनायापेक्षतेनतत्प्रयोत्पन्नः ॥ सहकारिणंविनैवतमोंधकारंनिहं

स्वानु०

ति तद्दित्यर्थः॥ निहंतीत्यत्रोपसर्गेण विरम्य व्यापारो नास्ती ति बोधितं॥ आदौवि
द्योत्पद्यतेपश्चाद्ज्ञानंनिवर्त्तत एवंनास्तीतितत्तस्मात्याविद्योत्पत्तिः सेवाज्ञानेनिव न
तिरितिस्वसाक्षिकमिति भावः॥१०॥ एवंतावन्मननात्मकेनविचारेण प्रमेयग
तासंभावनाप्रतिबंधकीभूतानिवर्त्तनइत्युक्तं संप्रतिवादिविप्रतिपत्तिर्जीवपदार्थे
विषयिणीमसंभावनांनिवर्तयन्पदार्थद्वयगतामसंभावनांदर्शयति॥श्लोक॥
पदार्थद्वयंदृक्कदृश्यंततोन्यत्पदार्थोतरंनास्तिवेदांतन्यायशास्त्रेदृशः किंस्वरूपं
च दृश्यस्यकिंवेत्यत्रद्वयंसंविचार्यंमुमुक्षोः॥१३॥ येनसर्वंविजानातीतिश्रुतेर्दृक्
दृश्यानिरिक्तंपदार्थोतरंनास्ति॥ अन्यवादिकल्पितानांतत्तत्पदार्थानामनयोरंते

भावोबोद्धव्यः॥ तथाहिवैशेषिकसप्तपदार्थानांषोडशपदार्थेष्वंतर्भावः॥ तेषांचवे
दांतिकल्पितदृश्यपदार्थेऽंतर्भावः॥ मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृ
तयः सप्त॥ षोडशकस्त्वविकारोन प्रकृतिर्नविकृतिः पुरुषइतिपंचविंशत्पदार्थ
मध्येमूलप्रकृत्यादिचैर्विंशतिपदार्थानांदृश्येंतर्भावः सच्चिद्रूपः पुरुषः प्रत्यगात्मन्यं
तर्भूतः इतिपदार्थद्वयएवान्यैःकल्पितानामंतर्भावोज्ञेयइति॥ तत्रदृशः किंस्वरू
पंसादृक्किंसद्रूपासच्चिद्रूपावासच्चिदानंदरूपावापुनश्चसाजीवान्भिन्नाअभिन्ना
वासगुणानिर्गुणावेत्याद्यनेकसंशयनिरासपूर्वकंमुमुक्षुणास्वरूपंविचार्यमित्यर्थः॥
तथादृश्यस्यकिंस्वरूपंसत्यमसत्यंवेतिसंशयनिरासोपिमुमुक्षोरपेक्षितएवेत्य

र्थः॥११॥ उक्तविपरीतबाधपूर्वकं विचारकर्त्तव्यतामाह॥ श्लोक॥ यः संशयात्मा स विनश्यतीति श्रीकृष्णवाक्यान्निजसंशयादेः॥ नाशायधीस्वास्थ्यफलायचैषस्वयं हिसम्यक्क्रियतेविचारः॥१२॥ संशयात्माविनश्यतिसर्वपुरुषार्थभ्रष्टोभवतीश्रीकृष्णवचनादपुरुषार्थत्वनिरासार्थंविचारेणनिश्चयात्मकज्ञानेसतिसंशयनाशात्धीस्वास्थ्यंफलमहंब्रह्मास्मीतिफलंभवतीत्यर्थः॥ आत्मावाअरेद्रष्टव्यः श्रोतव्योमन्तव्योनिदिध्यासितव्यइतिश्रुतावात्मदर्शनमनूद्यतत्साधनत्वेनश्रवणादित्रयमुपदिष्टंतत्रश्रवणस्यगुर्वधीनत्वात्तत्परायत्तत्वंमननंनिदिध्यासनेनुस्वायत्तेभवतः अतउक्तं स्वयंहीतिसम्यक्श्रुत्यविरोधितयेत्यर्थः॥ श्रुतिमतस्तर्कोनुसंधीयतामित्या

दस्यक्रियापरत्वंवोपनिषदंपुरुषंपृच्छामोतिश्रुतिर्बाधःप्राप्नोतितन्निरासार्थंतस्यक्रियापरत्वंदूषयति ॥श्लोक॥आम्नायस्यत्रसकृत्क्रियापरंजैमिनिरूचेत्रातः ॥ननुमंत्रवारुनिषेधवाक्येक्रियापरत्वंनहितदुच्यते ॥१४॥आम्नायस्यक्रियार्थत्वादानर्थक्यमतदर्थानांतदूतानांक्रियायोगेनसमन्वयइतिसूत्रेणाम्नायस्यक्रियापरत्वंसूचितंतन्मतंनचारुयुक्तंनकुतस्तन्मतेनिधिमंत्रनामधेयनिषेधार्थवादेः ॥यंत्रासंकाःवेदइतितस्यक्रियानिष्ठत्वेनिषेधवाक्येक्रियापरत्वंनघटते ॥तयोःस्तुतिगानिवत्परस्परविरोधात्तथाचसर्वस्यवेदस्यक्रियापरत्वंनयुक्तमित्यर्थः ॥१४॥आम्नायस्यक्रियापरत्वेदूषणांतरमप्याह ॥श्लोक॥आसन्नरूपाहिनिमुक्तिरुक्ताविद्यानिरस्यात्मकपरीक्षितायां ॥ज्ञानेनरुभ्यानचकर्मसाध्याज्ञानंनरुभ्यंक्रिययाकदापि ॥१५॥सत्यसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्प



द्यतेसउत्तमःपूरुषइतिश्रुत्याःस्वरूपामुक्तिरुक्तासाचविस्मृतकंठत्वामीकरन्यायेनात्मानन्यवहितत्वात्वेदांतविज्ञानेनविद्यानिरस्यपरीक्षितायांनकर्मसाध्यानक्रियासाध्यासिद्धत्वात्नानोदस्यक्रियापरत्वमित्यर्थः ॥ननुमास्तुमुक्तिःक्रियासाध्याज्ञानंतुक्रियासाध्यंस्यादतआह ॥ज्ञानमिति ॥ज्ञानमपिकर्तुमकर्तुमन्यथाकर्तुमशक्यत्वान्नक्रियासाध्यंतस्यप्रमाणप्रमेयाधीनत्वादित्यर्थः ॥१५॥सर्ववेदस्यक्रियापरत्वेवेदांतविज्ञानसुनिश्चितार्थइतिश्रुतिर्निरोधंदर्शयति ॥श्लोक॥नवेदांतविज्ञानसुनिश्चितार्थाइतिश्रुतिर्नक्रियार्थभानात् ॥ब्रह्मैवनश्लोकसमवाप्नुवंतिक्रियापरत्वंनततोस्तिनेदं ॥१६॥वेदानांत्रयाणामंताःशिरोभागाःप्रस्थानत्रयंस्युस्तेषांविज्ञानंपरार्थसाधनपूर्वकंजीवब्रह्मैक्यरूपंतदर्थनिश्चयस्तेनसुषुप्तेरुदितंयथास्यात्तथानिश्चितोऽहंब्रह्मास्मीतिरूपोर्थःपरमार्थोयेषांते ॥सोक्यतेत्रकाश्यतेज

उजातंयेनेतिलोकस्तस्यान्यत्रकाशकत्वासंभवात्स्वप्रकाशत्वित्यर्थः॥ शेषंस्पष्टं॥१६॥
वेदव्यासस्तुवेदांताचार्योवेदस्यकांडत्रयात्मकत्वंदर्शयन्तस्यविनियोगंदर्शयतीत्याह॥श्लोक॥चेतःशुद्धौचेतसःस्थैर्यकार्यैज्ञानोत्पत्तौचाहकांडत्रयंयत्॥आम्नायस्यानुक्रमाद्वेदवेत्तावेदव्यासस्त्येकवाक्यत्वसिद्धये॥१७॥एवंविनियोगेश्रुतयःप्रमाणं॥
तत्रतमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसानाशकेनेतिश्रुतिः
कर्मकांडस्यचित्तशुद्धिद्वारात्रविविदिषायांविनियोगमाह॥एषसर्वेषुभूतेषुगूढोत्मानप्र १२
काशते॥दृश्यतेत्वग्र्यया बुध्यासूक्ष्मयासूक्ष्मदर्शिभिरितिश्रुतिरुपासनाकांडस्यचेतः
स्थैर्यंविनियोगंदर्शयति॥ ज्ञानकांडस्यवाक्यानिमाहावाक्यानि[illegible]दर्शयन्ना

---

नोत्पत्तौविनियोगंदर्शयंतीतियथायथमूह्यं॥१७॥एवंचवेदस्यस्वतःप्रामाण्यंप्रसाध्यतत्रचसाक्षात्परंपरयाचब्रह्मपरत्वंप्रदर्श्यतद्बलेनदृश्यःकिंस्वरूपमेवमादिविचारआरभ्यते॥श्लोक॥असंगस्यबंधोनसंभावनीयोनमोक्षोपिमोक्षस्यतत्पूर्वकत्वात्॥
अविद्याहिबंधोनिवृत्तिश्चतस्याःसमोक्षोनसर्वैस्तदर्थःप्रयत्नः॥१८॥असंगोह्यं
यंपुरुषइतिश्रुतेरनुभूत्याचासंगस्यादौबंधएवनसंभवति॥मोक्षोपिनसंभवतिकुतः॥मोक्षस्यतत्पूर्वकत्वाद्बंधपूर्वकत्वात्तद्बंधाभावेमोक्षोप्यसंगस्यनसंभवतीत्यर्थः॥अतएवश्रुतिः॥ननिरोधोनचोत्पतिर्नबद्धोनचसाधकः॥नमुमुक्षुर्नवैमुक्तइत्येषापरमार्थतेति॥तर्हिकोबंधःकोवामोक्षइत्याकांक्षायामाह॥अविद्यास्वस्वरूपाप

ज्ञानंहिनिश्चयेनबंधः॥ तस्याःनिवर्तिर्नोशोमोक्षस्तदर्थोमहापुरुषार्थत्वात्तत्साधनंसर्वो
पिप्रयत्नः॥ अक्षिभ्युक्तेरप्युक्तं॥ स्वात्मा ऽज्ञानंकारणंबंधनस्यस्वात्मज्ञानात्तन्निवृत्तिर्मो
क्षइति॥ १८॥ अविद्यारूपस्यबंधस्यानादित्वात्तन्नोपायश्चितैवनास्ति॥ अविद्यानिवृत्ति
रूपमोक्षस्यसाध्यो ऽतस्तन्नोपायंदर्शयति॥ श्लोक॥ अविद्यानिवृत्तिःप्रमाणेनसा
ध्यंप्रमाणंचवेदांतवाक्यानिनान्यत्॥ अविद्यानिवृत्तेःस्वयंज्योतिरात्मास्वतःसिद्धआवि
र्भवेत्साधकानां॥ १७॥ अनाद्यविद्यायाःनिवर्तिर्नाशःप्रमाणेनप्रमाणजन्यज्ञानेनेत्य
र्थः॥ तदुक्तं॥ अविद्यायाअविद्यात्वंइदमेवहिलक्षणं॥ मानयोगासहिष्णुत्वमन्यथाव
स्कसामवेदिति॥ किंतत्प्रमाणंयेनाविद्यानिवृत्तिस्तत्राह॥ प्रमाणंचवेदांतवाक्यानिप्र



ज्ञानंब्रह्मतत्त्वमसीत्यादीनितत्त्ववेदकानि॥ लिंगसंख्याविभेदेपिविशेषणविशेष्यता
॥ विभक्तिःपुनरेकैवविशेषणविशेष्ययोरितिवचनात्॥ प्रमाणंवेदइतिनपुंसकत्वसंख्या
भेदेपिविशेषणविशेष्यतोक्ता॥ नान्यदिति॥ अन्यानिप्रमाणानिव्यावहारिकाणिप्रत्यक्षा
दीन्यविद्यानिवृत्तेर्नसमर्थानितेषांपराक्षविषयत्वेनतत्त्ववेदकत्वाभावादित्यर्थः॥ तदु
क्तं॥ सर्वेपराक्षविषयमेवहिप्रमानजातंवेदावसानवचनानिचवर्जयित्वेति॥ किंचजडार्थ
विषयमानंस्वप्रमेयस्यकर्मत्वेनबोधकं॥ महावाक्यंतुस्वप्रमेयस्यविद्यैवकर्मत्वमव
बोधयितुंसमर्थमतोवेदांतवाक्यान्येवाविद्यानिवर्तीप्रमाणंनान्यदित्यर्थः॥ तथाचश्रु
तिः॥ पराञ्चिखानिव्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यतिनांतरात्मन्निति॥ पराक्पश्य

ख्यानु

१४ मभूतान्यनात्मभूतान् शब्दादीनुपदृश्यंति उपलभंतेउपेक्ष्यानंतरात्मानमिति श्रुत्यर्थः॥ एतेनवेदांताअद्वितीयेब्रह्मणिप्रमाणंनवेतिप्रमाणगतासंभावनानिवृत्तिरपिबोद्धव्या॥ तथाचप्रमाणजन्यज्ञाननिवृत्तौमेघापायेंशुमानिवस्वयंज्योतिः स्वप्रकाशआत्मासाधकानामधिकारिणोविभ्रंवेत्॥ स्वतःसिद्धइत्यनेनस्वर्गादिवन्नात्मस्वरूपामुक्तिर्जन्येतिदर्शितं॥ स्वविमुक्तश्चविमुच्यतइतिश्रुतेः॥१८॥ सर्वप्रक्रियाग्रंथेषुअंतःकरणवृत्त्यवच्छिन्नंचैतन्यंप्रमाणमित्युक्तंमंत्रस्तुवेदांतवाक्यानीत्युक्तं॥ तथाचप्रमाणविषयेविरोधआशासतेतदर्थेमुख्योपचारिकभेदात्प्रमाणंद्विविधंमुख्यमोपचारिकंचप्रमाणमितिविविच्यदर्शयति॥ श्लोक॥

धीवृत्यवच्छिन्नचितिःप्रमाणंतत्साक्षनत्वादितरत्प्रमाणं॥ तत्रोपचारात्खलुमानशब्दोमुख्यंप्रमाणंतुयथोक्तमेव॥ २०॥अत्रेयंप्रक्रिया॥ एकमेवचैतन्यमुपाधिभेदात्त्रिसप्तविधं॥ शुद्धचैतन्यमीश्वरचैतन्यंजीवचैतन्यंप्रमातृचैतन्यंप्रमाणचैतन्यंविषयचैतन्यंफलचैतन्यंचेति॥ तत्रसर्वोपाधिविनिर्मुक्तंशुद्धचैतन्यंमायोपहितचैतन्यमीश्वरचैतन्यं॥ अविद्योपहितचैतन्यंजीवचैतन्यं॥ जीवेशावाभासेनकरोतिमायाचाविद्याचस्वयमेवभवतीतितापनीयश्रुतेः॥ अंतःकरणावच्छिन्नंचैतन्यंप्रमातृचैतन्यं॥ अंतःकरणवृत्त्यवच्छिन्नंचैतन्यंप्रमाणचैतन्यं॥ विषयावच्छिन्नंचैतन्यंविषयचैतन्यं॥ अंतःकरणवृत्त्यवच्छिन्नंचैतन्यंविषयचैतन्याभिन्नंसत्फ

१५ तच्चैतन्यमित्युच्यते॥ तत्रवृत्तिविषययोर्युगपदेकदेशावस्थानेनतदुपहितयोश्चैतन्ययोरभेदोभवति॥ तथाहि॥यथातडागोदकंछिद्रान्निर्गत्यकुल्याद्वारेणकेदारंप्रविश्यचतुष्कोणाद्याकारेणपरिणमते॥ तथेंद्रियविषयसंयोगानंतरंअंतःकरणंचक्षुरादिद्वारा विषयदेशंगत्वातेनविषयेणसंयुज्यतेपश्चात्तत्तदाकारेणपरिणमतेसोयंपरिणामोवृत्तिस्तस्यांचतौविषयचैतन्यंप्रतिफलतितदावृत्तिविषययोर्युगपदेकदेशावस्थत्वेनतदुपहितचैतन्यभेदस्याप्रयोजकत्वात्प्रमाणचैतन्यंविषयचैतन्यास्मिन्नंभवतिसेयंप्रत्यक्षाप्रमा॥ तत्रवृत्याविषयोनास्तीयसत्वापादकमावरणंनिवर्ततेचैतन्येनतुविषयोनभातीत्यभानापादकमावरणंनिवर्ततेप्रमयाच १५
सावरणप्रज्ञानंमौढ्यापादकंनिवर्ततेततोविषयःस्फुरतिसाक्षिणा॥अंतःकरणोपहितंचैतन्यंसास्तीतिप्रक्रियाव्यवहारःनचेयंप्रक्रियास्वकपोलकल्पितेतिवाच्यं॥ श्रुतैक्यत्वात्॥ तथाचश्रुतिः॥ यत्रहिद्वैतमिवभवतितदितरइतरंपश्यतीत्यादि॥ यत्राविद्यादशायामखंडंचैतन्यमुपाधिनाद्वैतमिवभवतितदाइतरःप्रमातेतरंविषयंपश्यतिजानातिपश्यतीतिक्रियापदं॥क्रियाचांतःकरणवृत्तिरूपाअंतःकरणस्यपरिणामित्वात्॥ तथाचोक्तमाचार्यैःआत्मनःसच्चिदंशश्चबुद्धेर्वृत्तिरितिद्वयंसंयोज्यचाविवेकेनजानामीतिप्रवर्तते॥आत्मनस्तुक्रियानास्तिबुद्धेर्बोधोनजातुचित्॥ जीवःस्वरूपमज्ञायज्ञातादृष्टेतिमुह्यतीतितथाचअंतः

सावरणप्रज्ञानंमौढ्यापादकंनिवर्ततेततोविषयःस्फुरतिसाक्षिणा॥अंतःकरणोपहितंचैतन्यंसास्तीतिप्रक्रियाव्यवहारःनचेयंप्रक्रियास्वकपोलकल्पितेतिवाच्यं॥ श्रुतैक्यत्वात्॥ तथाचश्रुतिः॥ यत्रहिद्वैतमिवभवतितदितरइतरंपश्यतीत्यादि॥ यत्राविद्यादशायामखंडंचैतन्यमुपाधिनाद्वैतमिवभवतितदाइतरःप्रमातेतरंविषयंपश्यतिजानातिपश्यतीतिक्रियापदं॥क्रियाचांतःकरणवृत्तिरूपाअंतःकरणस्यपरिणामित्वात्॥ तथाचोक्तमाचार्यैःआत्मनःसच्चिदंशश्चबुद्धेर्वृत्तिरितिद्वयंसंयोज्यचाविवेकेनजानामीतिप्रवर्तते॥आत्मनस्तुक्रियानास्तिबुद्धेर्बोधोनजातुचित्॥ जीवःस्वरूपमज्ञायज्ञातादृष्टेतिमुह्यतीतितथाचअंतः

करणवृत्यवच्छिन्नं चैतन्यं मुख्यं प्रमाणं ॥ यावत्तिरूप्यते सा चैतन्याभास्वच्चि
तैवोत्पद्यते ॥ यथा घटादिरूप्यतेयः सआकाशव्याप्यवोत्पद्यते तथा वृत्तिरपि
अन्तउक्तंधीवृत्यवच्छिन्नंचैतन्यमिति ॥ तथाच धीवृत्यवच्छिन्नं चैतन्यं मुख्यंप्रमा
णं तत्साधनत्वात्वृत्तिकरणत्वात्इत्तरत्वचपुरादिप्रमाणमौपचारिकमित्यर्थः॥
तथाचनपूर्वोक्तोविरोधाभासः॥ अज्ञातज्ञापकत्वरूपंप्रमाणत्वमुभयत्रसाधारणं
तत्रव्यवहारेयावद्बाधंप्रामाण्यमितिन्यायात्प्रमाणत्वंतेषांवस्तुतः अज्ञातज्ञापक १६
त्वाभावात्ननुघटोयमितिधारावाहिकज्ञानेअज्ञातज्ञापकत्वाभावात्तत्रेदंलक्षणम
व्याप्तमितिचेन्न॥ धारावाहिकबुद्धिस्थलेनज्ञानभेदः किंतुयावत्घटस्फुरणं तावत्च

टाकारांतःकरणवृत्तिरेकैवनतुनानावृत्तेः स्वविरोधिवृत्यंतरोत्पत्तिपर्यंतंस्थायित्वाभ्यु
पगमात्तथाचतत्रप्रतिफलितचैतन्यरूपघटादिज्ञानमपितत्तत्कालीनमेकमे
वेतिनाव्याप्तिः तस्माद्ज्ञातज्ञापकत्वंप्रमाणलक्षणंयुक्तं॥ २०॥अंतःकरणव
त्यवच्छिन्नचैतन्यंपरंप्रमाणजन्यंयद्युत्तिज्ञानंतद्वृत्तंयत्प्रामाण्यंतत्स्वतस्त्वग्रह
तइत्याह॥ श्लोक॥ प्रामाण्यंयत्तद्वृत्तं तत्स्वतोहिगृह्यतेनान्यैरेषनोराजमार्गः॥
अप्रामाण्यंगृह्यतेतत्परस्मात्तेषंज्ञेयंत्वाकरस्थाद्विचारात्॥ २१॥ यथाअनभ्या
सदशायांप्रथमोत्पन्नंयत्तज्जलज्ञानंतत्प्रमाणमप्रमाणंवेतिप्रमाणगतासंभाव
शं नाप्रमाणसंशयइत्यूच्यते॥ तथावेदांताअद्वितीयेब्रह्मणिप्रमाणंनवेतिसंशयः

॥ सचप्रामाण्यनिश्चयान्निवर्ततेतत्रप्रामाण्यनिश्चयस्कस्यतएव॥ प्रामाण्यना
मतद्वृत्तितत्प्रकारकत्वंतस्यस्वतस्त्वेनामयावत्स्वाश्रयग्राहकग्राह्यत्वंस्वाश्रयोव
त्तिज्ञानंतद्ग्राहकंसाक्षिचेतन्यं॥ दृष्टेर्दृष्टारमितिश्रुतेः॥ तेनतद्वृत्तंत्तिज्ञानगतंप्रा
माण्यंस्वतएवगृह्यतइतिस्वतः प्रामाण्यं॥ श्रुत्यनुभवमूलत्वेन प्रामाण्यंतुपरतो
गृह्यतेतच्चतदभावबतितत्प्रकारकत्वंतस्यवृत्तिज्ञानानुपनीतत्वेनसाक्षिणागृह्यतुम
शक्यत्वात्तूपरतएवप्रामाण्यंगृह्यतइत्यर्थः॥ प्रामाण्यस्वतस्त्वपक्षेसंशयोदोषश्चा
दुपपद्यतइत्यादिविचारआकरतोभाष्यादिग्रंथतोज्ञेयोत्रविस्तरभयान्नोच्यतइत्य १७
र्थः॥ प्रामाण्येस्वतस्त्वप्रक्रियानस्वकपोलकल्पितेत्याहुः॥ एषनोराजमार्गइति॥ श्रु

त्यक्तत्वात्तत्तन्नयन्मनसानमनुतेयेनाहुर्मनोमत्तमितिश्रुतेर्मनःसाक्षिभास्यं॥ एवंम भा
नसःसाक्षिभास्यत्वेसिद्धेकामः संकल्पोविचिकित्साश्रद्धाश्रद्धाधृतिरधृतिर्ह्रीर्धी धी
रित्येतत्सर्वंमनएवेतिश्रुतेः॥ धीशब्देनज्ञानंमनोधर्मस्तदपिसाक्षिभास्यंतद्धृत्तं
यत्प्रामाण्यंतदपिसाक्षिभास्यं॥ एवंरीत्याप्रामाण्यंस्वतएवगृह्यतेति॥ एषनोस्मा
कंवेदांतिनांराजमार्गस्तत्स्करतकपराहतोनभवतीत्यक्तमितिदिक्॥ २१अविद्या
निवृत्तिः प्रमाणेनसाध्येत्याक्तंतदनेनश्लोकेनस्पष्टीक्रियते॥ श्लोक॥ ब्रह्माका
रान्तवमस्यादिवाक्यैर्योधीवृत्तिर्ब्रह्मविद्याभिधाना॥ उक्तावेदमूलमज्ञानभेषाज
मध्यात्मानंघातयेन्मूर्णवह्नौ॥ २२॥ करणीमूतेस्तत्त्वमस्यादिभिर्महा

वाक्येर्यो ब्रह्मारा(का)वृत्तिरूपद्यतेसाब्रह्मविद्या" उक्तेतिवेदेत्तयोवेदनिहितंगुहायांपर
मेव्योमन्नितिश्रुतौ"अस्याश्रुतेरर्थः॥ तत्सर्ववेदांतप्रसिद्धंब्रह्मेयःसाधनचतु
ष्टयसंपन्नोधिकारीवेदसांगीकरोति" निहितंस्थितंतद्वृत्त्यपत्तिष्यमानत्वात्तत्र
निहितोक्तिः॥ गुहायांबुद्धौपरमेप्रकृष्टेव्योमन्व्योम्निहृदयपुंडरीकांतर्हृदयाकाशेअ
न्तर्वर्तमानबुद्धावित्यर्थः॥ एषाब्रह्मविद्येत्तिअभिधानंनामयस्याःसातथा" मुलाज्ञान १८
मधिकारिणोब्रह्मलावरकमज्ञानमावरणविक्षेपशक्त्यात्मकंभावरूपंत्रिगुणंजग्द्या
प्रदाहआत्मानमपिस्वांवृत्तिमपिपूर्णवह्नौअखंडेब्रह्मणिब्रह्माग्नौघातयेदधिष्ठानमा
त्रशेषंकुर्यादित्यर्थः॥ तथाचचरमवृत्तिरूपयेयथाद्वितीयमुखाश्रयदर्पणाभावेमुख

मात्रमवशिष्यतेतथाअखंडब्रह्मावशिष्यते"पूर्णमदःपूर्णमिदंपूर्णात्पूर्णमुदच्यते॥
पूर्णस्यपूर्णमादायपूर्णमेवावशिष्यतइतिश्रुतेरित्तिभावः"उक्तंच"हस्तामलकाचा
र्यैः॥ यथादर्पणाभावआभासहानौमुखंविद्यतेकल्पनाहीनमेकं" तथाधीवियोगेनि
राभासकोयःसनित्योपलब्धिस्वरूपोहमात्मेत्ति॥२१॥ननुद्विविधमावरणमसत्यापाद
कमेकमपरमभानापादकंतत्राद्यंपरोक्षज्ञानेननश्यतिद्वितीयमपरोक्षज्ञभ्यैवन
श्यति" तदुक्तं" परोक्षज्ञानतोनश्येदसत्वाद्वृत्तिहेतुता"अपरोक्षाच्चियान्नश्येदभाना
द्वृत्तिहेतुतेत्ति" एवंस्थितौवाक्यान्नापरोक्षज्ञानमुत्पद्यतेकुत्रापिअदृष्टत्वात्"
तथासतित्वमस्यादिवाक्यान्नापरोक्षज्ञानांविनाअभानापादकावरणनाशाभावा

न ब्रह्माहमस्मीत्यपरोक्षज्ञानमुत्पद्यत इत्यतआह ॥ श्लोक ॥ अथ तत्त्वमसीति वेदवाक्या
दपरोक्षैवमस्तिर्हि भेददृशंनृणां ॥ दृश्यमस्त्वमसीति लोकवाक्याद्दृश्योस्मीत्यपरोक्षधी
र्यथान्न ॥ २३ ॥ अथैतेभ्यो वाक्येभ्यो नापरोक्षप्रमा जायत इति मन्यसे तर्हि दृश्यमस्त्वमसी
त्यत्रवाक्यादपरोक्षप्रमा दृष्टा ॥ तथात्रकृतेपि तत्त्वमसीतिमहावाक्यादपरोक्ष
प्रमोत्पद्यते ॥ तथा चाभानापादकावरणनाशाद्दृश्यं ब्रह्मास्मीत्यपरोक्षप्रमोत्प
द्यत इत्यर्थः ॥ ज्ञाद्वप्रमाणं तुयत्रविषयः परोक्षस्तत्रपरोक्षप्रमामेवोत्पादयति ॥ य १७
त्रचापरोक्षोविषयस्तत्रापरोक्षप्रमांजनयति तस्योभयसाधारणत्वादितिभावः ॥
२३ ॥ नन्विंद्रियजन्यंज्ञानमपरोक्षं नप्रमाणांतरजन्यंज्ञानमपरोक्षंदृष्टमतोवेदांत

शास्त्रोक्तमपरोक्षलक्षणमाह ॥ श्लोक ॥ यदनावृतचित्तदात्मत्वादोह्यपरोक्षतामि
हब्रुवंतिसंतः ॥ अतएवजडार्थसंविदैक्यादपरोक्षंनजडेषुतत्स्वतोस्ति ॥ २४ ॥ इ
हवेदांतशास्त्रेयत्याअनावृतचित्अनावृतसंवित्तस्यास्तदात्मतातदात्मनोभा
वस्तदात्मत्वात्तादात्म्यंइतियावत् ॥ तत्अपरोक्षतांसंतोवेदांतनिपुणाआचार्याः
ब्रुवंतिनेंद्रियजन्यंज्ञानमपरोक्षंतस्याभावप्रत्यक्षेमनसोनिरिंद्रियत्वेनस्फुरत्वाच्च
परोक्षेचव्यभिचारादितियोजना ॥ अत्रायमर्थः अनावृतसंवित्तादात्म्यमपरोक्षतां
अनावृतसंवित्साक्षिचैतन्यंअंतःकरणोपहितंचैतन्यंसाक्षीतस्यावृतत्वेजग
दांध्यप्रसंगः ॥ तादात्म्यंनामतद्भिन्नत्वेसतितद्गतिन्नसत्ताकत्वं ॥ तथाचदृश्यमस्त्वम

२॰ सीत्यत्रसामानाधिकरण्याद्दशमस्यत्वंपदार्थोभिन्नतयाऽपरोक्षत्वेनवाक्यादपरोक्ष
त्रमैवजायत्तेऽहंद्रष्टाऽस्मीत्ति॥ ननुनवाक्यॉपरोक्षज्ञानंमॅसान्तत्साक्षात्कारइत्तिचे
न्नसिद्धांत्तेमनसोऽनिंद्रियत्वस्योक्तत्वात् वृत्त्यपादानत्वेनकरणत्वायोगाच्च॥ त्रमा
णजन्यापरोक्षज्ञानस्यैवत्रमनिवर्त्तकत्वाच्च॥ मनसोऽनिंद्रियत्वंनुएत्तस्माज्जाय
न्ते त्राणोमनःसर्वेंद्रियाणीतिश्रुतेर्ज्ञेयंसुखादिसाक्षात्कारस्यचात्रमात्वमिष्टमेवत्त
स्यत्रात्तीन्द्रियत्वात्॥ एवंत्तत्त्वमसीत्यत्रापित्तत्पदलक्ष्यस्यब्रह्मणस्त्वंपदलक्ष्यस्यसा
क्ष्यभिन्नतयानावृत्तसंवित्तादात्म्यान्नित्यापरोक्षत्वेनशोधित्तत्त्वंपदार्थस्याधि
कारिणोमननंनिदिध्यासनसंस्कृतांतःकरणसहकृतमहावाक्यादहंब्रह्मास्मी



त्यपरोक्षत्रमाजायत्तइत्ति॥ अत्तएवेत्ति॥ अनावृत्तसंवित्तादात्म्यमपरोक्षत्वमत्तए
वहेतोरनावृत्यवच्छिन्नचैतन्यस्येत्तिशेषः॥ तत्स्यजडार्थसंविदैक्यात्तजडार्थोघटा
दयस्तदवच्छिन्नायासंवित्तयासहैक्यात्तएकलोलीभावात्अनावृत्तसंवित्तादात्म्य
रूपमपरोक्षत्वंव्यावहारिकंतत्तजडेषुघटादिषुस्वतोनास्तिजडाजडयोरसिन्न
सत्ताकत्वाभावात्॥ किंतुघटादेःअविद्यावच्छिन्नचैतन्येअविद्याकल्पितारूप
मासंत्तइत्यर्थः॥ तेषामधिष्टानापरोक्ष्येणापरोक्ष्यंनस्वतइत्तिफलितोर्थः॥ २५॥ ए
तदेवविवृणोत्ति॥ श्लोक॥ अधिष्टानसत्वेनत्तस्यास्तिसत्वमधिष्टानभानेनत्तस्यास्ति
भानं॥ अत्तःकल्पितत्वंजडार्थेषुयुक्तंयथारजुसर्पेचरंगेचत्तद्वत्॥ २५॥ यथासा

दृश्यात्॥ शुक्तिरजतभ्रमस्तथाशुक्तौकचिद्रंगभ्रमोपिदृष्टः तद्वदित्यर्थः शेषंस्प
२१ ष्टं॥ २५॥ननुविषयावच्छिन्नब्रह्मचैतन्यस्यदृश्यावच्छिन्नप्रमाणचैतन्यस्यचैकलो
लीभावादनावृतसंवित्तादात्म्यरूपमपरोक्षत्वंभवतिचेत्तर्हिब्रह्मबुद्धिःसंपन्नैव
तत्तश्चसद्योमोक्षप्रसंगः सर्वेषांइत्यतआह॥श्लोक॥ विशेषस्त्वयंतत्वमस्यादिवा
क्याद्विशिष्टत्वहान्याविशुद्धापरोक्ष्यं॥ घटाद्यर्थसंविद्घटाद्यर्थमिश्रातत्तोनास्ति २१
तस्यांहिसद्योविमुक्तिः॥ २६॥तत्त्वमस्यादिवाक्यानुभागलक्षणयाविशेषांशपरि
त्यागेनत्वंपदलक्ष्यस्यप्रत्यगात्मनोः ब्रह्मत्वनिवृत्तौतत्पदलक्ष्यस्यचपरोक्षत्वनि
वृत्तौविशुद्धापरोक्ष्यमन्यानुपरक्तचैतन्यस्यानावृतसंवित्तादात्म्यरूपमपरोक्ष्यत्वंभवति

यत्रत्वस्यसर्वमात्मैवाभूदित्यादिश्रुतेः॥ प्रमाणप्रमेयादिव्यवहारहीनंभवतीत्यर्थः॥ घ
टाद्यर्थसंविन्नुघटाद्यर्थमिश्राआविघकजडपदार्थोपरक्तोभवतिघटंजानामीति
प्रतीतेः प्रमाणप्रमेयस्फुरणात्तत्स्यहेतोर्नसद्योमुक्तिः॥ अन्यानुपरक्तचैतन्यभाव
स्यैवमोक्षहेतुत्वादित्यर्थः॥ २६॥ननुजातायांब्रह्मात्मबुद्धौबाधितमपिदृतंसंभावए
वनिर्विशेषमन्यानुपरक्तंचैतन्यंकदृष्टमितिचेतत्राह॥श्लोक॥ समाधिकालेनजडं
समीक्ष्यतेस्वात्मास्वभूमत्वमुपागतस्तदा॥ व्युत्थानकालेसकलंबहिस्थितंप्रबाधि
तंपश्यतिचोक्तरीतितः॥ २७॥असंप्रज्ञातसमाधिकालेजडंकल्पितंनभूयतितदानीं
स्वात्मासर्ववस्तुनिरोधात्स्वभूमत्वंस्वाभाविकंभूमस्वरूपत्वंप्राप्तइत्यर्थः॥ यत्रयति॥

नान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानातिसभूमेतिश्रुतेः॥ उक्त एवोक्तंसूत्रकृ
ता॥"अपिसंराधनेप्रत्यक्षानुमानाभ्यामि"ति॥"संराधनेसमाधिकालेपिप्रत्यक्षंश्रुति
रनुमानंस्मृतिस्ताभ्यामुक्त्वातन्निर्विशेषमात्मानंपश्यतीतिसूत्रार्थः॥ तत्रश्रुतिः॥
ज्ञानप्रसादेनविशुद्धसत्वस्ततस्तंपश्यतिनिष्कलंध्यायमानइति॥"स्मृतिरपिः॥"मेविनि
द्राजितश्वासाःसंतुष्टाःसंयतेंद्रियाः॥ज्योतिःपश्यंतियुंजानास्तस्मेयोगात्मनेनमइ
ति॥ध्यानेनात्मनिपश्यंतिकेचिदात्मानमात्मनेतिभगवद्गीतोक्तेश्चेत्यर्थः॥ देहनिर्वो २२
हार्थेव्युत्थानकालेप्रकर्षेणबाधितमचिष्टानसत्वेनतस्यास्तिसत्वमित्याकूतरीत्या
वक्ष्यमाणरीत्याचपश्यतीत्यर्थः॥ २७॥उक्तंसमाधिंलक्षयति॥श्लोक"सदृपिचित्तम

दोःसदिवास्थितंभवतियत्रसाधनतोनृणां॥सहिसमाधिरितीहफलसिद्धः
परमशर्मपदंपरमार्थतः॥ २८॥ सुत्तरांयमनियमाद्यष्टांगसाधनैः सेदृपिचित्तंसर्व
वृत्तिनिरोधादसदिवास्थितंनिश्चलंभवतिससमाधिरिति॥इहव्यवहारभूमौहीति
विद्वत्सिद्धःफलसिद्धःसकृच्छोभनत्वेनलक्षितउक्तः॥तथाचसूत्रं॥तदेवार्थमा
त्रनिर्भासंस्वरूपशून्यमिवसमाधिरिति॥तादृशंचित्तंपरमशर्मपदंपरमंनिरति
शयंशर्मसुखंपद्यतेप्राप्यतेनेनेतिपदंपरमार्थतोऽकृत्रिममित्यर्थः॥समाधिनिर्धू
तमलस्यचेत्तसोनिवेदितस्यात्मनियत्सुखंभवेत्॥नतद्विरावर्णयितुंशक्यतेस्वयंयदंतः करणेनगृह्यतइतिश्रुतेः॥सुखमात्यंतिकंयत्तद्बुद्धिग्राह्यमतीन्द्रियमि

तिगीतोक्तेश्च॥ २८॥ वक्ष्यमाणरीत्याचाचित्तंपश्यन्तीत्यक्तं तदेवानुभवानुवादेनदर्शयति॥ श्लोक॥ अघटनघटनापटीयसीयंयदुपतिदेववरस्यशक्तिरुच्चैः॥ कचबत्तरशानाकसर्पभानंकचरविरेकइहद्वितीयभानं॥ २९॥ इयंसमस्तनामरूपात्मकप्रपंचाकारेणेरिणनाश्रीकृष्णस्यशक्तिःसामर्थ्यविशेषः देवात्मशक्तिंस्वगुणैर्निगूढामितिश्रुतेर्यदुपतीत्यक्तं॥ एतेनतत्स्याःपरतंत्रत्वमुक्तंयोषितं॥ उच्चैर्मेरोरिवभृगवधूरणेतांविनाअनुलंघनीया॥ मामेवयेप्रपद्यंतेमायांमेतांतरंतितेइतिस्मृतेः॥ तत्स्याःप्रभावंदर्शयति॥ अघटनंकेनापिकर्तुमशक्यंतत्स्यघटनारचनात्तस्यांपटीयसीकुशलेत्यर्थः॥ एतेनविवर्त्तवादःप्रदर्शितः॥ आतात्विकान्यथाभावप्रदर्शनात् २३

पटीयस्त्वमेवदर्शयति॥ वतइतिखेदेरशनारज्जुविशेषकत्तस्यामधिष्ठानभूतायांलौकिकसामग्र्यभावेपिकसर्पस्तस्यभानंचकेत्यर्थः॥ अयंभावः॥ पुरोवत्तद्रियसंनिकर्षानंतरमिदमाकारवत्तीसत्यांइदंत्वावच्छिन्नचैतन्यनिष्ठारज्जुवप्रकारविषयेयासादृश्यदर्शनसमुद्भूतसर्पसंस्कारसहकृतासतीसर्पाकारेणसर्पज्ञानाकारेणचस्वयंपरिणम्यस्वपटीयस्त्वंदर्शयतीति॥ चेत्यपरंगनस्चोरविरेकः कुदशरावादौद्वितीयरविदर्शनंकेतियदुपतिदेववरस्यशक्तिइत्यनेनभोज्यितेश्वरोदर्शितः॥ कचबत्तरशानेत्यनेनभोग्यंदर्शितं॥ कचरविरेकइत्यादिनाभगवत्प्रतिबिंबोजीवोभोक्तेतिविविधोभेदश्चभोग्यंभगवत्शक्तिमूलोऽनिर्वचनीयस्त्रवंशीया

बाधितंपश्यन्तीत्यर्थः॥२९॥पुनश्चस्वानुभवानुवादेनप्रपंचस्यबाधितत्वंदर्शय
तिपंचभिःपद्यैः॥श्लोक॥ क्वचपरमसुखंनिजंस्वरूपंक्वचमम दुःखपरंपराविला
सः॥ क्वचममविपुलाक्वकर्मदैन्यंक्वचममतेनबभूवपाशबंधः॥३०॥परमसु
खदुःखपरंपराविलासयोस्तथाविपुलाकर्मदैन्ययोः॥परस्परात्यंतविरुद्धयोःसं
बंधघटनाकिमन्यन्मायायाः अघटनघटनापटीयस्त्वमितिभावः॥बभूवेतिप
दस्याग्रिमश्लोकेपिसंबंधोबोध्यः॥शेषंस्पष्टं॥३०॥श्लोक॥क्वचममचिंतिताक्वतन्न
मोक्षंशिवशिवकिंकरवाणितन्नमेस्ति॥क्वचममस्वरूपतानुभूतेःक्वचम २५
मबाह्यपदार्थेशर्मवांछा॥३१॥चिंतितानिर्विषयज्ञानंस्वरूपता॥तत्रमोक्षम

स्यानंकेतिशिवशिवइतिखेदेतद्ज्ञानंममनास्तिरवाविवृत्तमोक्षात्पूर्वंमहमज्ञ
इत्यादिमायया दर्शितंतत्रकिमहंकरवाणितस्याःप्रावल्यादित्यर्थः॥३१॥श्लोक॥क्वच
नतनिरहंकृतिर्ममात्माक्वचनतनुषुप्रजडास्महंकृतिर्मे॥क्वचममममतावि हीनतेयंक्वच
ममतागृहपुत्रबांधवादौ॥३२॥ममात्मेतिराहोःशिरइतिवत्कल्पनयाषष्ठी॥ननुक्षितिव
हुवन्यनमेकस्यैवात्मनोऽतीतानागतानेकदेहाभिप्रायंजन्यथापूर्वानुभूतपदार्थस्म
र्तिंविनाजननीस्तनपानायमृगशावकादेःप्रवृत्तिर्नस्यात्॥३२॥श्लोक॥क्वचममनि
रुपाधिरूपमेकंक्वचमउपाधिकृतस्वनेकभेदः॥क्वचममसविशेषतानिरासःक
चमउपाधिकृतंविशेषभानं॥३३॥तत्रकोमोहःकःशोकएकत्वमनुपश्यन्तइति

२५ एकंरूपंकरएवहिभूतात्माभूतेभूतेव्यवस्थितः॥ एकधाबहुधाचैवदृश्यतेजलचंद्रवदितिउपाधिकृतोभेदःकञ्चशुद्धस्यश्रीमरूपमव्ययंइत्यादिश्रुतिभिस्तथाजन्मस्थलमनण्वित्यादिभिश्चसविशेषत्वनिरासःकेसादयःश्रुतयोज्ञेयाः॥३३॥श्लोक॥ कुचमभसकविरागितास्वरूपंकचमभकाभविलासिनीषुचित्तं॥ कचमभनहिबंधनंनमोक्षःकचमभवधंनमोक्षणप्रादः॥३४॥ शास्त्रेलोकेचप्रकर्षेणवादःकथनमित्यर्थः॥उभावपिश्लोकौस्पष्टार्थौ॥ किमेतावतेत्यतआह॥३५॥श्लो० सज्ज्ञानमेतत्सकलंव्यलीकंतज्ज्ञंस्मरंदुःखमपिव्यलीकं॥ मृगोदृकंसर्वमपिव्यलीकंतज्ज्ञास्तरंगाअपितेव्यलीकाः॥३५॥ एतत्सर्वंपूर्वोक्तंदुःखपरंपराविसोलादि २५

---

कमखंडैकरसेनित्यनिरतिशयानंदस्वरूपेचिन्मात्राश्रयविषयंत्रिगुणात्मकंभावरूपंज्ञावरणविक्षेपाद्यनेकशक्त्यात्मकंजगन्निजडरूपेणानुगतंपुरुषेमोक्षरूपेणानुगत्तमपवर्गपरिपंथिअहमज्ञइतिप्रतीतावच्यस्तत्तयाभासमानत्वाद्व्यलीकंतज्ज्ञंससाद्यनंस्मरंदुःखमपिव्यलीकंतयोःसयतेमोक्षेभ्रांतिरेवनस्यात्न ह हिसत्यंनिवर्त्ततइतिन्यायादित्यर्थः यथाम्रगोदृकंसर्वमपिज्ञंशांतिभावरहितंव्यलीकंतत्कार्यंतरंगादिकमपिव्यलीकंतथेदमज्ञानंतत्कार्यंचमृषेत्यर्थः॥ननुज्ञानस्यभावरूपत्वेकिंप्रमाणमित्युच्यतेतदनुकूलंयुक्तिंचावधारयमायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमितिश्रुतेर्जगत्परिणामोपादनत्वात्प्रकृतिरूपंनह्यज्ञा

२६ वः परिणमतेऽनेनाभावरूपंकिंचञ्जहमज्ञइतिप्रतीतौप्रतियोगिभानमंतरेणे
वभासमानत्वान्नाभावरूपंतस्माद्यथाधर्मविरुद्धो ३ धर्मोभावरूपोदुःखकारणं
तथेदमज्ञानमपिभावंरूपंदुःखकारणं॥उक्तंच॥जाड्यंजगत्यनुगतंखलुभाव
रूपंभौढ्यंचपुंगतमितिप्रतिभातिनद्वत्॥जाड्यंचमौढ्यमितिचानुभवप्रसिद्धम
ज्ञानमाहुरपवर्गपिधानदक्षमिति॥३५॥ननुसकार्यमज्ञानंमृषाचेत्तथापिप्रती २६
यतेकथंतस्यापलापः कर्तुंशक्यइत्यतऊह॥श्लोक॥सामग्रिकायावदिहास्ति
स भाँतेप्रभासत्तांनाममृषामृगोदकं॥प्रारब्धवेगात्सुखदुःखभानंभूयात्तथानोनहि
कापिहानिः॥३६॥यथामृगोदकमूखरभूमौमृषात्वेनबहुशः प्रतीतमपियावत्सा

मग्रिकासूर्यकिरणादिरूपातावत्पर्यंतंभासतेतावतानतस्यसत्यंवक्तुंशक्यंए
वमधिष्ठानज्ञानेनप्रपंचहेतुभूतमूलाज्ञाननिवृतावपितत्कार्यंसुखदुःखसा क्षा
त्कारः प्रारब्धरूपसामग्रीवशात्भासतांनामनह्येतावतानोस्माकमज्ञानतत्का
र्यप्रपंचेसत्यबुद्धिरूपाहानिर्नास्तेत्यर्थः॥उक्तंच॥उरुवातदंष्ट्रोरगवद्विद्या
किंकरिष्यतीति॥नहिवयंतदपलापंब्रूमः किंतुसकार्यमज्ञानंमृषेतिब्रुमइति
॥३६॥श्लोक॥भ्रांत्याकृतानांखलुकर्मणांमयाविपाकएवंबहुधानुभूयते॥भ्रांति
र्निवृत्तेवतथापिकर्मप्रारब्धभेदेननहिमुंचतिह॥३७॥भ्रांतिःसकार्यमुलाज्ञानंत
तःकामस्तत्तःकर्माकर्मविकर्मरूपाणिकर्माणिमयाकृतानितेषांविपाकोबहुधा

स्वानु० २७ बहुप्रकारमनुभूयते" कर्मविपाकस्तूपतंजलिनोक्तः॥ सति मूले तद्विपाका जात्यायुर्भोगास्तेल्हादपरितापफलाः पुण्यापुण्यहेतुत्वादिति सूत्रेण॥ एवंसतिभ्रांति र्निवर्त्तेवतथापिइहदेहेप्रारब्धं कर्ममांहीतिनिश्चयेननमुंचतीत्यर्थः॥ ननूपादाननाशेपिउपादेयंनिष्टतीतिन दृष्टमिति-चेत्तत्राहुः ज्ञात्वाप्यसर्पेसर्पोह्रुंयथाकंपंनमुंचति"विध्वस्ताखिलमोहोपिमोहकार्यंनमुंचतीति" यथावातार्किकैः समवायिकारणनाशात्कार्यनाशमंगीकुर्वद्भिरपिनिरुपादानंद्रव्यंक्षणमात्रंतिष्टतीसंगीकृतंतद्वदुपादाननाशेपितंउपादेयमहंकारदेहादिनिरुपादानमेवयावत्प्रारब्ध कर्मभोगमनुवर्त्तेदृष्टत्वात्नहिदृष्टेऽनुपपन्ननामेतिन्यायात्"श्रुतिरपितस्य २७

तावदेवचिरंयावन्नविमोक्ष्येथसंपत्स्यइतिअहंब्रह्मास्मीतिचरमसाक्षात्कारानं तरमहंब्रह्मनभवामिनजानामीतिप्रत्ययोनाश्येवयदिपरंघटंनजानामीत्यादिप्रत्ययः स्यात्तदुपपादनायसंस्कारः कल्प्यते॥ अज्ञानलेशपदेनापिभाष्यस्थेनायमेवसंस्कारोविवक्षितः॥ नहिसावयवमज्ञानंकियन्नष्टंकियत्तिष्टतीतिवाच्यंतत्स्यानिर्वचनीयत्वात्"तस्मात्जीवन्मुक्तस्यघटंनजानामीत्यादिप्रत्ययः संस्कारमात्रादेव"उक्तंचसंक्षेपशारीरके" गंधद्रव्यालेशसंस्कारभाषाविज्ञातव्याभाष्यकारीयतंत्रेति"किंबहुनासर्वोपितस्यव्यवहारः संस्कारमात्रादेयेति" तदुक्तंतत्रैव" पश्यामिचित्रमिवसर्वमिदंतीद्धियंतिष्ठाप्रिनिष्कलचिदेकवपुष्यनंते"

२८ आत्मानमद्वयमनंतस्करैवैकरूपंपश्यामिदग्धरशनामिवचप्रपंचमिति॥ तस्मा
न्भ्रांतिर्निवृत्तैवतथापिकर्मप्रारब्धमेतन्नहिमुंचतीतिसाधूक्तमिति॥३७॥क
र्मतावन्नात्मसमवायिकिंत्वन्यसमवायीत्येवंसतियत्कर्मकर्तृत्वंस्वस्यसापिभ्रां
तिरियाह॥श्लोक॥शरीरकर्मेंद्रियचित्तसाध्यमारोप्यतत्त्वात्मनिकर्मजातं॥क
र्त्ताहमस्मीतिविपर्ययोयंचंद्रेयथाप्रेक्षगतिस्तथैव॥३८॥शरीरंभोगायतनंक
र्मभोगप्रदंश्रोत्रादिनिबाह्येंद्रियाणिचित्तमतःकरणंतैःसाध्यं॥तन्निषिद्धमितिसूत्रार्थः॥ २८
यथाप्रेक्षनिष्ठांगतिंचंद्रेआरोप्यचंद्रोधावतीतिप्रतीतिर्भ्रांतिस्तथाहंकर्त्तेति
भ्रांतिरित्यर्थः॥३८॥अविद्यकंकर्मोविद्यावतामुपकारकंतैराविद्यकमितिमत्वा

---



नत्याज्यमितिसाह॥श्लोक॥अविद्यकंयदपिकर्मतथापिसर्वंकृष्णार्पितंविविदिषांजनये
दशुद्धिं॥काम्यंनिषिद्धमपितज्जुषतांफलंसमस्तंसंत्यज्यकर्मनियतंविदुषीतमर्सेः॥
३९॥सर्वंलौकिकमलौकिकंवाकर्मअविद्यकंयदपियद्यपितथापि॥यत्करोषियद
श्नासीत्यादिस्मृतेः॥कृष्णार्पितंसत्प्रेतःशुद्धिंजनयित्वाविविदिषांजनयेत्॥तम
मेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसानाशकेनेतिबृहदारण्य
कोक्तेः॥नियतस्यतुसंन्यासःकर्मणोनोपपद्यतइतिस्मृतेस्तदनुष्ठेयमेवेत्यर्थः॥नि
षिद्धंनपत्नींदुंभस्यादित्यादितथाश्येनेनाभिचरन्यजेतेतिवेदविहितत्वेप्यमिचा
रिकंफलदोषेणदुष्टत्वात्त्याज्यमेवेत्यर्थः॥काम्यमितिसूत्रमतद्व्यंतत्राचार्यमतेकाम्यं

नानुष्ठेयमेव"।वार्तिककारमतेकाम्यमपिकामनांत्यक्त्वाज्योतिष्टोमादीश्वराराधन
तेनानुष्ठितंसत्तूविविदिषांजनयेदेवेति"।अन्यथाकाम्यकर्मप्रतिपादकश्रुतीनां
वैयर्थ्यंस्यादित्याकरेविस्तरः"।३९"।कर्मानुष्ठानंचित्तशुद्धिद्वाराविविदिषोत्पादने
समर्थमेवनतुज्ञानसमुच्चयेनतस्यानुष्ठानं"।तस्यतन्नासामर्थ्यमित्याह"।श्लोक"।
नकर्मविज्ञानसमुच्चयःस्यात्कर्मोपमर्दःस्वलुतत्वबुद्धेः"।अज्ञाननाशोंहिकर्मणा न
नोज्ञानेनमुक्तिर्नसमुच्चितेना"।७"।तत्वबुद्धेस्तत्वज्ञानादाविद्यकानांकर्मणामुपम
र्दःस्यान्नयज्ञकर्मानुष्ठानहेतोःक्रियाकारकवीभागस्याविद्याकृतस्यविद्यासामर्थ्योदु २७
पमर्दोबाधःस्यान्नयत्नतस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादिनातथाचोपमर्दि

तकर्मसमुच्चयोमुक्तावनुपयुक्तः"।किंचविज्ञानंतावदज्ञानंविनाश्यमुक्तिजननेसमर्थे
तेजस्तिमिरयोरिवतयोर्विरोधात्कर्माविद्ययोर्विरोधाभावान्नाज्ञाननाशेतस्यसा
मर्थ्यमतोनज्ञानसमुच्चयोयुक्त इत्यर्थः तदुक्तमाचार्यैः"।अविरोधितयाकर्मनावि
द्यांविनिवारयेत्"।विद्याःविद्यांनिहंत्येवतेजस्तिमिरसंघवदिति"।अन्यत्राप्युक्तं"।प्र
माणजन्यज्ञानेनविनाविद्याशक्तैरपि"।रज्जुसर्पादिविभ्रांतिर्नैकापिविनिवर्त्ततइति"।
तस्मात्कर्मनज्ञानसमुच्चयेनानुष्ठेयंतस्यान्यथासिद्धत्वादिति"।७"।मंत्रायाकृतानांक
र्मणांपुरुषस्यफलभोक्तृत्वंकेनप्रकारेणेत्यपेक्षायांतद्दर्शयति"।श्लोक"।शारीरकर्मे
द्रियचित्तयोगेधियःस्वरूपाकारतयाविकारः"।[illegible]तस्योपलब्धृत्वमदोस्यकर्मफल

३॰ स्वप्नोक्तृत्वमितोन्यथा॥ ५१॥ शरीरंभोगायतनं॥ कर्मयज्ञादिउपासनारूपंच इंद्रियाणि दशबाह्यानिचित्तमंतःकरणंएतेषां इंद्वैकत्वं॥ इदंपंचप्राणादेरुपलक्षणं॥ तथाच॥ सप्तदशात्मकंसूक्ष्मशरीरंभोगसाधनंएतेषांयोगेसतिधियोबुद्धेः धर्मवशात्सुखाकारतयाऽधर्मवशात्दुःखाकारतयावाविकारः परिणामः तस्यपरिणामस्योपलब्धत्वंइदमनुकूलंप्रतिकूलंवेतियत्साक्षात्वंअर्थः पुरुषस्यकर्मफलभोक्तृत्वमितोन्यथाप्रकारांतरेणनास्तीत्यर्थः॥ अतएंद्रियमनोयुक्तंभोक्तेत्याकुर्मनीषिणइतिश्रुतेः॥ पुरुषःसुखदुःखानांभोक्तृत्वेहेतुरुच्यतेइतिस्मृतेः॥ ५१॥ स्वप्नेभोगसाधनयोर्लक्षण्यं जागरतोदर्शयति॥ श्लोक॥ स्वप्नेनुसर्वेंद्रियदिव्यदेहयोगोस्यस्वैः किलवासनाप्यं



त्मौद्रोषंसमानंसुखदुःखभोगोनवस्तुगत्यामपिचित्स्वरूपे॥ ५२॥ स्वप्नदेहस्यायोनिजत्वात् दिव्यदेहइत्युक्तं॥ वासनात्मासंस्कारस्वरूपइतिकिलश्रूयते॥ अस्यसर्वावतोमात्रामुपादायेतिश्रुतेः॥ मात्रांपुष्पपुटस्येवसंस्कारः॥ अयंचजाग्रत्स्वप्नयोः सुखदुःखभोगोऽविद्यककर्मनिमितोवस्तुतोमपिचित्स्वरूपेनास्तीतिस्वानुभवसिद्धमित्यर्थः॥ द्वेषंमंतःकरणपरिणामः तस्योपलब्धृत्वंचसमानमेवेत्यर्थः इच्छाद्वेषः सुखंदुःखं संघातश्चेतनाधृतिरितिस्मृतेः॥ सुखदुःखेमनोधर्मः॥ अतउक्तंसुखदुःखाकारतयापरिणामइति॥ ५२॥ जाग्रत्स्वप्नभोगसाधनयोर्लक्षण्यंसुषुप्तवस्थायांदर्शयति॥ श्लोक॥ सुषुप्तवस्थासुखदुखभोगोविनापिकर्मास्यतथाप्रतीतेः॥ तत्राप्यविद्या

३१ गुणवृत्तमेतन्निवृत्तिरस्याः परमःपुमर्थः॥२३॥अहंसुखमस्वाप्सं दुःखमस्वाप्समितिप्रती
तेरपि नापि कर्मनिमित्तकारणं कर्मविनापि सुखदुःखभोगः सुषुप्त्यवस्थायामनुभवसिद्ध
इत्यर्थः॥अन्यथा जाग्रद्दशायांपरामर्शानुपपत्तिः स्यात्॥ तर्हि तत्राकिंनिमित्तः सुखदुःखभो
ग इति चेत्तत्राह॥ तत्रापीति॥ सुषुप्त्यवस्थायामपिअविद्यागुणाः सत्वरजस्तमांसि उपादान
भूतानीतेषांवृत्तं तन्निमित्तमित्यर्थः॥ तथाचसत्वं सुखाकारतयापरिणमतेरजोदुःखा का
रतयापरिणमतेतमोमोहाकारतयापरिणमतेतेन सुखमस्वाप्सं दुःखमस्वाप्सं मूढोहमितिप्र ३१
तीयः॥ननु गुणसाम्यावस्थानंतत्रोक्तंविरुद्धेतिचेन्न तस्यगाढसुषुप्त्यवस्थाविषयत्वात्
॥अतोगुणत्रयरूपाविद्यानिवृत्तिरेवपरमःपुरुषार्थोनसर्वावस्थोद्देश्यइत्यर्थः॥ कर्माश्रयस्यो



हंकारस्यतत्रैवतत्वानुविनापिकर्मेक्यरूं॥ननु सुषुप्तौयथासुखमनुभूतंस्मर्य
तेतथाहंकारोपितत्रानुभूतएवस्मर्यतेइतिवाच्यमन्यथाहमस्वाप्समितिपरामर्शो
यनस्यात्तथाचतत्रकर्माश्रयाहंकारसत्वेनकथमुक्तंविनापिकर्मसुखदुःखभोगइ
तिचेन्मैवंतत्राहंकारस्वीकारेपुमान्जाग्रिया तू॥जाग्रदवस्थायामेवतस्यप्रती।
तिरहंजागमीतिप्रतीतेर्नसुषुप्तिस्वप्नयोस्तथाप्रतिसंधानात्॥ तर्हिकथमस्वाप्समि
तिसामानाधिकरण्येनप्रतीतिरितिचेदुच्यते॥यथामुखप्रतिबिंबाश्रयेदर्पणेजपाकुसु
मलोहित्याध्यासेरक्तंमुखमितिसामानाधिकरण्येनप्रतीतिस्तथाहंकाराश्रयसाक्षिचै
तन्यस्यस्मरणाश्रयत्वादहमस्वाप्समितिसामानाधिकरण्येनप्रतिरोनसुषुप्तावहं

कारोनुभूतःस्मर्यतेतथानकर्माश्रयाहंकारंविनैवाहंसुखमस्यासंदुःखमस्यासमिति
प्रत्ययउपपद्यतेतस्यचयथोक्तव्यवस्थेवंग्राह्येनकिंचिदनुपपन्नमिति॥७३॥बुद्धिस्वभाव
जदुःखस्यप्रारब्धाधीनत्वेबुद्धमुठयोर्भोक्तृत्वंसमानंतथापिबुद्धंप्रतिविशेषमाह॥
वि ॥श्लोक॥समानमेतद्धिमूढबुद्धयोर्भोक्तृत्वमस्मिन्खलुसंशयोन॥विमूढलोकस्य
विषादहर्षौसुखासक्तस्यतोनैवविशेषएषः॥७४॥पदार्थःस्पष्टएव॥मत्वाधीरोहर्षशोकौज
हातीतिश्रुतेः॥दुःखेष्वनुद्विग्नमनाःसुखेषुविगतस्पृहइतिस्मृतेश्च॥बुद्धात्मतत्वस्यहर्ष
विषादौनस्तइत्यर्थः॥७५॥अन्यमपिनंप्रतिविशेषमाह॥श्लोक॥धैर्येणशौर्येणचधीरलो धी
काःसंग्रामतोनैवपराजुखःस्यात्॥तत्रधीरःसुखदुःखधानैःप्रानैःप्रतीचोनपरा

ज्ञुखःस्यात्॥५५॥धीरलोकोरणवीरलोकः तत्वज्ञःसन्धीरऊर्ध्वरेविका ध्यात्मिका
धिभौतिकभेदाग्निर्विषसंपर्कान्नमिवस्कखमिश्रदुःखयोर्नैःस्कखदुःखानांधातादुः
खहानुभवासेस्तत्वज्ञत्वात्पुनःपुनस्तत्वानुस्मरणात्प्रतीचःस्वप्रकाशपरमानंदघना
त्मपरा ज्ञुखोहंस्कखीदुःखीतिप्रत्ययवानूभवतीत्यर्थः॥५५॥अहंस्कखीदुःखीतिप्रत्ययो
भ्रांतिरेवेत्याह॥श्लोक॥बुद्धिस्थदुःखंनिजऊर्ध्वात्मनीदमोरोप्यदुःखीतिविपर्ययोमे
॥आरोपितंतत्सकलंमयैतिमत्वानिजात्मानमुपाश्रितोस्मि॥५६॥मत्वाऽन्ययव्यतिरे ३३
काभ्यांनिश्चित्यनिजात्मानंस्वप्रकाशपरमानंदघनमाविद्यकस्कखदुःखाद्यस्पृष्टमु
पाश्रितोस्मितत्रैवबुद्धिस्थेयंप्राप्तोस्मीत्यर्थः॥५६॥इदानींमहावाक्यार्थानुभवस्य

ध्यर्थेतत्पदशोधनमनेकप्रकारैःक्रियते॥श्लोक॥ज्ञानंसमस्तंस्वतुधर्मिमात्रेऽभ्रांतंप्रका
रेतुविपर्ययःस्यात्॥अज्ञानतज्जंसकलंप्रकारंहित्वानिजात्मानमुपाश्रितोस्मि॥५७॥स
र्वज्ञानंधर्मिण्यभ्रांतंप्रकारेतुविपर्ययःस्यादितिन्यायात्धर्म्यंशोसन्मात्रेवस्कनिज्ञानंन
भ्रांतंतस्याधिष्ठानत्वात्तर्हिकुत्रभ्रांतमतआह॥प्रकारेविपर्ययोभ्रांतिः॥सतिधर्मिणि
अज्ञानंभ्रांतिरध्यस्यतयाप्रतीयमानत्वात्॥तथातज्जंसकलमपिकार्यंप्रकाररूपंभ्रां
तिरूपमध्यस्यतयाप्रतीयमानत्वात्मिथ्येतिहित्वोपेक्ष्यनिजात्मानंपरमार्थसत्यंधर्मिण
मुपाश्रितोस्मितत्रैवबुद्धिस्थेयंप्राप्तोस्मीत्यर्थः॥५७॥अध्यस्तत्वमेवदर्शयति॥श्लोका।
स्वतःप्रकाशादिहधर्मिणोन्यज्जुडंप्रकारःपरिभासतेहि॥तमेवभ्रांत्यनुभातिसर्वमिमा

दिवेदोर्थमिमंब्रवीति॥२८॥एकोहि शब्दोनिश्चयार्थोन्यः पादपूरणार्थः॥सन्मात्रॉस्व
३५ तः प्राकाशात्मधर्मिणः जडंप्रकारः प्रतिभासतेपरितोदृश्यतेइहसंसारिनादशायां॥
स्वतश्चिद्रूपत्वाभावात्जडमित्युक्तं॥अन्यसिद्धिकत्वात्प्रकारत्वमुक्तं॥आत्मार्थेश्रुतिंप्रमा मु
णयति॥तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभाति॥अस्याश्रुतेरर्थः तंआधि
ष्ठानभूतंभांतंस्वप्रकाशमनुपश्यात्सर्वंकल्पितंआधिष्ठानविलक्षणंमायातत्कार्य
रूपंभातिभासतेभासमानसमयेचनस्वतोभातिकिंतुतस्यचैतन्यस्यभासाप्रकाशेनसर्व ३५
मिदंविभातीत्यर्थः॥अनुभातीयनेनप्रकारत्वमुक्तं तस्यभासाविभातीयनेनजडत्वमुक्तमि
तिभावः॥२८॥एतदेवसदृष्टांतमाह॥श्लोक॥जडंनसन्नापिचचित्स्वरूपंपरस्यसत्ता स्फुरणे

---

नभातिं॥अतःप्रकारत्वमुपरिनंतरश्लोकेयथालोकभुजंगमादेः॥४७॥जडंनसन्नापिचचि
त्स्वरूपंअत्रहेतुमाह॥परस्येति॥अधिष्ठानस्येत्यर्थः अतोऽज्ञानतत्कार्यस्यप्रकारत्वमुक्तंश्रु
तियुक्तिभ्यामित्यर्थः॥तत्रदृष्टांतमाह॥रज्ज्वादिति॥४९॥प्रकारोमतिक्रममाह॥अहोहि
मायाबलमेतदुच्चैःसद्धर्मिणंभ्रांतमपिस्वतस्तं॥आच्छाद्यविक्षिप्यचपंचभूतकार्यप्र
कारंजनयेत्तथान्यत्॥५०॥अहोइतिविस्मयेहिनिश्चयेमायामूलाज्ञानंतस्यबलंसा
मर्थ्यंएतत्महदुच्चैर्ब्रह्मादिभिरप्यनुल्लंघनीयं॥किंनरित्यतआह॥स्वतोभ्रांतंस्व ६
प्रकाशंसद्धर्मिणंआच्छाद्यअंधकारवद्गर्भागारंचेत्यपरंस्वयंविक्षिप्यविक्षेपशा
क्तिंप्राप्यपूर्वसंस्कारजीवकर्मप्रयुक्तासतीशब्दस्पर्शरूपरसगंधात्मकान्या

३५ काशवायुतेजोजलपृथिव्याख्यानिपंचभूतानितत्कार्येस्थूलदेहादिरूपंतत्
प्रकारंजनयेदुत्पादयेदित्यर्थः॥ एतदुपलक्षणंमहदहंकारादीनां॥ तथान्यत्प्राव
हारिकाकाशादीत्यर्थः॥ तत्प्रातिभासिकंरज्जुसर्पादिरज्ववाद्यज्ञानचैतन्यमाश्रायत
त्रसर्पादिकंस्वीयविक्षेपशक्त्याजनयेदित्यर्थः॥ आगंतुकदोषजन्यंप्रातिभासिकंप्रा
तीतिकमितिपर्यायः॥ तदन्यत्प्रावहारिकमितितल्लक्षणादित्यर्थः॥ ५०॥ प्रकारस्वरूप ३५ः
माह॥ श्लोक॥ अयंप्रकारःसदसद्भिलक्षणःस्त्रीपुंनपुंसकःशब्दाप्रकारःख
लुसद्भिलक्षणोदुःखान्नतांतामतयान्नतीतेः॥ ५१॥ अयमनुभूयमानःप्रकारःसच्चेदुक्त्य
स्तर्हिनश्यति॥ नासतोविद्यतेभावइतिस्मृतेरतःसद्भिलक्षणः॥ असच्चेदुक्त्यस्तर्हिप्राति

प्रातिस्वंध्यापुत्रवदसदनुभयविलक्षणस्तन्नदृष्टांतःस्पष्टः तथाचसदसद्भिलक्षणो
नामअनिर्वचनीयःप्रकारइतिफलितोर्थः॥ असद्भिलक्षणमित्यत्रकेसत्यतिव्याप्तिरतउक्तं
सद्भिलक्षणमितितावत्युक्तेसत्यतिव्याप्तिरतउक्तमसद्भिलक्षणमितिअभ्युपेत्योक्तमु
सतोनिःस्वरूपेतिव्याप्तेःशंकानवकाशात्सन्नामकिंचिदस्तिचेत्असत्वव्यावर्तनाप
स्तिचेत्कुत्रातिव्याप्तिरित्यसदसद्भिलक्षणांतरमाह॥ यद्वेति॥ सद्भिलक्षत्वमनिर्वचनीयत्वं ण
कुतोदुःखान्नतांतामतयान्नतीतेः॥ सत्यज्ञानानंदानंतब्रह्मतद्भिलक्षणत्वेनानुभूयमा
नत्वासद्भिलक्षणत्वमनिर्वचनीयत्वंमायातत्कार्यस्येत्यर्थः॥ ननुतर्हिकथमाचार्योक्तिः॥
सदसद्भ्यामनिर्वचनीयमितिचेन्नप्रथमतःशिष्यबुद्धिव्युत्पादनमात्रतात्पर्यादाचार्याणामिति

३६ ॥कालत्रयावाध्यत्वंसत्वंतद्भिन्नमनिर्वचनीयमित्यर्थः॥५१॥यत्पूर्वमुक्तंसद्धर्मिणंसत्तुअ
ह्मधर्मिणमाछादयतीतितत्रविशेषमाह॥श्लोक॥सत्तास्फुरत्तापरमात्मनोज्ञानाछाद्यतेसा
ह्युपजीव्यभावात्॥आनंदमाछाद्यतीवमायात्तन्नाशनेत्वमसीतिवाक्यं॥५२॥सच्चिदानंदब्र
ह्मत्वंसदंशचिदंशोचिदंशोचमायामूलाज्ञानंनाछादयतिकुतःस्वस्योपजीव्यभावात्उपजीव्य
त्वात्सदंशचिदंशयोःस्वोपजीवकत्वेनतयोराछादनेअज्ञानस्यैवसिद्धिर्नस्यात्अहमज्ञोमा
महंनजानामीत्यज्ञानसिद्धिःसाक्षिणैवानन्यगतिकत्वात्प्रमाणेरज्ञानसिद्धिरित्येवाच्यात
र्हित्वन्निवर्तकंकिमपिनस्यात्तस्मात्केवलसाक्षिभास्यमज्ञानंस्वोपजीव्यसच्चिदंशौनावरणुते २६
किंतर्हितदाहआनंदमाछादयतीवसम्यगविचारित्वादिवशब्दप्रयोगः॥तन्नाशनेआ

नंदांशाछादननिवृत्तौ॥तत्वमस्यादिवाक्यंसमर्थमित्यध्याहारः॥वाक्यविचारजन्यतत्व
ज्ञानेनाज्ञाननिवृत्तौस्वप्रकाशानंदाविर्भावःस्वतएवेत्यर्थः॥तदुक्तमाचार्यैः॥प्रत्यग्बोधो
यआभातिसोऽद्वयानंदलक्षणः॥अद्वयानंदबोधैक्यप्रत्यक्बोधैकलक्षणः॥इ ३६
त्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदाभवेत्॥अत्रह्मत्वंतमर्थस्यव्यावर्त्तेननदैवहि"त
दर्थस्यचपरोह्यंयत्वेवंकिंतनश्रृणु॥पूर्णानंदैकरूपेणप्रत्यक्बोधोवतिष्ठतइति॥
अतउक्तंतन्नाशनेत्वमसीतिवाक्यं॥५२॥अखंडस्वरूपत्वेपिअंशाछादनेदृष्टांतमा
ह॥श्लोक॥यथाहिमांशुःखलुतेजसोयंप्रकाशकत्वान्नहित्तत्प्रकाशं॥उपाधिराछा
दयतीतिदृष्टंतदुष्णतांशुःपिहितोनुभूयते॥५३॥प्रकाशोष्णत्वेतेजःस्वरूपमखंडंतत्तेजः

ऊर्ध्वचंद्रमंडलेप्रतिफलितंयदाभवतितदोपाधिचंद्रमंडलमुपहितस्यतेजसउष्ण
त्वमाछादयतिनप्रकाशंयथातथाअज्ञानंसदंशंचिदंशंनाछादयतिकिंत्वानंदांशमि
त्यर्थः॥५३॥आवरणविक्षेपशक्तीलक्षयति॥तत्रसंगाद्विद्यामपिलक्षयति॥श्लोक०
आविर्भावोत्पादकंयत्स्वरूपस्यैषाविद्यायतिरोधानमन्या॥विद्याविद्येतेचजीवाश्रि
तेस्तोनेशयेतेतस्यसर्वज्ञतायाः॥५४॥स्वरूपस्ययदाविर्भावोत्पादकंसाविद्यायत्स्व
रूपस्यतिरोधानंसाऽन्याआवरणशक्तिरविद्येत्यर्थः॥तेचविद्याविद्येजीवाश्रितेने
शयेतेईश्वरनिष्ठेनसःस्तस्योपाधेःशुद्धसत्वप्राधान्येनयद्यमाणस्यविक्षेपशक्त्याख्य ३७
मायारूपस्यसर्वकल्पनाधिष्ठानत्वेनसर्वानुस्यूतत्वात्दीपवत्स्वसंबद्धसर्वोपा

विद्या

सकत्वेनचसर्वज्ञत्वाद्धेतोरिश्वरः॥जीवोपाधेरविद्यायाः मलिनसत्वप्राधान्येनत्त
सर्वज्ञत्वमतोऽवीद्ये द्वेअपिजीवाश्रितेएवेतिभावः॥५५॥विक्षेपशक्तिंलक्षयति॥श्लोक०
कार्योन्मुखीयादियासमर्थास्तिशक्तिर्विष्णोर्ज्ञेयानामविक्षेपशक्तिः॥प्राहुर्वेदःप्राहशक्तिर्द्वयंतत्स
र्वानर्थप्राप्तिबीजंनराणां॥५५॥विक्षेपशक्तिर्लिंगादिब्रह्मांडांतंजगत्सृजेदियाचार्योक्तेः॥आ
वरणविक्षेपशक्तिद्वयंनस्वकपोलकल्पितेकिंतु श्रुतिमुखंनात्रोद्वाप्रामाण्याशंकाकार्येत्य
भिप्रायः॥तथाचश्रुतिः॥नतंविदाथयइमाजजानान्यद्युष्माकमंतरंबभूव॥नीहारेण
प्रावृताजल्प्याचासुतपऽउक्थशासश्चरंतीति॥इमाःप्रजाःयोजजानउत्पादयांबभूवे
त्यनेनविक्षेपशक्तिरुक्तानतंविदाथइतिश्रुतिभागेनावरणशक्तिर्जीवनिष्ठेरुक्ता॥प्र

३८ जाजननसामर्थ्यादीशस्यसर्वज्ञत्वमर्थसिद्धंनह्यसर्वज्ञोविचित्रप्रपंचंजनयेदित्यर्थः
॥५५॥एवंज्ञानंसमस्तंखलुधर्मिमात्रेइत्याद्यारभ्यकार्योत्पादइत्यंतैः श्लोकैःधर्मिब्रह्मे
वसत्यंतप्रपंचः प्रकारिभूतोऽनिर्वचनीयत्वादप्रामाणिकइतितत्पदार्थशोधनम
नेनप्रकारेणोक्तमधुनाप्रकारांतरेणतदेवो[illegible]च्यते॥श्लोकाभयंद्वितीयाद्वयनी
तिवेदस्तथाभयंवैजनकेतिवेदः॥श्रुत्योर्विरोधेसमुपस्थितेहिपूर्वश्रुतेर्बाधमुदीरयामि॥ ३८
५६॥द्वितीयाद्वैभयंभवतीतिएकाबृहदारण्यकश्रुतिर्द्वितीयाऽभयंवैजनकप्राप्तो
सीतितत्रैवतयोरुभयोःश्रुत्योरिदमर्थः शेषंस्पष्टं॥५६॥बाधप्रकारमाह॥त्रिभिःश्लोकैः

श्लोकः॥ब्रह्मैवसर्वंजगदित्यत्रैकाह्यात्मैवसर्वश्रुतिराह चान्या॥यएषसर्पस्तवर
जुरेषायथातथावस्तुनिरूपणंतत्॥५७॥ब्रह्मातिरिक्तंनहिभातिकिंचित्प्रतीयतेवा
क्यविचारणेन॥तथानुभूतिश्चसमाधिकालेस्वात्मातिरिक्तंनहिभातिकिंचित्॥५८॥
भौ स्पष्टौश्लोकौ॥प्रतीयतेवाक्यविचारणेनेत्यंशंतत्रवाक्यार्थमाह॥ब्रह्मैववेदमित्यादि॥
ब्रह्मैवेदमितिहिवाक्यमुदितंवेदेतदर्थस्वयंसामानाधिकरण्यमत्रगदितंवाचेमाहासूरिभिः
॥मुख्यार्थानुपपत्तिहेतुकनयागत्यंतरादर्शनाद्याःसर्पस्तवरज्वंशुमिवतद्दृष्टांतवाक्ये
ष्वपि॥५८॥ब्रह्मैवेदमिदं सर्वमितिवाक्येब्रह्मपदसर्वपदयोःसामानाधिकरण्यंएकवि
भक्तिकत्वेसतिभिन्नप्रवृत्तिनिमित्तानांशब्दानामेकस्मिन्नर्थेवृत्तिःसामानाधिकरण्यंतत्

३७ मुख्यार्थानुपपत्तिहेतुकत्वाज्जडाजडयोरैक्यायोगान्मुख्यार्थासंभवान्गत्यंतरादर्शना
त्सर्पस्तद्रज्जुखंडमितिवत्बाधोसामानाधिकरण्यंयथातथाब्रह्मैवदमित्यादिवेदां
तवाक्येष्वपीत्यर्थः॥ननुनीलोत्पलमितिवत्सामानाधिकरण्यंमत्वघटइतिवद्वासामा
नाधिकरण्यमत्राप्यस्त्वित्यतआह॥गत्यंतरादर्शनादिति॥जडाजडयोर्ब्रह्मसर्वयोर्गु
णगुणित्वासंभवान्नीलोत्पलमितिवन्नसामानाधिकरण्यंनापिमद्घटइतिवत्ब्रह्मणो
निरंशत्वेनविकाराभावान्तस्माद्बाधायामेवसामानाधिकरण्ययुक्तमित्यर्थः॥तथा ३७
चद्वितीयत्वबाधितत्वाद्द्वितीयाद्वैभयंभवतीतिश्रुतेःपारमार्थिकंश्रुत्याबाधइतिभाव
॥५९॥एवंश्रुतिप्रामाण्येनबाधित्वमुक्तंतत्रानुकूलमनुमानमाह॥यदज्ञानतोयत्सतु



त्यधीनेतन्मृषावस्तुतज्ज्ञानतस्तस्यबाधः॥इतिव्याप्तितोब्रह्मणोन्यत्समस्तंजगद्बाधि
तंरज्जुसर्पेणतुल्यं॥६०॥अनुमानप्रयोगः॥विमतंजगत्बाधितंअधिष्ठानज्ञानादुत्पन्नत्वे
सतितज्ज्ञानबाध्यत्वात्यद्यदधिष्ठानज्ञानादुत्पद्यतेतत्तदधिष्ठानज्ञानान्बाधितं॥यथा
रज्जुसर्पः॥तदुक्तमाचार्यैः॥तावत्सत्यंजगद्भातिशुक्तिकारजतंयथा॥यावन्नज्ञायतेब्रह्म
सर्वाधिष्ठानमव्ययमिति॥६॥अत्रार्थेस्वानुभवंप्रमाणयति॥ब्रह्मज्ञानंस्वानुभूत्याममासीत्त
स्माज्जातंदृश्यजातंसमस्तं॥ब्रह्मज्ञानात्स्वानुभूत्यासमस्तंब्रह्मण्येतद्बाधितंमेविभाति॥६१॥
जीवस्यानादित्वान्ममासीदित्युक्तं॥तदुक्तंसांप्रदायिकैः॥जीवईशोविशुद्धाचित्तथाजीवेश
योर्भिदा॥अविद्याप्रतिबिंबितोयोंगःसदुस्माकमनादयइति॥६१॥ननुजगद्बाधितंमेविभातीं

४० युक्तं॥ तत्र शुक्तिज्ञानेकल्पितरजतानवभासवज्जागदनवभासएवास्त्वित्यत्राह॥ श्लोक॥
उपाधिनाशेनविनाचास्यसोपाधिकत्वात्प्रतिभासनाशः॥ उपाधिनाशःखलुकर्मनाशात्तो
ऽप्यसर्वप्रतिभासनाशः॥ ध॥ विपर्ययोमिथ्याज्ञानंअतस्मिंस्तद्बुद्धिरितियावत्॥ सचद्विविधःसोपा
धिकोनिरुपाधिकश्च॥ तत्रनिरुपाधिकोद्विविधः बाह्याभ्यंतरश्च॥ तत्रबाह्यःशुक्तौरजतमि
त्यादिः॥ अहमज्ञोब्रह्मनजानामीत्यादिराभ्यंतरः॥ सोपाधिकोपिद्विविधः पूर्ववत्तत्रलोहितस्फ
टिकइत्यादिर्बाह्यः॥ आकाशादिप्रपंचोपिबाह्यः सोपाधिकःकर्माविद्याकार्यत्वात्तत्त्वेज्ञानि
नोपिनिवर्त्तेयज्ञानेप्रारब्धक्षयपर्यंतंप्रपंचोपलब्धिदर्शनाच्च॥ कर्त्तृत्वादिभ्रमआभ्यंतरः सोपा
धिकइतिएवंस्थितौप्रकृतेप्रपंचस्यसोपाधिकत्वेनउपाधिनाशंविनाप्रतिभासनाशोनभव

ति॥ उपाधिनाशोपिकुतोनेत्यतआह॥ कर्मनाशात्भोगेनप्रारब्धकर्मनाशात्क्षयात्उपाधिनाशो
भवतिततश्चास्यजीवन्मुक्तस्यबाधितंजगत्प्रतिभासनाशइत्यर्थः॥ तथाचबाधितंमेविभातीत्यं
क्तंयुक्तमेवेतिभावः॥ सांप्रदायिकैरप्युक्तं॥ शास्त्रेणनश्येत्परमार्थसत्वंकार्यक्षमंनश्यति चा
परोक्षात्॥ प्रारब्धनाशात्प्रतिभासनाशएवंत्रिधानश्यतिचात्मभावेति॥ लोहितःस्फटिकइ
त्यादिलौकिकेपिभ्रमेस्फटिकस्वभ्रमाणांतरेणशुक्लत्वेज्ञानेपिउपाधेर्जपाकुसुमस्ययावत्सा
न्निध्यंतावत्तल्लोहित्यंभासतेसोपाधिकभ्रमत्वात्तद्वत्प्रकृतेपीतिभावः॥ ध२॥ श्रुतोर्थापत्तिप्र
माणादपिजगन्बाधितमित्याह॥ श्लोक॥ बाधस्यार्थापत्तेोदृश्यजातंब्रह्मण्येतत्कल्पितंक
ल्पयामः॥ नायंसर्पोबाधएवंहिलोकेवेदेतावन्नेहनानेतिबाधः॥ ध३॥ नेहनानास्तिकिंचनेति

४१ श्रुतौबाधः श्रूयतेनतथानेतिनेतीतिवाधोपिश्रूयतेतद्व्यथानुपपत्याजगत्कल्पितंदृष्टिकल्प
यामइत्यर्थः॥६२॥बाधलक्षणमाह॥सोपाधिकंवानिरुपाधिकंवापूर्वंप्रतीतंयदिहास्तिनस्य॥
ज्ञानांतरासत्वतयाप्रतीतिःसबाधइत्युक्तइहप्रवीणैः॥६३॥तथोक्तरीत्यासोपाधिकंनिरूपाधि
कंवायत्पूर्वंप्रतीतंइहव्यवहारभूमौयदस्तितस्यप्रमाणजन्यज्ञानांतरेणासत्वप्रतीतिर्वा
धइहवाधनिरूपणेप्रवीणैर्वाधइतिउक्तइत्यर्थः॥तथाचश्रुतिः॥तथाविद्वान्नामरूपाद्विमुक्तः
परात्परंपुरुषमुपैतिदिव्यं॥इतिश्रुतेः॥यथोक्तबाधलक्षणंश्रुतिमूलंनेदंस्वकपोलकल्पितामि ४१
तिभावः॥६४॥प्रपंचमिथ्यात्वंचनस्वीक्रियतेतर्हिप्रपंचसत्यवादिनःपूर्वमीमांसकादीन्प्र
तिबाधकमाह॥श्लोक॥सत्यंज्ञानमनंतपूर्णमनिदानंदंपरंकेवलंसत्शुद्धंगुणविक्रियादिर

हितंब्रह्मेतिचिन्नंयदा॥शुद्धंवेदविदांतदैवविदितोमिथ्याप्रपंचस्वयंसत्यत्वेह्युभयोर्नल
क्षणमिदंव्यावर्तकाभावतः६५॥इतिब्रह्मणःचिन्नंस्वरूपलक्षणंवेदविदायदाविदितंतदै
वतस्मिन्नेवकालेप्रपंचोमिथ्येतिविदितइतिसंबंधः॥ईदृशीतिकथंतदाह॥सत्यंकालत्रये
बाधाभावोपलक्षितस्वरूपंज्ञानंज्ञप्तिस्वरूपंअनंतंत्रिविधपरिछेदशून्यं॥तदुक्तं॥नव्या
प्तित्वादेशतोंतोनित्यत्वान्नापिकालतः॥नवस्तुतोपिसर्वात्मत्वादानंत्यंब्रह्मणस्त्रिधेति॥अ
निदंतादृगिदंईदृगिदमितिव्यवहारायोग्यंअनिदंचनदानंदंचेतिदंद्वैकवेद्यभावः॥परंउत्कृष्टं
अतएवकेवलमेकंसत्सन्मात्रंशुद्धंनिर्मलंअविद्यामलरहितंअतएवगुणविक्रिया
दिरहितंगुणाःसत्वरजस्तमांसिक्रियापरिणामआदिपदात्परिस्पंदरागैःरहितंविरहि

 तं ब्रह्मेति लक्षणं ज्ञातं तदैव प्रपंचमिथ्यात्वं सिद्धमित्यर्थः॥ कथं सिद्धं तदाह॥ उभयोर्ब्रह्मप्रपंचयोः सत्यत्वे ब्रह्मलक्षणस्य व्यावर्त्तकाभावात् ब्रह्मलक्षणमसिद्धं स्यादुक्तमतप्रलापता च स्यात् तच्चानिष्टमतो लक्षणसिद्ध्यन्यथानुपपत्या प्रपंचमिथ्यात्वं सिध्यतीत्यर्थः॥ सत्यादिपदैः परमार्थलक्षणत्वपूर्णत्वादिषु बोधितेषु सत्स्वर्थात् अन्यतज्जडपरिच्छिन्नत्वादिव्यावृत्तिः प्रतीयतेयश्चार्थादर्थो न सचोदनार्थइतिन्यायात्॥ अस्यार्थः यश्चार्थात् अर्थापत्तिप्रमाणात् अर्थः सिध्यति न सचोदनार्थो न शास्त्रैकार्थ इति न्यायार्थः॥ यथाचध्येनमुषकादिनादूषितांभूमिमुपलभ्यतद्बोधिनोघातकस्य मार्जारादेरभावोर्थादवगम्यतेतथासत्यादिपदात्पदार्थपरमार्थत्वादिकं प्रतीयते

---

स्यपूर्वप्रतीतस्यपरमार्थविरोधिनोऽसत्यत्वादेरभावोर्थापत्त्याज्ञायतेनहिसत्यादेरसत्यत्वादेश्चैकाधिकरण्यंघटतेतेनमानांतरसिद्धत्वादन्यव्यावर्तकशब्दार्थइति" न्यायाभिप्रायः॥ तथाचोक्तंवार्तिके॥ प्रतिपद्यपदार्थंहिविरोधान्नहिरोधिनः॥ पश्चादभावंजानातिबध्यघातकवत्पदादिति॥ तथाचान्यव्यावर्त्तकाभावात्सत्यादिब्रह्मलक्षणंनसिध्येत्ततः प्रपंचमिथ्यात्वमवश्यंस्वीकार्यमितिभावः"ब्रह्मणः सत्यज्ञानानंदाः स्वरूपलक्षणंस्वरूपंसत्व्यावर्तकंस्वरूपलक्षणंयथारवंछिद्रंवाआपइत्यादिस्वरूपलक्षणंस्वरूपंसत्इतरेभ्योव्यावर्तकत्वात्॥ तथासत्यज्ञानानंदाः ब्रह्मणःस्वरूपलक्षणं॥ ननुलक्ष्यलक्षणभावस्यभेदगर्भत्वात्" ब्रह्मणोऽखंडैकरसत्वेनकथंसत्यादेर्लक्षणत्वमितिचेन्न॥ कात्मनिकभेदाभ्युपगमे

नतदुपपत्तेः॥तदुक्तं॥आनंदोऽनुभवोनित्यत्वंचेतिसंतिधर्माःब्रह्मणो॥एवंक्वेपिपथगवभासंतइति॥नचाएवंक्वेतेषांएवंक्वावभासःकिंप्रयुक्तइतिवाच्यं॥अंतःकरणधर्मोपाधिवशात्एवंगवभासोपपत्तेः॥तथाहि॥बाधाभावविशिष्टंसत्यंवस्तुवछिन्नंचैतन्यंज्ञानं रसादिवस्तुवछिन्नंचैतन्यमानंदः॥[illegible]॥यद्वाव्यंजकवत्क्वेपहितंज्ञानं॥अनुकूलवत्क्वेपहितंचैतन्यमानंदः॥ततस्तेषांब्रह्मणश्चवास्तवभेदाभावेप्यौपाधिकभेदसत्वात् लक्ष्यलक्षणभावउपपद्यते॥एवंचसत्यंब्रह्मेत्यत्रैनैयायिकाभिमतसत्तासामान्येऽतिव्याप्तिर्लक्ष्यस्यब्रह्मणोजडत्वापत्तिश्चअतउक्तं ज्ञानमिति॥ज्ञानंब्रह्मेत्यत्रैकेपराभिमतात्मसमवेतज्ञानेतिव्याप्तिर्लक्ष्यस्यब्रह्मणोऽनित्यत्वादपुरुषार्थत्वप्रसंगश्च॥तन्निरसनायोक्तं ६३

मानंदमिति॥नचैवमपुरुषार्थत्वाभावेपिब्रह्मणोऽनित्यत्वंदुष्परिहरमितिवाच्यं॥सत्येतिविशेषणेनतत्परिहारसंभावात्॥आनंदोब्रह्मेत्यत्रैकेविषयस्करोतिव्याप्तिर्लक्ष्यस्य जडत्वप्रसंगश्चतन्निवारणायज्ञानमित्यत्रैकेलक्ष्यस्यानित्यत्वपरिहारायसत्यमित्यत्रैकेनप्रतिपाद्यतेतत्रैकथमखंडैकरसत्वमितिचेन्नैवं॥सत्यंज्ञानमनंतंब्रह्म॥आनंदोब्रह्मेतिव्यजानात्॥विज्ञानमानंदंब्रह्मेति॥एवमादिवाक्येषुसत्यज्ञानानंदादिशब्दानांसामानाधिकरण्येनाखंडैकरसानंदब्रह्मबोधकतयागुणगुणिभावकल्पनायामानाभावात्॥नचतेषामेकार्थप्रतिपादकत्वेसत्यादिपदानांपर्यायतापत्तिरितिवाच्यंप्रवृत्तिनि

स्यानु

भित्तभेदात्व्यावृत्तिनिमित्तभेदाच्चनोक्तदोषावकाशः॥पर्यायोनामानेकेषांशब्दानांय
त्रप्रवृत्तिनिमित्तमेकंतेपर्यायशब्दाः॥यथाब्राह्मणविप्राद्याः शब्दाःपर्यायाः॥एकस्यैव
शब्दस्ययत्रप्रवृत्तिनिमित्तभेदस्तेशब्दानानार्थाःयथाहरिगोत्रप्रमुखाइतिविवेकः॥नचै
धरते॥ वमपिलोकेवाक्यस्यसंसर्गविशिष्टान्यतरप्रतिपादकत्वदर्शनेनकथमखंडप्रतिपादक
त्वमितिचेन्नचटःसन्द्रव्यंपृथिवीप्रकृष्टप्रकाशश्चंद्रमाइत्यादिवाक्यानांलोकेपिलक्ष्य
णयाअखंडवस्तुप्रतिपादकत्वदर्शनेनप्रकृतेपितत्संभवात्॥तत्रतावत्विशिष्टशक्ता
नांपदानामखंडचैतन्यैभागलक्षणातथासत्यत्यादिपदानिअखंडैकरसानंदव्यक्तिंबो ७७
धयंतिनचैकपदेनतद्बोधसंभवेपदांतरवैयर्थ्यमितिवाच्यं॥पदस्यस्मारकत्वेनवा

क्यस्यैवानुभावकत्वात्पदांतरसार्थक्यं॥अत्रब्रह्मेतिलक्ष्यपदं॥शेषाणिसत्यादीनितल्ल
क्षणसमर्पकाणिएतेषांचपदानांब्रह्मपदेनप्रत्येकंप्रथमंसत्यंब्रह्मज्ञानंब्रह्मअनंतंब्रह्मआ
नंदंब्रह्मैवमुचितानांपश्चात्सामानाधिकरण्येनपरस्परमपिसंबंधसिद्धिः॥यथा
अरुणयापिंगाक्ष्यागवैकहायिन्यासोमंक्रीणातीयत्रक्रयवाचिपदानांपरस्पर
मन्वयस्तथात्रापीतिबोध्यं॥एवंवेदविदायथोक्तमार्गेणयदाब्रह्मलक्षणंबु
द्धंतदैवप्रपंचमिथ्यात्वसिद्धिःसंपन्नेति॥अतःपरिछेदोनविद्यतेयस्यतदनंतं॥त्रि
विधपरिछेदशून्यमित्यर्थः॥तदुक्तं॥नव्यापित्वाद्देशतोनित्यत्वान्नापिकालतः॥
॥नवस्तुतोपिसार्वात्म्यादानंदंब्रह्मणस्त्रिधेति॥६५॥नाविकोन्यथाभावःपरिणा

६५ मः॥ अतात्त्विकोन्यथाभावोविवर्त्तइति॥ परिणामविवर्त्तयोः केषांचिल्लक्षणंएवंचप्र
कृतेप्रपंचेविवर्तलक्षणसद्भावात्प्रपंचस्यविवर्तत्वंदर्शयति॥ श्लोक॥ यथारज्जुर
ज्ञेन्यथाभातिपुंसांयथावस्त्वविज्ञानतस्तद्वदेव॥ यथावस्त्वविज्ञाननोज्ञानिरेषान्य
थाभातितस्याविवर्त्तःप्रपंचः॥ ६६॥ ज्ञानिश्चैतन्यचिद्विवर्त्तःप्रपंचइत्यर्थः॥ शेषंस्पष्टं॥
६६॥ अथब्रह्मणोऽभिन्ननिमित्तोपादानत्वंदर्शयन्प्रपंचस्यतद्विवर्तत्वंदर्शयति॥
श्लोक॥ यतोवाइमानीतिवेदोक्तरीत्याजगत्कारणंब्रह्मकार्यप्रपंचः॥ लयस्यश्रुतेः ६५
कार्यमात्रस्यतस्मिन्नुपादानताब्रह्मणोन्यायतश्च॥ ६७॥ यतोवाइमानिभूतानिजा ६

यंतेयेनजातानिजीवतियत्प्रयंत्यभिसंविशंतितद्विजिज्ञासस्वतद्ब्रह्मेतिश्रुतु
रीयाब्रह्मजगत्कारणंतत्कार्यप्रपंचः॥ जगत्कारणंब्रह्मेत्युक्तमनेननिमित्तकारणत्व
मात्रंप्रतीयतेनोपादानत्वमतआह॥ लयस्यश्रुतेरिति॥ यत्प्रयंत्यभिसंविशंतीतिश्रु
तिभागेनउपादानकारणत्वमपिसिद्धंन्यायतोयुक्तितश्चउपादानकारणत्वंत
त्सिद्धमित्यर्थः॥ नहिकुलालोनिमित्तकारणेघटादेर्लयोदृष्टस्तस्माल्लयश्रवणान्यथा
नुपपत्याब्रह्माभिन्ननिमित्तोपादानमित्यर्थः॥ ६७॥ ननुब्रह्मचेदभिन्ननिमित्तोपादानंत
र्हिब्रह्मणश्चिद्रूपत्वान्नतोजायमानंकार्यमपिचिद्रूपंस्यान्नतुनदृश्यते ;तोनोपादान
कारणत्वमित्यतआह॥ श्लोक॥ विलक्षणात्ब्रह्मणएवकार्यविलक्षणंजायतएव

 सर्वं॥ स्वप्नप्रपंचेपरिदृष्टमेतदतोविवर्त्तःसकलःप्रपंचः॥ ६७॥ विलक्षणादेवचिद्रूपादेवब्रह्मणोविलक्षणमेवजडरूपमेवकार्यंजायते"इदंकदृष्टमित्यतआह स्वप्नइति" चिद्रूपाज्जीवचैतन्यात्तुविलक्षणात्स्वप्नप्रपंचोगजतुरगादिर्जडरूपोविलक्षणोविवर्त्तोदृष्टस्तदुक्तेपीत्यर्थः॥ आत्मनिचैवंविचित्राश्चहीतिसूत्रेणभगवतावादरायणाचार्येणजीवचैतन्यस्यस्वप्नप्रपंचोपादानत्वमुक्तं॥ नचजीवचैतन्यस्यस्वप्नप्रपंचोपादानत्वेऽहंगजइत्यादिप्रतीतिःस्यादितिवाच्यं" स्वप्नश्चभ्रमस्तावज्जागत्संस्कारजःक्षयनुभवसिद्धः॥ संस्कारस्तुयादृशोनुभवस्तादृशएवयथाहंग ६८
जइत्यनुभवःस्यान्नत्वहंगजइतिसंस्कारजन्यःस्यान्नतुतादृशोनुभवोनतो

हंगजइतिस्वप्नप्रत्ययः॥ तस्माद्यथास्वप्नप्रपंचःजीवचैतन्यविवर्तस्तथाविलक्षणोबाह्यप्रपंचोविलक्षणब्रह्मचैतन्यविवर्त्तइतिसिद्धं॥ यतोवाइमानीतिश्रुत्यायज्जगत्कारणत्वमुक्तमिदमेवब्रह्मणस्तटस्थलक्षणं॥ कादाचित्कत्वेसतिव्यावर्त्तकत्वंतटस्थलक्षणमुपलक्षणमित्युच्यते॥ यथाकाकवंतोदेवदत्तगृहाइतिदेवदत्तगृहलक्षणंतटस्थलक्षणंदेवदत्तगृहेकाकवत्यस्यकादाचित्कत्वंतेइतरगृहेभ्योव्यावर्त्तकत्वंच एवंसृष्टिस्थितिप्रलयकारणत्वंब्रह्मणस्तटस्थलक्षणं॥ सृष्टिस्थितिप्रलयकारणत्वस्यकादाचित्कत्वात्॥ कादाचित्कत्वात्सजातीयाज्जीवाद्विजातीयाच्चेतनाच्चव्यावर्त्तकत्वात्तटस्थलक्षणमिदं सृष्टिस्थितिप्रलयकारणत्वे॥ सृष्टिरुत्पत्तिःस्थिति

४७ : पालनंकारणेकार्येस्यसूक्ष्मरूपेणव स्थानंलयः॥ लयकारणत्वमिलक्षणेब्रह्मण
उपादानंकारणत्वमेवस्यात्लयकार्यंयत्रलीयतेतत्कार्यंप्रतितस्योपादानत्वानियमा
न्निमित्तकारणमन्यदेवस्यात्तथाचाद्वैतश्रुतिविरोधःस्यात्तदर्थमुक्तंस्थितीतिस्थि
तिलयकारणत्वमिलक्षणेउत्पत्तिकारणंदंडादिवन्निमित्तकारणंदेमन्यदेवस्यात्तथाच
पूर्वोक्तदोषस्तद्धाचदर्थमुक्तंसृष्टीति" सृष्टिस्थितिकारणत्वमिलक्षणेकुलालादि
वद्ब्रह्मणोनिमित्तकारणत्वमेवस्यादुपादानकारणमन्यदेवस्यात्तथाचसिद्धांतविरो ४७
धःअतउक्तंलयेतितदेवंसृष्टिस्थितिलयकारणत्वमिलक्षणाब्रह्मणोऽभिन्ननिमि
त्तोपादानत्वंसिद्ध्यति॥ एवंचप्रकृतिश्चप्रतिज्ञादृष्टांतानुपारोधादितिसिद्धांतोनवि

---

रुध्यतेतथाचलक्षणस्यायंनिष्कर्षः॥ जगत्कर्तृत्वेसतिजगदुपादानत्वंतटस्थलक्षणं
ब्रह्मणइतिअत्रापिजगदुपादानत्वंतटस्थलक्षणमिलक्षणेमायायामति व्याप्तिः॥मा
यावि शिष्टस्यजगदुपादानतयाविशेषणीभूतमायायाअप्युपादानत्वावश्यंभावात्का
र्यान्वितस्यैवविशेषणत्वात्मायांतुप्रकृतिंविद्यादित्यादिश्रुत्यामायाप्रधानत्वा
दगमाच्च॥ नत्रातिव्याप्तिवारणायजगत्कर्तृत्वेसतीलक्षणेलक्षणस्यत्रीणिदूषणा
निअव्याप्तिव्याप्यसंभवश्चात्रतिलक्ष्यैकदेशेलक्षणस्यावर्तनमव्याप्तिःअलक्ष्येलक्षणगमनमतिव्याप्तिः॥ लक्ष्येक्वाप्यवर्तनमसंभवस्तत्रश्चातिव्याप्तेरपिदूषण
त्वाद्विशेषणमर्थवत्कर्तृत्वंनामउपादानगोचरापरोक्षज्ञानचिकिर्षाकृतिम

लंतच्चचैतन्यस्यैवसंभवतीतिनमायायामतिव्याप्तिः॥ जगत्कर्त्तृत्वमिश्वरस्यैव्या
यकाभिमततरश्चेश्वरेतिव्याप्तिस्तस्यवेदांतासंमतत्वेनालक्ष्यत्वात्तद्व्यावृत्यर्थमु
त्तरंजगदुपादानत्वमितिपरमाणवोजगत्समवायिकारणमीश्वरोजगत्कर्त्तेतिजग
दुपादानजगत्कर्त्रोर्नैय्यायिकैर्भेदाभ्युपगमादस्मन्मतेऽभिन्ननिमित्तोपादानत्वांगीकाभिर
राच्चातिव्याप्तिः॥ ननुवेकस्योपादानत्वंकर्त्तृत्वंचविरुद्धंलोकेतथादर्शनात्॥ नहिघट
कर्त्ताकुलालोघटोपादानंघटोपादानभूतोमृत्पिंडोवाघटकर्त्तेतिकिंतुमृत्पिंडउपा
दानंकुलालकर्त्तैवमीश्वरोजगत्कर्त्तातदन्यदुपादानंअन्यथादृष्टविरोधापत्तेःदृष्ट ६८
पूर्वकत्वादृष्टकल्पनायाः॥ननुवयंनकल्पयामः॥तदैक्षतबहुस्यांप्रजायेयेतिश्रु

तिरेवंबोधयतीतिचेन्नदृष्टविरोधेश्रुतेरर्थांतरसंभवात्तस्मादभिन्ननिमित्तोपादा
नत्वमनुपपन्नमितिब्रूमः॥ तदैक्षतबहुस्यांप्रजायेयेत्यादिश्रुत्याबहुभवनका
मयितृत्वश्रवणात्चेतनस्यब्रह्मणएवोपादानत्वंजगत्कर्तृत्वंचावगम्यतेनचत
द्बाधितुंयुक्तंउपक्रमोपसंहारादिनात्पर्यलिंगैरद्वितीयेब्रह्मणिवेदांतनात्पर्येनिर्ण
तेसामान्यतोदृष्टानुमानेनश्रुत्यर्थबाधायोगात्श्रुतिविरोधेप्रमाणांतराणामाभा
सत्वात्॥ यद्यपिलोकेऽदर्शनादुपादाननिमित्तयोर्भेदोभ्युपेयतेइतितदसत्॥ ऊर्ण
नाभ्यादेरभिन्ननिमित्तोपादानस्यदृष्टत्वात्॥ यथोर्णनाभिःसृजतेगृह्णतेचेतिश्रुतेः॥
ऊर्णनाभिःस्वप्राधान्येननिमित्तंस्वोपाधिप्राधान्येनोपादानंचतथाब्रह्मस्वप्राधा

न्येननिमित्तंस्वमायोपाधिप्राधान्येनोपादानंतथाचप्रपंचोमायायाःपरिणामो ब्रह्मणोविवर्तइतिसिद्धं॥ ६८॥ किंचश्रुतिसिद्धंनामरूपातिरिक्तंप्रपंचस्यस्वरूपंनास्तीत्याह॥श्लोक॥ननामरूपादपरंस्वरूपंकार्यप्रपंचस्यहरेर्विचारात्॥मायेंद्रजालादिभिरस्यतौल्यंप्रतीयतेस्वानुभवेनसम्यक्॥६९॥हेरेश्वरस्यकार्यप्रपंचस्यविचारेक्रीयमाणेसतिनामरूपादपरंस्वरूपंनप्रतीयते॥नकेवलंश्रुतिप्रमाणात् किंतुसम्यक्आसंदिग्धाविपर्यस्तंचातेस्वानुभवेनापिनामरूपाभ्यांपरंमरूपंप्रतियन्नइत्यर्थः॥अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीतिश्रुतिंछांदोग्ये॥ ६७

तद्वेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेवव्याक्रियतइतिबृहदारण्यकेश्च॥तदुक्तमाचार्यैः॥अस्तिभातिप्रियंरूपंनामचेत्यंशपंचकं॥आद्यत्रयंब्रह्मरूपंजगद्रूपंततोद्वयमिति॥अतोहेतोर्मायेंद्रजालादिभिरस्यतौल्यंनुभवेत्यर्थः॥६९॥एवंजगद्रूपंनामरूपमात्रमुक्त्वाब्रह्मस्वरूपमाह॥श्लोक॥यस्मिन्नदोध्यस्ततयाविभातिह्यकुंसदेकंतुरमार्थवस्तु॥अंतर्बहिर्यन्नसदेकरूपंनांतर्बहिर्यस्यततोन्यदा र्नं॥७०॥यस्मिन्अदोजगत्यदायदाविभातिभासतेतदाअध्यस्ततयैवविभातिनस्वतःसत्तास्फुरणाभ्यामित्यर्थः॥अतएवोक्तंवार्तिके॥परमार्थमनालिंग्यदृश्यंविनतथंक्वचित्॥अतोध्यवितथंसर्वंपरमार्थैकनिष्ठितमिति॥यस्मिन्इदंविभातितत्व

५० रूपमाह॥ हि नि श्चयेन अलुप्तदृक् न लुप्ता दृक् दृष्टिर्यस्य तदित्यर्थः॥ नहि द्रष्टुर्दृष्टेर्विपरि
लोपो विद्यत इति श्रुतेः॥ चेत्यपरं अन्तर्बहिश्च शरीरान्तर्बहिश्च देहवत् दीपन्यायेन त्रिका
राकल्प्यदेकरूपमित्यर्थः॥ अतएव स्वेतरअव्यभिचारि रूपंयद्वस्तु तदेक रूपंसर्वस्मिन्न
पिकालेएकंरूपंनपरिणामीत्यर्थः॥ यस्य स्वतआकाशस्येवअंतर्बहिश्चविभागोना
स्तितत्परमार्थवस्तुत्रिकालाबाध्यं ब्रह्मततोन्यदानीबाधितमसत्यंदित्यर्थः॥ ७०॥
अध्यासलक्षणमाह॥ श्लोक॥ परस्मिन्परस्यावभासोत्रसद्विभेषाधीश्चिच्छां
तिरध्यासउक्तः॥ गुडस्निक्त इत्यादिकेयंप्रयोज्योहमस्रोनजानेदइत्यादिकेपि॥ ७१॥ ५०
परास्मिन्अधिष्ठानेपरस्यावभासोमिथ्याज्ञानंअध्यासउक्तः॥ अध्यासस्येवमप्रा

धीर्मिथ्याज्ञानंभ्रांतिरित्यादिपर्यायाःज्ञेयाः॥ तं स्फेलक्षणंवर्त्तयति॥ गुडस्निक्तइत्यादि
ना गुडेचिष्टानेस्निक्तस्यावभासोमिथ्याज्ञानंतथाअहमस्रोहमदोनजानेतत्राहंअ
स्मच्छब्दस्यावलंबनतयासाक्षीचिद्रूपः तस्मिन्अस्रत्वंमिथ्याज्ञानंअध्यासोज्ञेयः॥
अज्ञानावभासकेअस्रत्वप्रतीतिरयंकारणाध्यासोहमदोघटादिकंनजानेअ
यंकार्योध्यासः एवंप्रयोज्यइत्यर्थः॥ ७१॥ नन्वध्यासोगुडास्निक्तइत्यादिकेउ
क्तस्तन्नगुडस्निक्तयोः परस्पराध्यासस्तास्वीकार्यो ऽन्यथेतरप्रतीतिरेवन स्यात्तस्मा
त्परस्पराध्यासोंगीकर्त्तव्यइत्यागतंतथाच्चैतन्येप्रपंचोध्यस्तःप्रपंचेचैतन्यमिति
परस्पराध्यासेसंम्यक्ज्ञानेनाध्यस्तयोर्निवृतौशून्यवादःप्राप्तस्तन्नसमाधान

५१ माह ॥श्लोक॥ "सत्यानृतात्मंमिथुनंपरस्परंत्र्यध्यस्तमेतत्प्रतिभातिविभ्रमे" सम्य
क्प्रबोधादनृतस्यपीडनात्सत्यस्यशेषान्नहिशून्यतादृयोः॥७२॥ अस्तिभातिप्रि
यंरूपंनामचेत्यंशपंचकमिदंसत्यानृतात्मकंमिथुनंविभ्रांतीपरस्पराध्यस्तमे
तद्धिभाति॥तथाहिअस्तिघटोभातिघटःप्रियोघटइत्यादिव्यवहारेसत्तास्फुर
त्तात्प्रियताघटाद्यःपरस्पराध्यस्ततयाविभांतिसत्तायांघटःघटेसत्ताभानेघ
टोघटेचभानंप्रियतायांघटोघटेचप्रियतातत्रसत्तास्फूर्तेरप्रसिद्धेप्रियतातत्व ५१
नुकूलवेदनीयतारूपंपरस्पराध्यस्ततयैवभातिएकतराध्यासांगीकारेअपर
स्यस्फुरणंनस्यात्अतःपरस्पराध्यासोंगीकर्त्तव्यइत्यर्थः॥ननुपरस्पराध्यासांगी

---

कारेसम्यक्ज्ञानेनोभयस्यबाधेनशून्यवादःप्रसज्येतेत्यतआह॥सम्यक्प्रबो
धादिति॥अधिष्ठानसम्यक्ज्ञानेनानृतस्यबाधोयोग्यत्वात्सत्यस्यबाधायोग्य
त्वेनबाधायोग्यत्वात्सत्यस्यशेषान्नशून्यवादः॥यद्यभयमन्तंस्यात्तदाशून्य
वादोवक्तव्योनचैवं॥तथासतिसम्यक्ज्ञानेनानृतस्यैवबाधोनसत्यस्यतथाच
नशून्यवादइतिभावः॥७२॥पूर्वंनामरूपत्वात्पंचस्वमिथ्यात्वमुक्तंतदंतर्गत
क्रियायामिथ्यात्वंनोक्तमतस्तस्यापिमिथ्यात्वकथनायसप्रमाणंब्रह्मणोक्तम
र्थमाह॥श्लोक॥व्यवहरतिहीजीवोनामरूपक्रियाभिःसःपरिगणितसप्ता
न्नेषुमध्येत्रिभिस्तैः॥परिपतितोधश्चोर्ध्वंमायातितूर्णंभ्रमतिचय

५२ हुच्चास्मादिदंजालंकिमन्यत्॥ ७॥ बृहदारण्यकेसमानेंपेश्रूयते॥यत्स
मानानिमेधयातपसाजनयत्पिता॥एकमस्यसाधारणंद्वेदेवानभाजय
त्त्रीण्यात्मनेकुरुतपशुभ्यश्चैकंप्रायछदिति॥तत्रत्रीण्यात्मनेऽकुरुतेकर्म
तानिकानीतिस्वयमेवानुव्याख्यानेनदर्शयतिश्रुतिः॥मनोवोंप्राणस्त्रींस्मनेकुरु चं॰
तइतिअत्रमनःशब्देनरूपमुच्यतेवाक्शब्देनवागिंद्रियनिष्पाद्यंनामवाग्घ्रा न्या॰
णशब्देनक्रियायाःप्राणसाध्यत्वात्क्रियेत्युच्यतेइति॥एकमस्येतिवार्तिके॥एकंत्री
ह्रियवाद्यंसर्वसाधारणंतुतत्॥द्वेदर्शपूर्णमासाख्येदेवानामेवतेमते॥क्षी ५२
रमेकंपशूनांतत्मनोवाक्प्राणरूपकं॥अन्नत्रयंचिदात्मार्थंतेनव्यवहरत्स

यं॥अनेनमनसारूपप्रपंचोत्रोपलक्ष्यते॥वाग्द्वियेणनिष्पाद्यंनामवाग्घ्र
कथ्यते॥पंचवयात्मकात्प्राणादिहकर्मोपलक्ष्यते॥नामरूपक्रियारूपम
ध्यात्मंरूपवर्णितं॥ब्रह्मादिस्थावरांतंयत्जगत्त्रैयमेवहि॥नामरूपंकर्म
चेतिनास्तिवस्त्वंतरंक्वचित्॥एवंसतिपरिगणितसमानेषुमध्येनामरूपक्रिया
भिस्त्रिभिस्तैरन्नैर्मनआदिभिर्मिथ्याभूतैरेवजीवोव्यवहरति॥ततोनामरूपक्री
यान्नव्यवहारात्पततिनरकइतिशेषः॥चेत्परंतूर्णंचऊर्ध्वंस्वर्गंचायातिचेत्
परंवेंतिर्यगादिषुयोनिषुभ्रमतिअस्मात्अन्यत्किंइंद्रजालंव्यलीकत्वादिद
मेवेंद्रजालमित्यर्थःसिद्धः॥ऊर्ध्वंगच्छंतिसत्त्वस्थामध्येतिष्ठंतिराजसाःजघ

५३ न्यगुणवत्तस्माज्जगद्गंतिनामसाः॥ इतिगीतोक्तेः॥तस्मान्नामरूपक्रिया
त्मकंजगन्मृषेति॥७३॥ननुप्रपञ्चोवारंवारंमषेत्येवमुद्घोष्यतेतत्रकुतोसर्वं न
जनस्यमिथ्यात्वबुद्धिरत्नआह॥श्लोक॥उपादानचिद्व्यापिमंतर्बहिर्वाजडंमा
यिकंभातिकार्यंसमस्तं॥मषात्वेपिसत्यत्वधीर्मूढजानेर्गुरोःशास्त्रितस्यैवामि
थ्यात्वसिद्धौ॥७४॥जडंमायिकंकार्यंसमस्तंअंतःशरीरेबहिश्चयद्वातित
दुपादानचिद्व्यापमेवभातिभासतेकार्यकारस्नामात्मेवभासतेमृद्घटादौ
तथादृष्टत्वात्तत्कारणातिरिक्तंकार्यं"वाचारंभणंविकारोनामधेयंमृत्तिकेत्येव
सत्यमितिश्रुतेः॥गुरूणैवंशिक्षितत्वाभावान्मूढजानस्येत्यर्थः॥७४॥

उपादानकार्ययोर्वैलक्षण्यात्सत्यत्वमिथ्यात्वनिर्णयमाह॥श्लोक॥उपादानचि
द्यादृग्गीतादृगेवान्यथानोविभातिस्वरूपात्क्वापि॥अतःसत्यतास्याज्जडंकार्य
जातंविभात्येवनानाप्रकारंमषातत्॥७५॥उपादानचैतन्यमेकरसत्वात्क्वाप्यन्य
थानभातिजडंप्रपंचरूपंकार्यजातंतुत्रिगुणकार्यत्वादनेकरसत्वान्मृषैवतदि
त्यर्थः॥तदुक्तं॥सच्चलक्षणितरूपाद्यद्रूपमन्यत्कथंचन॥नैवप्रपद्यतेसत्यंतत्स्या
त्कार्यंविलक्षणमिति॥७५॥अधिष्ठानसम्यक्ज्ञानेसतितद्विवर्तःप्रपंचस्तद
तिरिक्तोनास्तीतिदृष्टांतपूर्वकमाह॥श्लोक॥यथावस्तुविज्ञानतश्चीद्विव
र्तःप्रपंचःसन्नस्तोपिचिन्मात्रमेवं॥यथारज्जुसम्यक्दृशारज्जुमात्रं

५७ भुजंगादिकल्पंततोनान्यदस्ति॥७६॥ कल्पितस्यपृथक्सत्ताविरहेणा
धिष्ठानानतिरेकादधिष्ठानमात्रमित्यर्थः७६॥किंच॥श्लोक॥प्रपंचसत्य
त्वनिरूपणेननब्रह्मराद्धार्थनिरूपणंस्यात्॥यंहैतयान्यस्यजडस्यभा
नात्॥बृहत्वमर्थोनघटेतधातोः॥७७॥बृहत्वाद्बृंहणत्वाद्वाब्रह्मेतिब्रह्म
राद्धार्थोनघटेतेत्यर्थः॥तदुक्तंवार्तिके॥अन्याद्यन्ताननुगतंवस्तुब्रह्मेतिभ
ण्यते॥ब्रह्मार्थोदुर्लभोनस्याद्द्वितीयेसतिवस्तुनीति॥७७॥ उपादानसमसत्ताको ५७
न्यथाभावःपरिणामःउपादानविषमसत्ताकोन्यथाभावोविवर्त्तइतिपरिणामविवर्त्तयोः
पूर्वापेक्षयालक्षणांतरंकेचिद्वदंतितदपिदर्शयति॥श्लोक॥समानसत्ताकतयान्यथा

त्वाद्ज्ञानकार्यपरिणामसंज्ञं॥ब्रह्मान्यसत्ताकतयान्यथात्वात्कार्यंजातंहिविवर्त्तसंज्ञं॥७८॥
जातमित्कार्यंजातंब्रह्मकार्यंत्यर्थः॥द्वयोरिवमायातत्कार्ययोरेकसत्ताकत्वात्समानसत्ताकत्वमि
त्यर्थः॥ब्रह्मतत्कार्ययोर्विषमसत्ताकत्वात्अन्यथाभावोविवर्त्तः॥ब्रह्मसत्तायाआवृतत्वात्त
द्ज्ञानसतायांकल्पितेप्रपंचेरज्जुसर्पवदावरणाभावाद्ज्ञातसत्ताकत्वंनास्तिकिंतुज्ञातसत्ता
कत्वमेवातोब्रह्मविवर्तःप्रपंचइत्यर्थः॥तुच्छस्यायंस्वभावोयावज्ज्ञायतेतावदेवतस्यसत्ता३न्य
थानास्तीतिभावः॥७८॥वेदांतनयेकारणान्नकार्यंभिन्नं॥वाचारंभणंविकारोनामधे
यंमृत्तिकेत्येवसत्यमितिश्रुतेः॥येतुकारणात्कार्यंभिन्नंवदंतितन्मतंननयुक्तंदोषदुष्टत्वादि
त्याह॥श्लोक॥येकारणात्कार्यमिदंविभिन्नंवदंतितेषांनमतंविशुद्धं॥येतंतवःस्युस्फलि

ता स्तुत ज्ञंपरेगुरुलंघिगुणंकुतोन॥७९॥स्पष्टार्थः॥ यावत्प्रारब्धंदैवंप्रपञ्चमपिप्रज्ञ
५५ ह्यादित्याह॥श्लोक॥अधिष्ठानचैतन्यविज्ञानसिद्धौप्रपञ्चमपिदैवमेतत्प्रज्ञ त्यात्॥प्रहा
णंतदेवात्रयद्बाधित्वादुपेक्षानपाषाणवत्दूरहानं॥८०॥यावत्प्रारब्धंदैवंप्रपञ्चम
ज पिप्रज्ञंस्यात्कथंतरित्याह॥यद्बाधित्वात्प्रहत्यविषयत्वेनोपेक्षातदेवास्यप्रहाण
मित्यर्थः॥तदुक्तमाचार्यैः॥उपेक्ष्यनामरूपेदेसच्चिदानंदवस्तुनि॥समाधिंसर्वदाकु
र्यात्दृश्येयोगीयथाजडइति॥८०॥अध्यारोपापवादाभ्यांनिःप्रपंचंप्रपंच्यतइतिसां ५५
प्रादायिकोक्तेरधिष्ठानेभ्रांत्याप्रतीतस्याधिष्ठानमात्रशेषत्वमपवादइत्यपवादल
क्षणंलक्ष्येदर्शयन्नुद्धोधेनस्वस्यकृतार्थतांदर्शयति॥श्लोक॥अधिष्ठानचैतन्यसिं

धोरुक्तयः प्रपञ्चात्मिकाः कल्पिताभ्रांतिमात्रात्॥अधिष्ठानबोधाद्यंतन्निरासादधिष्ठा
नमात्रस्यशेषाकृतार्थाः॥८१॥स्पष्टार्थः॥८१॥इदानींमिथ्यात्वंलक्ष्यति॥यस्यात्मतामांवरं
वास्तियस्मिन्तस्याज्ञानान्नयद्भातिमिथ्या॥रज्जौसर्पस्तैजसेतत्प्रपंचोब्रह्मण्येवंभाति
विश्वंमृषैव॥८२॥स्पष्टार्थः॥८२॥प्रपंचमिथ्यात्वबुद्धिः कुतोनभवतीत्यत्रहेतुमाह॥श्लोक
प्रातीतिकंयद्व्यवहारकालेसंबाध्यतेप्रायशएवलोकैः॥ब्रह्मात्मबुद्धिर्नविनाप्रपंचःसं
बाध्यतेतोत्रयथार्थबुद्धिः॥८३॥व्यवहारकालेगमनादिव्यवहारेआगंतुकदोषजन्यं
प्रातीतिकंशुक्तिरजतादिसामग्रीवशात्बाध्यतएवव्यवहारिकःप्रपंचोब्रह्मात्मबुद्धिंब्र
ह्मात्मज्ञानंविनासंबाध्यतेतस्यतदेकनिवर्त्यत्वात्सचानेकजन्मार्जितपुण्यसंचयं

स्वानु
५६ विनानसंभवत्यतोऽप्रपंचेयथार्थबुद्धिर्मूढानांनित्यर्थः॥ ८३॥ उक्तमर्थंनिगमयति॥श्लोक
अलंबहूक्तेनबहुप्रकारैःसर्वज्ञानारायणवेदवाक्यं॥ वाचारंभेत्यादिनस्मा च्छ्रुतीकंदृश्य
सत्यंब्रह्मसिद्धांतरूपः॥ ८४॥बहुप्रकारैर्बहूक्तेनतर्केणालंपूर्यतां॥तर्कास्यानंतत्वादित्यर्थः॥
कथंतर्हिसिद्धांतसिद्धिरतआह॥सर्वज्ञनारायणनिर्मितवेदवाक्यंवाचारंभणंविकारोनाम
धेयंमृत्तिकेत्येवसत्यमितिस्वतःप्रमाणंतस्मात्अधिष्ठानब्रह्मैवसत्यंकाल्पितंदृश्यंव्यतीकं
मिथ्येतिसिद्धांतः॥तर्कस्तुमानानुग्राहकत्वादुपेक्ष्यते॥ननुस्वतःप्रमाणमतोऽलमितिचेन्न॥
एवंचप्राग्दृशः किंस्वरूपंचदृश्यस्य॥ किंवेत्यदोऽद्वयंसंविच्चार्यमुमुक्षोरिष्टंचेत्॥ त ५६
त्रदृक्स्वरूपंब्रह्मसत्यंदृश्यप्रपंचोमिथ्येतिनिश्चयः॥ तथाचसंशयविरोधिनिश्चयेनपुनः

---

संशयानुदयःसंपन्नःस्वस्येयमेवकृतार्थतेतिभावः॥ कृतेपिसिद्धांतेसिंहावलोकि
तन्यायेनपुनराह॥श्लोक॥जीवानियम्याभगवान्नियंतातत्प्रेरकोभ्रामकएषहृत्स्थः॥ ए
इत्यादिशास्त्रंबहुतावदेवब्रह्मात्मभानंनहियावदस्ति॥ ८५॥यःपृथिव्यांतिष्ठन्पृथि
व्याअंतरोयंपृथिवीनवेदयस्यपृथिवीशरीरंयःपृथिव्याअंतरोयमयतेषजा
त्मांतर्याम्यामृतइत्यादिशास्त्रंईश्वरस्यांतर्यामिणोनियाम्यत्वेजीवस्यचनियम्य
त्वेप्रमाणं॥एषहृत्यवसाधुकर्मकारयतितंयमेभ्योलोकेभ्यउन्निनीषतेएषउत्
वासाधुःकर्मकारयतितंयमेभ्योलोकेभ्योधोनिनीषतइत्यादिश्रुतिःस्मृतिश्चअ
ज्ञोजंतुरनीशोयमात्मनःसुखदुःखयोःईश्वरप्रेरितोगच्छेत्स्वर्गंवाश्वभ्रमेववेतिकर्तृ

५७ कारयितृत्वे प्रेर्यप्रेरकत्वेप्रमाणं॥ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुनतिष्ठति॥ भ्रामयन्सर्वभूतानियंत्रारूढानिमाययेत्यादि शास्त्रंभ्राम्यभ्रामकत्वेप्रमाणं॥ सर्वमेतद्व्याख्येशास्त्रंतावदेवबहुयावदहंब्रह्मास्मीतिबुद्धिर्नोत्पद्यतावत्पर्यंतमेवेत्यर्थः॥ उत्पन्नायांब्रह्मात्मबुद्धौभेदबुद्धेर्निवृत्तत्वात्कः कस्यनियंताकः कस्यनियम्योवास्यात्यत्रत्वस्यसर्वमात्मैवाभूत्सइदंसर्वंभवतीत्यादिश्रुतिभ्य इतिभावः॥ इदंसृष्टिस्थितिप्रलयप्रवेशावाक्यानामुपलक्षणं॥ एतेषामर्थवादत्वेनस्वार्थेतात्पर्याभावांत्॥ तर्हितानिकिमितीश्वरेणनिर्मितानीतिचेत्अध्यारोपप्युत्पत्यर्थमितिब्रूम इतितानिकानिवाक्यानिकथंवातेषांस्वार्थेतात्पर्याभावइतिचेदुच्यतेतत्रयतोवाइमानिभूतानिजायंतेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतीतिसृष्टिस्थितिप्रलयवाक्यमेवमन्यान्यपितत्रसृष्टिनामउत्पत्तिःसानसंभवतिनेहनानास्तिकिंचनअतोन्यदार्त्तमित्यादिश्रुतयः॥ नासतोविद्यतेभावइतिस्मरणात् असतउत्पत्तयसंभवात्तत्र श्रुतितात्पर्येनसंभवतिस्थितिकालेप्यसत्यादेवतन्नसंभवतिएवंप्रलयोपिनसंभवतितस्योभयाधीनत्वात्॥ आदावंतेचयन्नास्तिवर्त्तमानेपितत्तथेतिस्मरणात्॥ तत्सृष्ट्वातदेवानुप्राविशत्सएषइहप्रविष्टआनखाग्रेभ्यइत्यादिप्रवेशावाक्यानितत्रप्रवेशोनामप्रतिबिंबःसिद्धांतितःसचस्वरूपेणसर्वेषांतोप्रवेशावाक्यानामपिस्वार्थेनतात्पर्यमेवमूह्यं॥ ८५॥ भयंद्वितीयाद्भवतीतिवेदइत्यादिनाश्लोकेनोक्तंतदुपसंहरति॥ श्लोक॥ एवंश्रुतिन्यायविचारणेनद्वितीयमेतन्नकुतोभ

५८ यंस्यात्"अतोऽभयंवैजनकेतिवाक्याच्यद्वीतिह्रीनंममतत्स्वरूपं"१६॥स्पष्टार्थः॥यः
कर्तुमकर्तुमन्यथाकर्तुमीश्वरः कालचक्रप्रयोक्तातस्मात्कालचक्रादपिमेभयंनास्ती
तिसहेतुकमाह॥श्लोक॥यद्वादशारंकिलकालचक्रंत्रिणाभियच्चाप्यजरंपरिभ्रमत्
॥गोपालकृष्णस्यकरस्थितंयत्सएवकृष्णोस्मिकुतोभयंतत:॥१७॥किलइतिवेदेश्रूयते
द्वादशमासाःचैत्रादयोयस्याराःकोणाःत्रीणिचातुर्मास्यानियस्यनाभयःयच्चाजरं
सर्वदैवनूतनंअपिचपरिभ्रमत्निमेषादिवत्सरांतस्वरूपेणपरितोभ्रमत्प्रयोक्तुः
श्रीगोपालकृष्णस्यकरास्थितंप्रयोक्तुराधीनं संप्रयोक्ताकृष्णःकृषिर्भूवाचकःशब्दो ५८
णश्चनिर्वृतिवाचकः॥तयोरैक्यंपरंब्रह्मकृष्णइत्यभिधीयतइतिनिरुक्तेःसकृष्णोहम

---

विद्यानिर्व्यास्मिरएवंचसतितत:कालचक्रादतिघोरात्ममकुतोभयंनास्तिभयमि
त्यर्थः॥मद्व्यतिरिक्तस्याभावादित्यर्थः॥१७॥भीतिस्वरूपंवदन्तत्कुतोहंबिभेमीतिप्र
त्ययोभ्रांतिरित्याह॥श्लोक॥भीतिर्मनोवृत्तिरियंद्वितीयादुत्पद्यतेचेतसितद्विकारः॥
आरोप्यतामात्मनिनिर्भयेपिबिभेम्यहंभ्रांतिरियंमृषैव॥८८॥कामःसंकल्पोविचिकि
त्साश्रद्धाश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंमनएवेतिश्रुतेर्मेमनसिभयमुत्प
न्नमितिप्रत्ययाच्चभीतिर्मनोवृत्तिःइयंद्वितीयाद्वयहेतोश्चेतसिउत्पद्यतेऽतोसौतद्वि
कारश्चेतःपरिणामोराजसः॥उक्तंच॥भागवतेभयंद्वितीयाभिनिवेशतःस्यादितिए
तादृशीभीतिंनिर्भयेप्रत्यगात्मन्यारोप्याहंबिभेमीतिभ्रांतिरयोदहतीतिवदतस्मिंस्तद्बु

५७ द्विर्मर्षैवेत्यर्थः॥ ८८॥ एवंतावज्ज्ञानंसमस्तंस्वतुधर्ममात्रंइत्यारभ्यनिर्मनोवनिरियंतैःश्लोकैस्तत्पदार्थशोधनंकृतं॥ अधुनात्वंपदार्थशोधनंवाक्यार्थज्ञानोपयोगितयाक्रियते॥ श्लोक॥ नाहंस्थूलंसप्तधातुस्वरूपंविष्ठाभांडंप्रस्रवच्छिद्रमन्नं॥ श्वादेर्भूलंसर्ववर्णाश्रमाणांतादात्म्यमेतेननोदृष्टभावात्॥ ८७॥ अहंअस्मत्प्रत्ययशब्दयोरालंबनीभूतःप्रत्यगात्माऽहं॥ पंचीकृतपंचमहाभूतकार्यंकर्मजंस्थूलंशरीरंनभवामीतिशेषः॥ अहंशरीरमितिप्रत्ययाभावात्॥ तद्गतस्थूलत्वादिधर्मेणैवदेहाध्यासोतउक्तंनाहंस्थूलमितिपंचीकरणंतुआकाशादिपंचसूक्ष्मभूतानिप्रत्येकंद्विधाविभज्य५७पुनरपितत्प्रथमिकाभागान्प्रत्येकंचतुर्धाविभज्यतेषांभागानांइतरचतुरंशेस्वं

स्वंभागंविहायसंयोजनंएतच्चेश्वरकर्तृकमित्याकरेविस्तरः॥ पंचीकृतपंचमहाभूतकार्यत्वंतुकाष्ठकुड्यादेरप्यस्तितथापिनिकृष्टंशरीरमित्याह॥ सप्तधातुस्वरूपंतुरुधिरमांसमेदोस्थ्यस्थिमज्जाशुक्रेतिसप्तधातुमात्रं॥ विष्ठाभांडंसर्वानुभवसिद्धमेतत्॥ प्रकर्षेणस्रवंतिछिद्राणितत्तथा॥ तत्राधोद्वेशीर्षण्येसप्तमुखे॥ श्वादेरन्नं॥ अद्यतेऽत्तिचभूतानितस्मादन्नंतदुच्यतइतिश्रुतेःअन्नमन्नमयकोशत्वात्॥ सर्वेचतेवर्णाश्चआश्रमाश्चतेषांमूलंनिदानं स्थूलदेहानिबंधनाएवसर्ववर्णाश्रमधर्माः ब्राह्मणोजातोमृतइतिब्राह्मणवर्णत्वंदेहस्यैव॥ तथाआश्रमाब्रह्मचर्यादयोष्टमेवर्षेब्राह्मणमुपनयेदित्यादिकल्पवचनेभ्यः॥ अतएवोक्तंहस्तामलकाचार्यैः॥ श्लोक॥ नाहंमनुष्यो

६० न चरेद्वयक्षोनब्राह्मण क्षत्रियवैश्यशूद्राः॥ न ब्रह्मचारी नगृहीवनस्थोभिक्षुर्न चा
हंनिजबोधरूपः॥ इतिआचार्यैरप्युक्तं॥ नवर्णान्नवर्णाश्रमाचारधर्मान्नमेधारणाध्या
नयोगादयोपि॥ अनात्माश्रयाहंममाध्यासहानान्तरेकोवसिष्ठः शिवःकेवलोहं॥ ए
वंभूतेनदेहेनमेतादात्म्यंऐक्यंन॥ तत्रहेतुमाह॥ दृष्टभावात्दृष्टत्वादित्यर्थः॥ दृष्टाद
श्यात्भिन्ने इतिसर्वसिद्धमतोन स्थूलदेहतादात्म्यंप्रत्यगात्मनासह घटतइतिभावः॥
८॥ एवंषंढत्वादयोपिदेहस्यैवेत्याह॥ श्लोक॥ नाहंषंढोनैवयोषिन्नुमान्वानाहंबालोनै ६०
वयस्थोयुवावा॥ देहस्यैतेध्यासतोभ्रांतिभावाःप्रत्यक्तत्वेपूर्णएवाधुनाहं॥९॥ए
तेषंढादयोभावादेहस्यैवदेहावच्छिन्नेप्रत्यक्तत्वेप्रत्यगात्मनिमूढानांअविवेकात्

---

अध्यासतोभांति॥ विवेकादहंपूर्णएवाधुनाविवेककालेऽस्मीत्यर्थः॥ षंढादित्वेबी
जमाहश्रुतिः॥ पितुःरेतोतिरेकात्पुरुषोमातुःरेतोतिरेकात्स्त्र्युभयोर्बीजतुल्यत्वान्नपुं
सकंव्याकुलितमनसोंधाःखंजाकुब्जावामनकाभंवंत्यन्योन्यवायुपरिपीडितशु
क्रद्वैविध्यादिविधानंस्यात्तेनयुग्माःप्रजायंतइति॥ तत्रषंढत्वादयोंनरसमयोपा
दानत्वान्नत्रबालत्वादयोपरिणामशक्तिरूपकालकृताइतिविवेकः॥१०॥ इदानींदेहेहंम
तिरप्यविवेकनिबंधनेवेत्याह॥ श्लोक॥ आत्मछायाव्याप्तबुद्धेःप्रवेशात्स्थूलेदेहेहं
मतिःसाविवेकात्॥ सर्वानर्थप्राप्तिबीजंनराणांभ्रांतिश्चैषासाधुनामेनचास्ति॥११॥
आत्मनःप्रतीचःछायाआभासस्तेनव्याप्तायाबुद्धिस्तस्याःस्थूलदेहेस्थूलभोगार्थं

६१ प्रतिफलनंभवतियद्यतदादेहेहंमतिरुदेतिजाग्रत्कालेसा-चाविवेकाद्विवेकाभावादात्म
छाया व्याप्त बुद्धिनिबंधनात्तदभावेसुप्तौनैवेत्यविवेकाद्भवतिसादेहेहंमतिरित्यर्थः॥अ
तएवएषाभ्रांतिरतस्मिंस्तद्बुद्धिःतदुक्तं॥चिच्छायावेशतोबुद्धौभानंधीरित्यादिना॥सास्क
खेनैवास्तकिंतवेत्यतआह॥सर्वोनर्थप्राप्तिबीजंनहिदेहेहंकारंविनाकोपिकिंचित्करोति
अतःतस्याउच्छेदेऽतियत्नोविधीयतइतिभावः॥किमनेनपरोपदेशपांडित्येनेत्यतआह॥
साऽविवेकनिबंधनादेहेहंमतिर्मविवेका द्गुरुशास्त्रप्रसादाद्धुनातदनुग्रहसमयेना
स्तीतितस्मात्सर्वोनर्थोछेदकदेहाहंकारविवेकसिध्येगुरुशास्त्रप्रसादएवसंपाद्नी ६१
यइतिभावः॥९१॥यथादेहेहंमतिर्भ्रांतिस्तथादेहेममत्वप्रतितिरपिभ्रांतिरेवेत्याह॥श्लो०

षष्ठ्यर्थस्यांसगतेरत्यसंगेयस्मादेहेयाममत्वप्रतीतिः॥भ्रांतिश्चेषासाविवेकेनास्ति
द्धानिःसंगत्वात्साधुनामेनचास्ति॥९२॥षष्ठ्यर्थःसंबंधस्तस्यअत्यसंगेतिक्रांतसं
बंधे॥असंगोह्ययंपुरुषइतिश्रुतेः॥तास्मिन्नात्मनिसर्वथैवासंगेऽसंगतेर
प्राप्तेरपि॥एवंसतियस्मात्कारणादेहेयाममत्वबुद्धिः असंगात्मेतिविवेकाभावा
ब त्साएवमविवेकास्यसंबंधोद्धिः साभ्रांतिःविवेकेनममनिः संगत्वाद्धुनानास्तीत्यर्थः॥
९२॥यथादेहेममत्वप्रीतिर्भ्रांतिः तथास्त्रीपुत्रादिष्वपिममत्वप्रतीतिर्भ्रांतिरित्याह॥तत्र स्त्री
षुममत्वकरणेनमहाननर्थइत्याह॥श्लोकत्रयेण॥श्लोक॥किमपिमोहनशान्त्यधिदेव
तंविरचितंविधिनाह्यबलाभिधं॥रुधिरमांसमयंपरमार्थतोभवतेनजितंभुवनत्रयं॥९३॥ति

६२ मनोमयीमांसमयीविधात्रानारीनराणांनिगडस्वरूपा" अमुत्रबंधायविनिर्मितैकास्या
दत्रबंधायतथाद्वितीया ॥१७॥ स्त्रीपुंसनूनांरुधिरादिपंचभूतात्मकत्वंचसमानमेव॥
देहस्यसंस्थानविशेषमात्रंपरस्परंमोहकरंनचान्यत्॥१५॥ अतिरोहितार्थाःश्लोकाः॥१३॥
१७॥१५॥ एवंस्त्रीणामपिअर्थैनैकरत्वंनिरूप्यतत्रममतानकार्यैत्याह॥श्लोक॥ एता
दृशेर्यैममतान्नयुक्तातथास्कलेन्यत्रगृहादिकेपि" परस्परंकामवशान्ममत्वंतच्चाधु
नामेविहतंविवेकात्॥१६॥ आत्मनस्तुकामायसर्वंप्रियंभवतीतिश्रुतेः॥कामम्
तैवममतानवस्तुगत्याकामाभावेकः कस्य ममतास्पदंप्रेमास्पदंचेत्यनुभवसिद्ध ६२
मित्यर्थः॥ १६॥ननुनापुत्रस्यलोकोस्तीतिवचनात्पुत्रार्थंऋतौभार्यामुपेयादितिव

चनाच्चास्त्रीषुममताविधेयेव॥ कथंतत्रममतानिषिध्यतेइति-चेत्तत्राह॥श्लोक॥त्रैगु
ण्यमात्रविषयोःखल्वकर्मवेदाइत्थंहरेर्भगवतोवचनंप्रमाणं॥आदृत्यचानुभवतः
परमार्थनिष्ठाभार्यामतावितिवचःखलुनाद्रियंते॥१७॥त्रैगुण्यविषयावेदानिस्त्रै
गुण्योभावार्जुनेतिभगवद्वाक्यंप्रमाणंयथार्थेनादृत्यतथास्वानुभवतश्चवेदानां
त्रैगुण्यविषयत्वमादृत्यपरमार्थनिष्ठाःपुरुषाऋतौभार्यामुपेयादितिवचनंनाद्रियं
तेसंसारमूलकत्वादित्यर्थः॥ परमार्थनिष्ठत्वंचेत्थं॥एतद्धस्मवैतत्पूर्वेविद्वंसः
प्रजांनकामयंतेकिंप्रजयाकरिष्यामोएषांनोयमात्मायंलोकइतिश्रुतेः॥संसा
रमेवनिःसारंदृष्ट्वासारदिदृक्षया॥प्रव्रजंस्यकृतोद्वाहःपरंवैराग्यमाश्रिताद

६३ तिस्मृतेश्च॥पुत्रप्राप्तिभिप्रायापुत्रार्थंभार्यांयांप्रमत्वंनकुर्वंतीतिश्रुत्यर्थस्तएषांनो
स्माकंअयमपरोक्षआत्माअयंलोकःप्रत्यक्षफलंतेवयंकिंप्रजयाकरिष्यामोऽतो
हेतोःपूर्वेविद्वांसःप्रजांनकाम्ययंतेस्मयर्थस्तत्रैगुण्यविषयावेदानिस्त्रैगुण्योभव
र्जुनेतित्रैगुण्यंसंसारःसविषयःप्रकाशितव्योएषांतेकर्मकांडविषयावेदाःकर्मप्रति
पादकश्रुतयइति॥किंच॥अथत्रयोवावलोमेकोनुष्यलोकःपितृलोकोदेवलोक
इति॥मनुष्यलोकःपुत्रेणैवजय्योनान्येनकर्मणापितृलोकोविद्ययादेवलोकोदेवलो
कोवैलोकानांश्रेष्ठ[illegible]स्तस्माद्विद्यांप्रशंसतीतिश्रुतेःपुत्रेणमनुष्यलोकातिरि ६३
क्तंफलंनास्तीतिनिकृष्टफलत्वात्पुत्रफलंनाद्रियंते॥श्रुत्यर्थस्तुवार्तिकसारे॥पु

त्रेणजय्योलोकोयंपितृलोकस्तुकर्मणाविद्ययादेवलोकोतोद्वाभ्यांविद्याप्रशं
स्यते॥९॥क्रियात्वालोकहेतुत्वंयुज्यतेकर्मविद्ययोः॥द्रव्यात्मनस्तुपुत्रस्यकथमित्यु
च्यतेशृणु॥२॥प्रव्रज्यिष्यन्मरिष्यन्यापिताकर्त्तव्यमात्मनः॥पुत्रेध्ययनयागादिसर्व
मप्यर्पयत्सतो॥३॥यागाध्ययनकाम्यानिकुर्वन्पुत्रःपितुर्गृहे॥सर्वेयेतावतापुत्रेजितो
यंलोकउच्यते॥४॥ऐतरेपिश्रूयते॥सोस्यायमात्मापुण्येभ्यःकर्मभ्यःप्रतिधीयतेथा
स्यायमितरआत्माकृतकृत्योवयोगतःप्रैतिसइतःप्रयन्नेवपुनर्जायतेतदस्यतृतीयं
जन्मेति॥श्रुतेरयमर्थः॥अस्यपितुर्द्वावात्मानौदेहौतयोर्मध्येऽयमात्मापुत्ररूपोदेहः
पुण्येभ्यःकर्मभ्यःशास्त्रोक्तकर्मनिष्पादनार्थंप्रतिधीयतेस्वस्यप्रतिनिधित्वेनगृहेव

६७ स्याप्यते॥ननुकिमनेनप्रतिनिधिनास्वयमेवकुतोनकरोतीत्यतआह॥अथेति॥अन्य
पितुरितर आत्मा स्थविरो देहः कृतकृत्यः॥कृतान्येतज्जन्मप्रयुक्त॥नि सर्वाणि कर्माणि
येनासौकृतकृत्यः लौकिकानां कुटुंबपोषणादीनां शास्त्रीयाणामग्निहोत्रादीनां चनि
व ष्पादित्वात्कृतकृत्यत्वंयोगतः वयसापूर्वकर्मसंपादितेन आयुषागतोहीनःप्रेति
सइतःप्रयन्नेवपुनर्जीयतइत्यर्थः॥तस्मादेवंनिकृष्टफलत्वात्पुत्रार्थस्त्रीषुममता
करणमनुचितमितिभावः॥९७॥किंच॥स्वस्यासत्यात्सर्वतोदुःखदायेपुत्रादारा
गारभ्यादपोन्ये॥तेषुप्रीत्यायोममत्वाभिमानोभ्रांतिश्चैषानास्तिमेसद्विवेकात्
९८॥स्वस्यस्त्रीपुत्रादेरित्यर्थः॥शेषंस्पष्टं॥९८॥एवंस्थूलदेहादात्मानंविविच्याधु



नालिंगदेहात्मानोविवेकःक्रियते॥श्लोक॥नाहंसूक्ष्मंसप्तदशांत्यात्मकंयत्स्वप्नस्था
नंवासनादेहसंज्ञं॥अस्याध्यासात्स्थूलदेहादिबंधःसाक्ष्यंतन्मेसाक्षिणोतोस्मिभि
न्नः॥९९॥सप्तदशांत्यात्मकंपंचप्राणमनोबुद्धिदशेंद्रियाणिएवंसप्तदशावयवात्म
कंस्वप्नस्थानंवासनादेहसंज्ञंअस्याध्यासात्स्थूलदेहादिबंधः॥लिंगंदेहाध्या
समूलःस्थूलदेहाध्यासःआदिशब्देनस्थूलविषयाध्यासस्यलक्षणोबंधः॥
एतादृशंलिंगंनाहंममतेनतादात्म्येनेत्यर्थः॥तत्रहेतुमाह॥मेममलिंगदेहसा
क्षिणस्तल्लिंगंसाक्ष्यंसाक्षिणःसाक्ष्यंभिन्नमतोरहंतस्माद्भिन्नोविलक्षणइत्यर्थः
अत्रयद्यपिसाक्षिसाक्ष्यभावेनसूक्ष्मदेहादात्माविवेचितःतथापिदेवचक्षुषु

६५ ज्ञानमात्मत्वदर्शनान्नेभ्यो आत्मा विविच्यते॥ तथाहि अहमज्ञो वा न हं पिपासा
वानिति प्राणधर्ममात्मन्यारोप्य प्राणः आत्मेति मन्येत॥ तन्न॥ सुषुप्तेचैतन्याभावा
वात्॥ प्राणस्येतरस्मिन् काले भृत्यस्वामिनोरिवसंकीर्णयोर्न ज्ञायते कस्येदं चैत
न्यमिति॥ सुषुप्तेतुपुनर्विज्ञानरहितः प्राण उपलभ्यते॥ करणोपरमाद्विज्ञानाभावः
प्राणस्येति चेन्न॥ स्वामिनि व्याप्रियमाणे करणोपरमाभावो नराजपुरुषवत् अनतर
वन प्राणस्येतानि करणानि॥ यः स्वापेनोपरतः तस्येव करणानि यदासौ बहिर्निर्ग ६५
म्य करणान्यधितिष्ठति तदा सर्वाणि करणानि स्वस्वव्यापारेषु प्रवर्त्तन्ते यदा जा
ग्रत्स्थानिनिमित्तं कर्मोद्भूतं भवति तत्क्षये सर्वाणि करणानि गृहीत्वा बुद्ध्युपा



धिसंपर्कजनितविज्ञानेनस्वप्नंसुषुप्तंवागच्छति एवंस्थानत्रयमनवरतंजी
वोगच्छति कर्मनिमित्तंचेदंगमनंयत्स्वप्नजागरितेगच्छति॥ पुनः स्थानद्वयनिमि
त्तकर्मोद्भूतश्रमापनयनायसुषुप्तमपिगच्छति॥ एवंप्राणस्तत्कर्मवशादेवशरीरंपरिपा
लयन्वर्त्ततेस्वप्नसुषुप्तयोर्नतभ्रांतिपरिहाराय॥ तस्मात्प्राणोनात्मा॥ काणोहंबधि
रोहमितीन्द्रियधर्मानात्मन्यारोप्येंद्रियाण्यात्मेतिवदंतिकेचित्तन्न चक्षुरात्मानभ
वतिरूपग्रहणसाधनत्वात्प्रदीपवत्यथाप्रदीपेनकरणेनरूपमुपलभतेतथाचक्षुः
श्य करणेनरूपमुपलभतेएवंमेवेतराण्यपिकरणानिज्ञेयानि॥ तथामनोप्यात्मानभव
तिदृश्यत्वात्करणत्वाच्चप्रदीपवदिति॥ बुद्धिरप्यात्मानभवतिदृश्यत्वात्करणत्वाच्च

६६ प्रदीपवदिति॥ तस्मात्सप्तदशावयवावा अपिनप्तसप्तमेतिज्ञेयं॥ कर्तुःकरणसापेक्षत्वात्कर्तृकरणयोरेकत्वंन संभवति अतःकरणभिन्नश्चिदाभासःकर्त्तेत्यपिज्ञेयं॥ ननुसप्तदशावयवंलिंगमितिसप्तदशसंख्यानयुज्यतेइंद्रियाणांन्यूनाधिकत्वश्रवणात्॥ तथाहि॥ सप्तप्राणाःप्रभवंतितस्मात्सप्तेंद्रियाणि क्वाचिच्चाष्टौग्रहाअष्टावतिग्रहाइत्यष्टौग्रहाःपुरुषपशुबंधकाइंद्रियाणिरागाद्यकलादकलूरेणइंद्रि
णि यॉकर्षकाःविषयाःअतिग्रहाइत्यर्थः॥ सप्तवैशीर्षण्याप्राणाद्वावावांचावितिअ ६६
त्रनव॥ अवांचोपायूपस्थौ॥ नववैपुरुषेप्राणानाभिर्दशमीयत्रदश॥ दशवैपुरुषेप्राणाअत्मैकादशअत्रआत्मामनः॥ एवंक्वचित्क्वादशक्वचिच्चत्रयोदशेंद्रि

योणिश्रूयंते॥ तथाचनसप्तदशावयवंलिंगमितिचेन्न॥ ज्ञानेंद्रियपंचकंकर्मेंद्रियपंचकमितिदशेंद्रियाण्येवनाधिकानिनन्यूनानीतिज्ञेयं॥ पद्मपुराणेशिवगीतायांचसप्तदशावयवंलिंगमुत्पत्तिक्रमेणस्मर्यते॥ व्योमादिसात्विकांशेभ्योजायंतेधींद्रियाणितु॥ व्योम्नःश्रोत्रंभुवोघ्राणंजलात्जिह्वाथतेजसः॥ चक्षुर्वायोस्त्वगप्यन्नातेषांसौत्विकतातत॥ व्योमादीनांरजोंशेभ्योजायंतेतान्यनुक्रमात्॥ समस्तेभ्योरजोंशेभ्यःपंचप्राणास्ततःपरं॥ जायंतेसप्तदशकमेवंलिंगशरीरकमिति॥ नागकूर्मकृकलदेवदत्तधनंजयाख्याःपंचाप्येवायवःसंति॥ नागउद्गीरणकरः कूर्म उन्मीलनकरः॥ कृकलः क्षुत्करः॥ देवदत्तोजृंभणकरः॥ धनंजयःपोषणकर इतिवदंति॥ वेरांतिनस्तेषांपृथक्कल्पनागौर

वात् श्रोत्रादिप्रमाणाभावाच्च प्राणादिष्वंतर्भावं वदंति॥ तथा एकमेवांतः करणं वर्तते
६५ भेदाच्चतुर्विधं मनोबुद्धिचित्ताहंकाराश्चेति चतुष्टयमितितत्र मनोबुद्धेरहंकारचित्तयोरंतर्भावं वदंति॥ तस्मात्सप्तदशावयवंलिंगमितिसिद्धं॥ उदाहृतश्रुतीनां व्यवस्थातु आकरतोज्ञेयाविस्तरभयान्नात्रोच्यते॥ अत्रनवीनाःइंद्रियं क्षणं अन्यदेवयदंति॥ तच्चेदं॥ स्वदुःखानुकूलसाक्षात्प्रतिक्रियान्यतरकरणमतींद्रियमिंद्रियं॥ आलोकादेरतिव्याप्तिवारणायअतींद्रियमित्युक्तं॥ दृश्येंद्रियाणामपिविशेषलक्षणानि॥ तत्रशब्दोपलब्धिसाधनमिंद्रियं श्रोत्रं॥ स्पर्शोपलब्धिसाधनमिंद्रियं त्वक्॥ ६५
रूपोपलब्धिसाधनंइंद्रियं चक्षुः॥ रसोपलब्धिसाधनंइंद्रियंरसनं॥ गंधोपलब्धिसाधनमिंद्रियं घ्राणं॥ वचनक्रियासाधनमिंद्रियंवाक्॥ आदानक्रियासाधनमिंद्रियंपाणि॥ गमनक्रियासाधनमिंद्रियंपादौ॥ विसर्गसाधनमिंद्रियंपायू॥ स्वक्रियासाधनमिंद्रियंउपस्थः॥ अन्नतेजोमयीवागितिश्रुतेस्तेजसीवाक्॥ पार्थिवनाभासइतिकेचित्॥ अन्येतुशाब्दव्यंजकत्वेनश्रोत्रवच्चसोनाभसत्वं॥ पार्थिवकिरणयाचक्षुषःस्वास्थ्यदर्शनात्चक्षुर्वत्पार्थिवत्वमपितैजसत्वंयुक्तमित्याहुः॥ अनुमानविचारत्वादत्रात्यंतंनाभिनिवेष्टव्यमितिदिक्॥ ६६॥ अन्येभ्योपिमनोधर्मेभ्यआत्मानंविविच्यकरतलामलकवदपरोक्षतयातंदर्शयति॥ श्लोक॥ अमनस्कतयानमेस्तिचिंतानचकामोनचधीर्नभीर्नलज्जा॥ नसमाधिविरोधभावनावायतएतेनदृढंविभांतितेजः॥ १००॥ कामः

६८ संकल्पोविचिकित्साश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंमनएवेतिश्रुतेरात्मधर्मांतेन॥
किंतुमनसः॥तत्रचिंतात्मीययोगक्षेमोपायालोचनासामेनास्ति॥तथाकामोभिलाषः॥चे
ष्टापरंधीःनिश्चयात्मिकाचपुनःभीर्भयंतथाकृज्जाप्रसिद्धातथासमाधानंविरोधोवैरं
विक्षेपोवाभावनाध्येयाकारावृत्तिरेतेन्येपिसर्वेमद्धर्माभवंतीत्यर्थः॥तत्रहेतुमाह॥
अमनस्कतयामनः साक्षितयातद्विलयेत्यर्थः॥तदेवंनिर्विशेषेधर्मकआत्मा
कथंलक्षणीयइत्यतआह॥यतएतेउक्ताश्चिंतादयोधर्माःमनोधर्माःमनोधर्मिसहिताः
विभांतिप्रकाशंतेयेनैषांसिद्धिर्भवतीत्यर्थः॥तन्नेजोज्ञानिरहमात्मेतिस्वप्रकाशतयेवल्क ६८
क्षणीयइतिभावः॥तथाचश्रुतिः॥यन्मनसानमनुतेयेनाहुर्मनोमतंतदेवब्रह्मत्वंविद्धि

---

नेदंयदिदमुपासतेइति॥तथापतंजलिसूत्रमपि॥सदाज्ञाताश्चित्तवृत्तयस्तत्प्रभोःपुरुष
स्यापरिणामादिति॥१००॥अस्याध्यासात्स्थूलदेहादिबंधइत्यर्थंतद्व्यवस्थतयाप्रतिपा
द्यते॥श्लोक॥यथामणिःस्वाश्रयनीलपीतद्रव्यादियोगेनविचित्रवर्णः॥आत्मातथास्वा
श्रयलिंगकर्मदोषैरनेकैर्बहुधेवभाति॥१॥आत्माचिदाभासरूपोजीवःस्वाश्रयलिंग
कर्मदोषैःपुण्यपापैरनेकैर्बहुसंख्याभिःसंसारस्यानादित्वात्बहुधेवबहुप्रकार
मिवभातिइवशब्दान्नवस्तुगत्याबहुधास्वरूपमस्त्येवेत्यर्थः॥तथाचश्रुतिः तदेवसक्तः
सहकर्मणैतिलिंगंमनोयत्रनिषक्तमस्य॥प्राप्यांतंकर्मणस्तस्ययत्किंचेहकरोत्ययं॥
तस्माल्लोकात्पुनरेत्यस्मैलोकायकर्मणइतिनुकामयमानइति॥अस्याःश्रुतेरर्थःअस्योद्भू

६७ तान्निलाषस्यलिंगंसप्रदर्शयत्यात्मकंमनःप्रधानत्वात्मनः शब्दत्वाच्चयत्रयस्मिन्गंत व्येफलेनिषक्तंनिश्चयेनसक्तंभवतितत्रसक्तःआसक्तस्तत्फलारंभकीभूतकर्मणासहतदेव गंतव्यंफलमेति॥नचएतद्भोगानंतरंकामाभावान्मुक्तोभविष्यतीयतआह॥अयंफलासक्तःकामीइहास्मिन्लोकेयत्किंचित्किंरोतितस्यकर्मणोभोगेनअंतंअवसानंप्राप्यतस्माद्भुक्तभोगात्पुनरेतागच्छतिअस्मैअस्मिन्मनुष्यलोकेकर्मणेकर्मकरणार्थंएवंमनोधर्मकामसाधारणंसंसारमुपसंहरतिइत्येवंनुकामयमानइत्यर्थः॥१॥बृहदेवेत्यक्तंत देवदर्शयति॥श्लोक॥देवस्तिर्यक्मर्त्यसंज्ञोडुंजादीर्योनीःक्लृप्यन्नेवविश्रांतिरासीत्॥ लिंगाध्यासाद्यापकस्यापियातायातेनैनेवस्कृतोमेभवंति॥२॥देवयोनिस्तथातिर्यग्योने ६७

र्मर्त्यसंज्ञोमर्त्ययोनिरंडजादियोनीरादिशब्देनचतुरशीतियोनीरहमेवक्लृप्यन्लिंगाध्या सात्एतादृशस्यमेममकदापिनविश्रांतिरासीत्॥तस्मादेवहेतोर्व्यापकस्यापिगमनागमना योग्यस्यापियातायातेमेअभूतांअहोलिंगाध्यासस्यसामर्थ्यमेतदिति॥नस्कृतस्कृपरमार्थतःस्वस्यासंगत्वव्यापकत्वज्ञानादेतेममकालत्रयेपिनभवेतांनस्तः॥यद्वाएतेनिरूपितानानायोनिसंबंधाअपिवस्कृतोमेनभवंतीत्यर्थः॥२॥ननुलिंगस्यकर्मदोषैरेवनानायोनिसंबंधस्तत्कथंनीश्वरवादःप्राप्नोतीयतआह॥श्लोक॥कर्माध्यक्षःसर्वलोकाधिवासोह्यंतर्यामीनर्तयेत्सूत्रधारः॥तस्मात्प्राणीनटवेषासनाभिस्त्वाभिस्त्वांतोयोनिमायातिमूढः॥३॥कर्माध्यक्षःकर्मफलदातासर्वलोकाधिवासोऽंतर्यामीसूत्रधारइवप्राणि

७० नांनर्त्तयेत्स्मात्प्राणीजीवोवासनाभिःपूर्वसंस्कारैर्नृत्यतेतादृक्कर्मकरोतीत्यर्थः॥
तंवि द्याकर्मणीसमन्वारभेतेपूर्वप्रज्ञाचेतिश्रुतेस्ताभिर्वासनाभिरेवतांतांयोनिमाया
तिप्राप्नोतिमूढोऽविद्यावशः॥यंयंवापिस्मरन्भावमितिस्मृतेश्चेत्यर्थः॥तथाचकर्माध्य
क्षश्रुतेरनीश्वरवादोनघटतइत्यर्थः॥एतेनअपूर्वमेवकर्मफलंमीमांसकमतेदृ
ष्टमितिमंतव्यंपरास्तंनिर्मूलादितिध्येयं॥३॥प्रसंगान्मरणावस्थादुःखंनिरूप्यतेज्ञानोपियो
ग्यधिकारिणंप्रत्युपदर्शनात्॥श्लोक॥देहात्रियंसर्वमर्मस्थलेभ्योदुःखंयच्चयातिदेहं ७०
तिरंतत्॥एवंमर्मस्थोर्मूलकमाप्नोंजिवःस्वात्माज्ञानात्प्रीयतेतन्नमेस्ति॥७॥तत्स्वात्माज्ञो
नकार्यसूतेलिंगं॥७॥एवंलिंगदेहादात्मानंविविच्यकारणदेहादपिसर्वबीजभूताद्वि

---

विच्यते॥न्यग्रोधबीजमिवयत्खलुसर्वबीजंनोसन्नचोभयसन्नविरोधहेतोः॥ज्ञा
नैकनाश्यमखिलावरणस्वभावंनाहंतदास्मिपरमंतमसःपरस्तात्॥५॥यत्खलुनिश्चयेन
सर्वबीजंसचैवसेपबीजंकारणंमूलाज्ञानंतत्अहंन॥अहमात्मातत्साक्षित्वा
दित्यर्थः॥तद्बीजंनसत्॥ज्ञानैकनाश्यत्वात्॥नचासत्प्रतीयमानत्वात्॥नचोभ
यंविरोधात्॥तस्माद्यत्किंचिदेतत्अखिलंब्रह्मचैतन्यंज्ञातेवरणस्वभावंत
दाश्रयंचेतिऊह्यंचैतन्याश्रयविषयमित्यर्थः॥तदहंनतत्रहेतुमाहतमसः
परस्माद्ज्ञानस्यपरस्तात्यत्परमुत्कृष्टंसत्सन्मात्रंब्रह्मतदहंमस्मीत्यर्थः॥य
तमसोभासकंतत्कथंतमः स्याद्ज्ञानस्यभासकयोरैक्ययोगादितिभावः॥५॥

७१ आदित्यवर्णंतमसः परस्तादिति श्रुत्यर्कं यत्सयक्स्वरूपंनत्रयादि विवादे
अन्यथाबुद्धेर्बीजमाह ॥श्लोक॥अज्ञानधीप्राणहृषीकदेहैःसयक्चिदाभास
विशेषवादिनः॥आत्मत्वबुध्याविवदंतिमूढाःसयक्स्वरूपंनविदंतितत्वतः॥
१॥हृषीकाणींद्रियाणिहृदेकवद्भावः॥उक्तंच॥आत्मछायंपयोऽशेषंयथाम
रकतोमणिः॥परिक्षणायप्रक्षिप्तःकुर्यादात्मातथैवहि॥१॥ज्योतिरात्माचि
त्छायंप्रथमंकुरुतेतमः॥तमोयोगेनधीस्तद्वद्धीयोगादिद्रियंतथा॥२॥अक्ष ७१
योगात्तथादेहयोगमतेचिदात्मवत्॥भ्रांतेतेस्वतःपुंसांप्रत्यगात्मत्वविभ्रम
इति॥३॥यादिविप्रतिपन्नंस्वेवंपूर्वार्धार्थैर्विविच्यदर्शिताः॥तथाहि॥अति

प्राकृतस्कआत्मावेपुत्रइत्यादिश्रुतेः॥स्वस्मिन्निवस्वपुत्रेपिप्रियत्वदर्शनात्पु
त्रेनष्टेपुष्टेअहमेवनष्टःपुष्टश्चेत्यनुभवात्पुत्रआत्मेतिवदंति॥चार्वाकास्क॥
सवाएषपुरुषोन्नरसमयइत्यादिश्रुतेः॥प्रदीप्तगृहात्स्वपुत्रंपरित्यज्यापिस्व
स्यनिर्ममदर्शनात्॥स्थूलोहंकृशोहंमित्यात्मानुभवाच्चस्थूलशरीरमात्मेति
वदंति॥अपरश्चार्वाकः॥नेहप्राणाःप्रजापतिमेयब्रूयुरित्यादिश्रुतेः॥इंद्रियाणां
अभावेशरीरचलनाभावात्॥काणोहंबधिरोहमित्यात्मानुभवाच्च॥इंद्रिया
त्मेति ण्यात्मेतिवदं॥अपरश्चार्वाकः॥अन्योंतरआत्माप्राणमयइत्यादिश्रुतेः॥प्राणाभा
वेइंद्रियचलनायोगात्॥अहंअन्नवानहंपिपासावानित्यात्मानुभवाच्च॥प्रा

७२ ण आत्मेति वदंति ॥ अपरश्चार्वाक स्तु ॥ अन्योतर आत्मा मनोमय इत्यादि श्रुतेः ॥ मनसि स्फुरेत्प्राणपानादेरभावात् ॥ अहं संकल्पविकल्पवानित्यानुभवाच्च ॥ प्र
न आत्मेति वदंति ॥ बौद्धस्तु अन्योतर आत्मा विज्ञानमय इत्यादि श्रुतेः ॥ कर्त्रभावे
करणस्य शक्त्यभावात् ॥ अहं कर्त्ता ऽहंभोक्तेत्यानुभवाच्च ॥ बुद्धिरात्मेति व
दंति ॥ प्राभाकरतार्किकौ तु ॥ अन्योतर आत्मानंदमय इत्यादि श्रुतेः बुद्ध्यादीना
मज्ञानेलयदर्शनात् ॥ अहंअज्ञोहंन जानामीत्यनुभवाच्च ॥ अज्ञानमात्मेति ७२
वदंतः ॥ भाट्टास्तु ॥ प्रज्ञानघनएवानंदमय इत्यादि श्रुतेः ॥ सुषुप्तौ प्रकाशाऽप्र
काशस्वभावात् ॥ मामहंन जानामीत्यनुभवाच्च ॥ अज्ञानोपहितचैतन्यंज्ञाना

---

ज्ञानस्वरूपंआत्मेतिवदंति ॥ अपरेबौद्धस्तु ॥ असदेवेदमग्र आसीदित्यादि श्रुतेः ॥ सुषु
प्तौ सर्वाभावात् अहं स्फुरितस्य स्वाभावपरामर्शविषयानुभवाच्च ॥ शून्य
मात्मेतिवदंति ॥ एवं सतितेषुतेषूपाधिषुप्रत्यक्चिदाभासबलेन ॥ तंतमुपाधिमात्मबु
ध्याविवदंति ॥ परंतुतत्तत्प्रत्यक्स्वरूपंब्रह्मेतिनवदंति पंडितंमन्यत्वादित्यर्थः ॥ ६ ॥
क्षुधाद्यूर्मयः सर्वेप्युपाधेरेवनात्मनइतिसर्वविकाररहितमात्मानंदइतियति ॥ श्लो०
॥ अस्योः क्षुत्पिपासेचियः शोकमोहौजरामृत्युरोगाः शरीरस्यजन्म ॥ अवस्थासुषुप्तार्
योपाधियस्ताः समस्ताअहंनिर्विकारोस्मिशांतः ॥ ७ ॥ अस्योः प्राणस्यसंचारवाङ्
त्यागमनादिश्रमेसतिक्षुत्पिपासेस्तः प्रसिद्धे ॥ ते क्षुत्पिपासे प्राणधर्मौना

७३ त्मनइत्यर्थः॥ इष्टवस्तुनामप्राप्तौबुद्धेर्योऽनवस्थितिः सशोकइत्युच्यते॥ विषय
भ्रमोमोहस्तादृभावापिबुद्धिधर्मोनात्मनइत्यर्थः॥ जराशरीरस्यधर्मः॥ क्षुत्पिपासे शोकमोहौ जरा
मृत्युषड्मयोवह्दारण्यकोक्ताउपाधिछतानात्मनइत्यर्थः॥ क्षुदुपद्रवादन्नभोक्तापा
णोदेहेंद्रियाणिपुष्णाति॥ तदुक्तं॥ तर्पयेषःयागादिन्स्वमुक्तान्नेनसर्वशः॥ इत्यर्थस्यकु
तःसिद्धिरितिचेदुच्यतेश्रणु॥ भुक्तंत्रिधाभवत्यन्नंस्थूलमध्यमसूक्ष्मकैः॥ भागःस्थू
लोबहिर्यातिमध्यमाद्देहपोषणं॥ अणीयान्सूक्ष्मनाड्यस्थोदेवताःपोषयत्ययं॥ पुष्टेंद्रि ७३
यैःस्वयोत्पत्तिर्यतोजीवात्मनएवसातएवंदेवताःसमदशाज्ञानक्रियात्मकाः॥ सोयं

समदशाग्राह्योभोक्तुःकरणलक्षणइति॥ एवंजठरितान्नस्यप्रयोजनंदेहेंद्रियपोषणमतोहं
निर्विकारएवास्मीत्यर्थः॥ सुषुप्त्यादयःसमस्ताजाग्रत्स्वप्नसुषुप्तिमूर्छामरणाख्याअ
वस्थाःपंचधियोबुद्धेरहंशब्दप्रत्ययावलंबनःप्रत्यगात्मात्मपदार्थोनिर्विकारःकू
टस्थत्वादधिक्रियोनिस्तरंगाब्धिरिवशांतःपरमार्थतइत्यर्थः॥ कथमवस्थाःबुद्धे
स्तदर्थतल्लक्षणामुक्तानिजाचार्यैः॥ देवतानुग्रहीतैरिंद्रियैरर्थोपलब्धिर्जागरितं॥
जागरितसंस्कारजःप्रत्ययःस्वविषयःस्वप्नः॥ स्मृतावतिव्याप्तिवारणायस्वविषयप
दं॥ बुद्धेःकारणात्मनावस्थानंसुषुप्तिः॥ हृन्नाड्यिंद्रियगाबुद्धिर्निद्रास्वप्नप्रबोधकारिस्फ
टैर्बुद्धेरेवावस्थात्रयं॥ देवतानुग्रहीतैरितिकिमर्थमुक्तमितिचेत्तत्रोच्यते॥ यथाऽन्ये

७५ तनोरथश्चेतनसारथिंविनाननकार्यक्षमः॥तथाअचेतनानींद्रियाणिचेतनदेवतानु
ग्रहंविनास्वार्थग्रहणयोग्यानीति॥यथारथस्यामिनोरथजस्यसुखदुःखभोक्तृत्वंन
सारथेः॥तथाजीवस्यैवभोक्तृत्वंनेंद्रियदेवतानांइतिआकरेविस्तरः॥एतदवस्थात्रय
विस्तरेणप्रपंचितंपंचीकरणवार्तिकेविस्तरभयान्नेहप्रपंच्यते॥मुद्गरप्रहारादिज
नितविषादेनविशेषज्ञानोपरमावस्थाइयंमूर्छा॥इयंमूर्छावस्थाभगवताबादरायणे
नसूत्रयतानिरूपिता॥तथाचसूत्रं॥मुग्धेर्धसंपत्तिःपरिशेषादिति॥अस्यार्थः॥नतो
वत्स्यमजागरितेमूर्छायस्यानापिमरणावस्थाप्राणोष्मणोःसत्वान्नापिस्वप्नेनिर्वैल
स्यात्मुग्धस्यशरीरेकंपोभयंकारंवदनंनिश्चलेउन्मीलितेनेत्रेनिश्चलःप्राणोव

MEMORIAL

तिष्ठतेनैवंसुषौभवतितस्मात्परिशेषात्॥अर्द्धसंपत्तिर्मुग्धावस्थातिरिक्तैवक्तव्या॥
ननुमुग्धेपिवाह्यांतःकरणानांअभावेनसंपन्नेःसुप्त्यविशेषात्कथंअर्धसंपत्तिरि
तिचेत्॥सत्यं॥नहिब्रह्मणोर्धसंपत्तिंमुग्धस्यब्रूमःकिंतु॥सुषुप्त्यवस्थायांयैर्धर्मैःप्र
सन्नवदननिमीलितनेत्रत्वप्राणोछ्वासविशेषविज्ञानराहित्यादयः॥तत्रविशेषविज्ञा
नराहित्यादिनार्द्धेनधर्मजातेनमूर्छावस्थायाःसंपन्नत्वादर्द्धेनमरणावस्थाधर्मजाते
नकंपादिनायुक्तत्वादर्द्धसंपत्तिमूर्छेतियुक्तंसूत्रकृद्वचनमिति॥एतच्छरीरकर्मोपरमेण
देहाभिमाननिवृत्तासंपीडितकरणग्रामावस्थाभाविशरीरपर्यंतंमरणावस्था॥तथो
चश्रुतिः॥सयत्रायमात्माबन्धनेपसंमोहमिवैत्यथैनमेनेप्राणाआभिसमायंतिसएना

७५ स्तेजोमात्राः समभ्यादत्तोदृश्यमेवान्वयक्रामतिसयत्रैषचाक्षुषः परादुःपर्यावर्त्ततेत
र्हिरूपज्ञोभवतिरेकीभवतिनपश्यतीत्याहुरेकीभवतीत्या
दिः॥ श्रुतेरर्थः॥ सपूर्वोक्तोयमात्मा यत्रयस्मिन्कालेजरा द्धक्तृहेतुभिरभिभवेसतिअ
वत्यमिवअवत्यभावमिवदौर्बल्यमिवनितरामेयप्राप्यसंमोहमिवसंमूढतामिवए
तियथतदाएनमात्मानंकरणस्वामिनंप्राणावागाद्योभिसमायंति॥ कथंसआत्मा
तेजोमात्राअवयवाःमीयंतेविषयायाभिस्तास्तेजोमात्राश्चक्षुरादिकरणानिसम ७५
भ्यादत्तःसम्यक्तनिःशेषाभिमुख्येनादत्तःउपसंहरमाणोदृदयमेवहृदयाव
स्थांबुद्धिमेवव्याचक्राणतिअन्यागच्छति॥ बुद्ध्यावेयाभिव्यक्तविज्ञानोभवति॥ एंवसति

किंस्यादितिवीक्षायांआह॥ सचाक्षुषःपुरुषआदित्यांशोभोक्तृकर्मक्षयेसतियत्रयस्मि
न्कालेपराङ्मुखःसन्॥ नस्यांशीभूतदेवतारूपंप्रतिपर्यावर्त्ततेआसमंताद्भावेनप
रिवर्त्ततेअथतदामुमूर्षुररूपज्ञोभवतिरूपंनजानातीत्यर्थः॥ कुतइत्यताआह॥ एकीभव
ति॥ आदित्यांशास्तस्मिन्नेकीभूतेसतिचक्षुर्लिंगात्मनाएकीभवतितदामुमूर्षुःपार्श्व
स्थान्नपश्यतीत्याहुरेवमग्रेपीत्यर्थः॥ एवंश्रुत्यानुभवप्रामाण्यात्समस्ताअवस्थाबुद्धे
रिसक्ताः॥ ७॥ त्रिविधपरिछेदशून्यत्वंश्रुत्याअनंतशब्देनोक्तंतदात्मनोदर्शयति॥ श्लो
क॰॥ कालेयन्तानास्तिमेनित्यताद्देशेयन्तानास्तिमेव्यापकत्वात्॥ सर्वात्मत्वान्ना
स्तिमेवस्तियन्तानंतस्तस्मात्कोनमांतस्यवेत्ता॥ ८॥ नित्यत्वात्कालपरिछेदशून्यत्वं

७६ सर्वदेशघनुस्यूतत्वात्तादृशदेशपरिछेदराहित्यंपरिछेदस्यमिथ्यात्वादित्यर्थः॥ कल्पितानामनात्मनामवास्तवरूपत्वाद्वस्तुपरिछेदशून्यत्वमित्यर्थः॥त्रिविधपरिछेदस्यापितत्तत्कल्पितत्वेनमिथ्यात्वादितिभावः॥ कर्मवशात्तत्तदुपाधीनामंतःकरणतदृत्त्यादीनांभिन्नत्वात्तदुपाधिकचिदाभासस्यापिभिन्नत्वाद्देशतःपरिछेदः॥तत्तदुपाध्यंतःकरणतद्वृत्तीनांजन्मविनाशशालित्वेनतदुपाधिकचिदाभासस्यापिजन्मविनाशशालित्वात्कालतःपरिछेदः॥तत्तदंतःकरणवृत्तीनांपरस्परतादात्म्यप्रतिषेधेनतत्तदुपाधिकचिदाभासानामपिपरस्परतादात्म्यप्रतिषेधात्वस्ततःपरिछेदः॥ एवंशरीरांतर्गतत्रिविधपरिछेदंज्ञात्वायथोक्तरीत्यानिषेधोद्वैयः॥ ७६

॥८॥ द्रष्टृत्वसाक्षित्वस्सविकाररहितंआत्मनोदर्शयति॥श्लोक॥ द्रष्टानाहंदृश्यमिथ्यात्वहेतोर्नाहंसाक्षीसाक्ष्यमिथ्यात्वहेतोः॥ प्रत्यक्सिध्यैदृश्यतोऽन्यत्वसिध्यैद्रष्टासाक्षीचेतिबोधोगुरुभ्यः॥९॥ द्रष्टृत्वंसाक्षित्वंचेति सप्रतियोगिकंभवतिप्रतियोग्यभावेतुनोभयमित्यर्थः॥ननुतर्हिगुरुभिःश्रुतिद्वारैवद्रष्टासाक्षीचेतिकिमर्थंशिष्योबोध्यतेइत्यतआह॥ कःप्रत्यगात्मेतिशिष्येदृष्टेसतितद्बोधार्थंयोवाह्यपदार्थोयभासकःसद्रष्टाआत्मेतिकथ्यते॥ यश्चांतःसुखादिविषयावभासकःससाक्षीआत्मेतिगुरुणाबोधितेसतिद्रष्टासाक्षीअहमस्मीतिप्रत्यक्सिद्धिर्भवति॥ चेत्यपरमेयंगुरुबोधादृश्यात्अन्यआत्मेतिचसिध्यति॥अतोद्रष्टासाक्षीतिगुरुभ्योबोधोयुक्तः॥ वस्तुतस्तुनद्रष्टानापि

७७ साक्षीचेत्यर्थः॥९॥ शरीरस्य जन्मजरादयो धर्माइत्युक्तं तत्रतावज्जन्मलक्षणं दर्शयति॥श्लोक॥लिंगोपाधेरात्मनोयःप्रवेशःपित्रोर्देहेजन्मचेतन्मरणं॥एकाध्यासात्तंविवेकेनहिलासम्यक्ज्ञानान्नैवमेजन्मशंका॥१०॥लिंगदेहोपाधेरात्मनश्चयेकाध्यासादित्यर्थः॥लिंगोपाधेरात्मनश्चपूर्वोक्तरीत्यातंयेकाध्यासंहित्वाअहंब्रह्मास्मीतिसम्यक्ज्ञानान्नजन्मशंकेत्यर्थः॥एवंऐतरेयश्रुतोजन्मश्रूयते॥पुरुषेहवायमादितोगर्भोभवतियदेतद्देतत्सर्वेभ्योंगेभ्यस्तेजःसंभूतमात्मन्येवात्मानंबिभर्तितद्यदास्त्रियांसिंचत्यथैनज्जनयतितदस्यप्रथमं जन्मेति॥तस्मात्पूर्वोक्तविवेकेनज्ञात्वाचिदेकरूपत्वविवेकेननिःसंशयाविपर्ययान्नश्च ७७

यान्मेममजन्मशंकापिनास्तिअतःकुतोजन्मप्राप्तिरित्यर्थः॥१०॥मृतिंक्षयति॥श्लोक॥पित्रोर्मेलोहितनोरसूनांवियोजनंकर्मवशात्सुखः॥आस्तांकिमेतेनहिसाक्षिणोमेसुखोःपरंसुखरहंसदास्मि॥११॥यदिदेहप्राणयोर्मेदृश्ययोर्वियोजनंजातंतर्हिसाक्षिणोमेममैतेनकिंनकिंचिदित्यर्थः॥अतस्त्वयथातथास्तां॥अहंसुखसाक्षीयत्परंउत्पत्त्यादिरहितंसन्मात्रंब्रह्मतदस्मिअतोमेसुखोरपिसुखरहमस्मीत्यर्थः॥११॥संप्रतिप्रमातृत्वरूपविकारविरहितस्वंपदलक्ष्यआत्मेतिप्रतिपाद्यते॥श्लोक॥प्रत्यक्चायाव्याप्तधीवृत्तियोगोवाह्यार्थानामिंद्रियैःकर्मतःस्यात्॥तस्मिन्काले भात्यवस्तुप्रमातातस्मान्नाहंवस्तुतोस्मिप्रमाता॥१२॥भोगप्रदकर्मतःइंद्रियैर्वाह्यार्थानां

चराद्दीनां प्रत्यक्चिदाभासव्याप्तधीवृत्तियोगो यदाभवतितस्मिन्नेवकालेऽहं
प्रमातातदन्यकालेसमाधौसुप्तौवानअतोहंवस्तुतोनैवास्मिप्रमातासंदिर्थः॥१२॥
प्रमातृत्वनिबंधनं कर्तृत्वं भोक्तृत्वंचतदभावेनकर्त्तानापिभोक्तानैवोभयमपास्तम
इत्याह॥श्लोक॥कर्त्ताभोक्ताहंप्रमात्रैकमूलस्तस्याभावेनैवकर्त्तानभोक्ता॥कादाचि
त्कंमय्यसंगेसमस्तंसंसाराख्यंभ्रांतिमूलंचनास्ति॥१३॥प्रमातृत्वकर्तृत्वभोक्तृत्वरूपं
यत्संसाराख्यंतत्कादाचित्कंमयिअसंगस्वरूपेवस्तुतोनास्तीत्यर्थः॥कर्त्ताहंभोक्ता
हमित्यादिभ्रांतिनांतत्प्रमातृत्वंमूलंनिदानमित्यर्थः॥१३॥ननुआभासस्यैवप्रमात्रादि ७८
रूपेणबंधत्वाच्छुद्धचैतन्यस्यमुक्तत्वाद्बंधमोक्षयोर्वैय्यधिकरण्यंतथाचस्वनाशार्थं

---

प्रवृत्त्यनुपपत्तेश्चेतिदोषद्वयंप्राप्तंअतआह॥श्लोक॥एतद्द्वारारोपितश्चाविवेकात्संसारो
यंकर्तृभोक्तृस्वभावः॥शुद्धेनत्वेचाधुनासद्विवेकाद्भूमैवाहंसर्वसंसारमुक्तः॥१४॥स्व
चिदाभासद्वारशुद्धस्यैवबंधमोक्षकल्पनानस्वतइतिभावःअतएवोक्तंआचार्यैः॥
अज्ञानान्मानसोपाधेःकर्तृत्वादीनिचात्मनि॥कल्प्यंतेबुद्बुदेचंद्रेचलनादियथांभास
इति॥वार्त्तिकेपि॥अयमेवहितेनर्षेयत्संसार्यात्मदर्शनमिति॥१७ शास्त्रेस्वाश्रयाव्या
मोहिनीमायेत्युच्यते॥स्वाश्रयव्यामोहिन्यविद्येतुच्यते॥साचअविद्यायावद्दृढवि
वेकेन॥तावत्पर्यंतमेवस्वाश्रयंजीवंमोहयतिअन्यथानेत्याह॥श्लोक॥यापास्वाश्रयं
मोहयेन्नैवमायाविशुद्धंपरंब्रह्मगोपालरूपाख्यां॥विवेकदृढाच्छास्त्रतःसद्गुरूक्ता

तथा स्वाश्रयं मोहयेन्नाप्यविद्या ॥ १५ ॥ यथोक्ताद्विवेकाच्चिज्जडग्रंथिरूपस्याहंकारस्यनिवृत्तत्वाज्जीवोहंकर्त्ताभोक्तेत्यादिरूपंस्वाश्रयंमोहकत्वंपूर्ववदविद्यायाःनसंभवतीत्यर्थः॥ अन्येतुएकस्यैवाज्ञानस्याधिदैविकीशक्तिर्मायाआध्यात्मिकीशक्तिरविद्येतिमायाविद्ययोःशक्तिभेदेनभेदोनस्वरूपेणेत्याहुः॥ १५ ॥ अथआत्मप्रपंचयोःस्वरूपविवेकमाह॥ श्लोक॥ ज्ञानंहियन्निर्विषयंसआत्मासगोचरंज्ञानमिहप्रपंचः॥ सगोचरज्ञानवतांनराणांदुःखंभयंजन्ममृतीच ७७
निसं॥ १६॥ अरेइदंमहद्भूतमनंतमपारंज्ञानघनएवेतिश्रुतेः॥ जात्यंतरात्ननुविद्वन्नि मात्रंनिर्विषयंएकरसंज्ञानंचैतन्यंसआत्मेत्यर्थः॥ यत्रत्वस्यसर्वमात्मैवाभूत्त



केनकंपश्येदितिश्रुतेः॥ यत्रहिद्वैतमिवभवतितदितरइतरंपश्यतीत्यादिश्रुतेःसविषयंज्ञानंप्रपंचःईश्वरोपिसर्वज्ञत्वात्सर्वपदार्थरूपविषयस्फोरकत्वात्प्रपंचांतर्गतएव॥ छांदोग्यश्रुतौयत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानातिसभूमाथयत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानातितदल्पंइत्यत्रैनिर्विषयंचैतन्यंआत्मासविषयंज्ञानंप्रपंचइतिप्रतीयते॥ तत्रसगोचरज्ञानवतांप्रापंचिकानांनराणांदुःखभयादिनीत्यनियमेनेत्यर्थः १६॥ अतएव॥ श्लोक॥ ब्रह्मात्मनामेनहिकृत्रिमास्तिजीवत्वमेतन्मनसैवकल्पितं॥ अकृत्रिमःकृत्रिमएवभातिस्त्रीवेषधारीपुरुषोयथातथा॥ १७॥
सएषइहप्रविष्टआनखाग्रेभ्यइत्यादिश्रुतिषुब्रह्मणःप्रवेशस्मरणाज्जीव

८० स्वब्रह्मत्वमकृत्रिमंस्वाभाविकं॥ जीवत्वंतु कृत्रिमंस्वस्वरूपाज्ञानादित्यर्थः॥ दृष्टांतःस्प
ष्टः॥ १७॥ एवंअकृत्रिमंब्रह्मानंदस्वरूपंप्राप्यकृत्रिमसुखेवैषयेंद्रियसंयोगजन्यान्सं
भवेनकिंचित्प्रयोजनमित्याह॥अकृत्रिमानंदनिजस्वरूपंविहायकिंकृत्रिमशर्म
भिर्मे॥सिद्धोदनंपात्रगतंविहायमूढोह्यसिद्धायतेततद्वत्॥ १८॥ स्पष्टार्थः॥ कृ
त्रिमसुखस्यापिजाग्रदंतयोःक्लेशरूपत्वंआह॥श्लोक॥नानाक्लेशैःसोमपानादि
कृत्वास्वर्गंगत्वाकृत्रिमंशर्मभुंजन्॥स्वर्गेतिष्ठन्प्रसहंपुण्यहानात्क्लिश्यन्नेवंमर्त्य
लोकंप्रयाति॥ १९॥स्वर्गभोगविशेषभूमिंगत्वाधूमादिमार्गेण॥तत्रप्राप्यकृत्रिमंवि
षयेंद्रियजन्यंसुखंभुंजन्यतनइत्यर्थः॥पुनश्चस्वर्गेतिष्ठन्नपिप्रसहंपुण्यहाना

---

त्क्लिश्यन्श्रुत्युक्तावरोहमार्गेणानुशयीजीवोमर्त्यलोकंप्रयाति॥ १९॥ क्षीणे
पुण्येमर्त्यलोकेविशंतीतिस्मृतेः॥श्रुतिस्त्वेवं॥अथैतमेवाध्वानंपुनर्निवर्त्तंते॥यथेतमाका
शंआकाशाद्वायुंवायुर्भूत्वाधूमोभवतिधूमोभूत्वाभ्रंभवतिअभ्रंभूत्वामेघोभवति
मेघोभूत्वाप्रवर्षतिनइहव्रीहियवाओषधिवनस्पतयस्तिलमाषाइतिजायंतइति
॥आकाशवायव्यादिसमानाभवंतीत्यर्थोबोध्योनत्वाकाशैकरविस्तरेः॥ १७॥ए
वमानंदयोःक्लेशज्ञानेपिनवैराग्यलेशइत्यतआह॥श्लोक॥जानन्नेवंनास्तिवैराग्य
लेशःकेयंभ्रांतीराजसीवानिरुग्ना॥आस्तामेतद्रामकृष्णप्रसादान्निस्यानंदःकृष्णएवाह
मस्मि॥ २०॥परदोषगवेषणमास्तांकिंममतेनेतिभावःस्पष्टमन्यत्॥ २०॥संसारनिंदापूर्व

८१ कं स्वस्य गुरुप्रसादेनपरमानंदं प्राप्तिं दर्शयति॥ श्लोक॥ धीकृसंसारमिमं नयत्रपरमं शंर्मा
नदलं स्तियलभ्यतेयद्यस्यद्यतिजिघ्रतीहसकलंदुःखेनसंभिद्यते॥ किंमेतादृशशर्मणाधपरमा
नंदोगुरोःसंस्मृतेःसंप्राप्तोस्त्यधुनाद्यसोश्रुतिगतोमन्तोन्ननोभिद्यते॥ २१॥येहिसंस्पर्शी
जाभोगादुःखयोनयएवतइतिस्मृतेः॥ दुःखसंभिन्नाएवेत्यर्थः॥ स्पर्शेजाभोगाःक्षु
द्रानंदाइत्यर्थः॥ श्रुतिगतःश्रुतिसंमतइत्यर्थः॥ अत्रास्मिन्वर्त्तमानदेहेइत्यर्थःसंप्राप्तइत्यनेन्या
स्वर्गादिवत्कर्मफलप्राप्तिरिवतस्यप्राप्तिरिति प्राप्तेतन्निवारणार्थमाह॥ मन्तोनाभिद्यते॥
मन्तःश्चैतन्यघनान्नभिद्यते,विद्यानिवृत्तेरित्यर्थः॥ तदलंइत्यपिपाठःतत्रंधग्रहणा ८१
दिअलंअत्यर्थंदुःखेनसंभिद्यतेइत्यर्थः॥ २१॥ दुःखेनसंभिद्यतेइत्युक्तं॥ तत्रहेतुमाह

॥श्लोक॥अकर्तापिसन्कर्तृतांप्राप्यमोहात्कृतंकर्मतस्यात्रपाकोयमीदृक्॥ इदानींमकर्त्तात्मबो
धेनसम्यक्प्रसादाद्गुरोर्भूममात्रोहमस्मि॥ २२॥ यद्यस्यद्यतिजिघ्रतीहसकलंदुःखेनसंभि
द्यतेइत्युक्तंतत्रसुखादिप्राप्तिरकर्मविनानसंभवतितत्कर्मपरमार्थतोऽकर्त्तापिमोहात्कृ
तंतस्यात्रसंसारेईदृक्दुःखेनसंभिन्नोनुभूयतेपाकःकर्मविपाकइत्यर्थः॥ शेषंस्पष्टं॥
२२॥ इदानींमकर्त्तात्मबोधनेयुक्तंतत्रगीतोपनिषत्संमतिमाह॥ श्लोक॥ शरीराद्यधिष्ठानपं
चप्रकारैःक्रियाहेतुभिर्यत्क्रियाजायतेस्याः॥ नकर्त्तात्मक्रियायाःकदाचिच्चिदात्मास्मरेशो
र्जुनायाहगीतासकृष्णः॥ २३॥ स्पष्टार्थः॥ २३॥ एवंस्वानुभवेनशास्त्रतश्चाकर्त्तात्वंनिश्चित्यका
लत्रयेपिनकर्मकर्त्तास्मीतिआह॥ श्लोक॥ अकार्श्यंनकर्त्ताकारिष्येहमेतन्त्रिधायश्चतुर्धा

८२ चकर्मास्त्रिशास्त्रे॥विभुत्वादसंगत्वहेतोर्नकर्मलेपोपिनेत्यय: सर्वथैव॥२५॥वि
भुत्वादसंगत्वाच्चहेतो:कारणादहंकर्मअनेकार्षइदानींनकर्तापुरोपिनकरिष्यइत्यय
:॥तच्चकर्मकथंत्रिविधमित्यपेक्षायामाह॥यत्त्रिधाकायिकंमानसंचेतितदपिप्रत्येकंकर्मा वाचिकं
नामसं० कर्मविकर्मरूपमेवंत्रिधा॥सात्विकंराजसंचेतिवा॥तथाचतुर्धेति॥विहितनिषिद्धाविहित
अनिषिद्धंरूपंचतुर्धाय द्वाउत्पाद्य आप्यसंस्कार्यविकार्यभेदेनचतुर्धा॥तत्रविहितं
स० संध्योपासनादिनिषिद्धंपलांडुभक्षणादिअविहितंरागत:प्राप्तंभोजनादिअनिषिद्धंशौ
चादिइत्यर्थ:॥२४॥एवंप्रसक्तोसमाप्यपुनस्तंपदलक्ष्यमात्मानंदर्शयति॥श्लोक॥जाग्र ८२
उप्रसक्तं स्वप्नसुषुप्तिकास्वयदनुस्युतंचतत्सिद्धिरूपंचैतन्यंसततंतुरीयममलंतत्प्रत्यभिज्ञाना



त्मा॥प्रानंदज्योतिरनंतमुत्तमतमंस्वानंदपूर्णंपदंवेदांतै:प्रतिपादितंचगुरुभिस्तन्मेस्वरू
पंहरे:॥२५॥टीका०॥जाग्रदादिसुषुप्तवस्थास्वयदनुस्यूतंचैतन्यंतत्प्रत्यभिज्ञाबाला
तू॥योहंगाढमूढज्ञस्वाप्संस्वमप्रक्षंचसोहमेवेदानींजागमीतिप्रत्यभिज्ञाप्रमाण
बलात्तत्प्रध्वंतसततंसंततंतुरीयंज्योतिरनंतंनित्यं॥उत्कृतंतमोज्ञानंयस्मात्तदुत्तमं मंत्र
वप्रकृष्टंउत्तमतममित्यर्थ:॥अतएवस्वानंद:स्वरूपभूतआनंदोयंस्वानंदपूर्णं तेन
मखंडितंकरत्वात्॥एतादृशंहरे:॥हरत्यविद्यातत्कार्यंस्वज्ञानप्रदानेनेतिहार:
तस्यविष्णो:गुरुभिर्वेदांतैश्चकरणीभूतै:प्रतिपादितंतन्मेस्वरूपंमूलरूपमित्यर्थ:॥
भातस्यकस्यचित्पूर्वंभासमानस्यसांप्रतं॥सोयमित्यनुसंधानंप्रत्यभिज्ञानमुच्य

८२ तेइतिप्रत्यभिज्ञानलक्षणं॥नचेदंषट्प्रमेषुनधिगतत्वान्नप्रमाणमिति
वाच्यंतत्तां शेस्मरणंइदमं शेप्रत्यक्षंतथाचस्मरणप्रत्यक्षोभयात्मकत्वेनप्रत्यक्षां
तर्गतत्वात्प्रत्यक्षविशेषः॥नातोस्याप्रमाणत्वशंकाविधेयाइतिभावः॥२५॥स्वा
नंदपूर्णपदमिलक्ष्यंतत्रपूर्णत्वंदर्शयति॥श्लोक॥योव्यश्युपाधौचसमश्युपाधौसमः
शुचिः शांततमश्चिदंशः॥तमेकमादायजडांशहानात्शिष्टश्चिदंशोममतत्स्वरूपं॥२६॥
स्थूलसूक्ष्मकारणव्यष्टयः॥विराट्सूत्रात्माव्याकृतारव्याःसमष्टयउपाधिविशेषो
तत्रप्रतिफलितःसमः एकरसत्वात्वैषम्यरहितः शांततमोनिस्तरंगसमुद्रइवाक्षोभ्य ८३
श्चिदंशश्चैतन्यंमैत्तेकंस्वभावतएवैकरूपंआदायजडांशाउपाधयस्तेषांहानात्क्षु

क्षणयात्यागात्शिष्टोयश्चिदंशोखंडैकरसः तत्परमार्थतोममस्वरूपमित्यर्थः॥एवंस्वानं
दपूर्णममस्वरूपमितिभावः॥२६॥ननुजडांशहानमुक्तंतन्नसंभवतितस्यसत्येनम
कुमशक्यत्वान्नहिसत्यंनिवर्त्ततेइतिन्यायादितिशंक्य॥तेषांकल्पितत्वमाहश्लोकद्व
येन॥श्लोक॥भ्रूछिद्रगोमूत्रभुजंगमानामनात्मनांरज्जुरसौयथात्मा॥तथाशरीरेंद्रिय
प्राणानामात्माहमेकोमयिकल्पितास्ते॥२७॥अत्रेदमनुमानंसूचितं॥चिदाध्या
सिताःचिच्छेषाःस्वानुस्यूतेवस्तुनिकल्पिताःप्रत्येकंतदनुविद्धत्वात्॥येषेनप्रत्येकमनु
विद्धास्तेतत्रपरिकल्पिताःयथाभ्रूछिद्रसर्पमालादंडबलिवर्दमूत्रादयःस्वानुस्यू
तेरज्जौइदमंशेनतथाचैतेतस्मात्तथा॥एवंपंचकोशेष्वपिद्रष्टव्यं॥स्पष्टार्थःश्लोक॥

८४ येपंचकोशाः श्रुतिषुप्रसिद्धाअकोशाभ्योविभोःपरस्य॥तेपंचकोशमयिक
ल्पिताःस्युस्तद्ब्रह्मपुच्छंपरमंसदास्मि॥२८॥सवाएषपुरुषोन्नरसमयइत्यादिना
२ तैत्तिरीयश्रुतावन्नमयप्राणमयमनोमयविज्ञानमयानंदमयाःपंचकोशाउक्ता
कोशवदाच्छादकत्वात्कोशास्तेमयिकल्पिताःस्युःकुतइत्यत्राह॥यतोब्रह्मपुच्छंना
मपंचकोशानामाधारभूतंसर्वकल्पनाधिष्ठानंयतदहमस्मीयतोमयिकल्पिताइत्य
र्थः॥२८॥अथसर्वशरीरेष्वेकएवआत्मेतिप्रतिपादयति॥श्लोक॥ममात्रदेहेसकलार्थ
भासकंशांतंसमंज्योतिरसंगमुत्तमं॥तदेवसर्वत्रतथैवभासकंज्योतिःस्वयंज्योतिरयंय
थारविः॥२९॥आत्मनोमध्यमपरिमाणत्वेनित्यत्वंनस्यात्॥अणुत्वेसकलदेहव्यापिस्क

MEMORIAL

खाद्यनुपलब्धेःस्यात्॥अतोविभुत्वेसर्वत्रदृष्टकार्यत्वात्सर्वशरीरेष्वेकएवात्मेतिभावः॥सया
एषमहानजआत्मेतिश्रुतेरात्मनोविभुत्वंद्रष्टव्यं२९॥उक्तार्थेचोद्यंप्रदर्श्यसमाधत्ते॥श्लो
क॥नैकस्यदुःखेनसमस्तजीवदुःखप्रतीतिःपरिशंकनीया॥उपाधिचित्तस्यविकर्म
३ पाकोदुःखंतुतस्यैवनचेतरेषां॥३०॥अयमर्थःसूत्रकृतापिदर्शितः॥तत्रतावदाशंका
सर्वशरीरेषुकर्मकर्तुश्चैतन्यस्यैकत्वादेकदेवदत्तशरीरावच्छेदेनकर्मकरणेध
र्मादिकंयज्ञदत्तशरीरावच्छेदेनापिस्यात्इष्यतेआह॥सूत्रं॥असंततेश्चाव्यतिक
रः॥अस्यार्थः॥परिच्छिन्नांतःकरणोपाधिकस्यकर्तुःपरिच्छिन्नस्यदेवदत्तात्मनोय
ज्ञदत्तशरीरेणासंततेरसंबंधाद्धर्मादेरव्यतिकरः॥देवदत्तस्ययज्ञदत्तशरीरावच्छेदेना

८५ पि धर्मादि प्रसंगो नास्तीत्यर्थः॥ तथैव सूत्रं॥ आभास एव चेति॥ अस्यार्थः॥ यथाने क घट जलप्रतिबिंबानां मध्ये एकास्मिन् सूर्याभासे कंपमाने सूर्याभासांतरं न कंप ते एवं ईश्वराभास एवायं जीव इति नैकस्मिन् जीवे धर्मादि संबंधिनि जीवांत रस्य धर्मादि संबंधस्य फलभूतः सुखदुःखादि संबंधश्च इत्यर्थः॥ अयमर्थो गौडपादाचार्यैरप्युक्तः॥ यथैकस्मिन् घटाकाशेरजोधूमादिभिर्युते॥ न सर्वैप्र तिपद्यंते तद्वज्जीवाः सुखादिभिरिति स्मात् सर्वशरीरेषु एक एव आत्मेति सिद्धं॥ ८५
३०॥ चैतन्यसत्ता संन्निधिभ्यामेव सर्वकरणव्यापार इत्याह॥ श्लोक॥ मत्सन्निधाना न्मनसंतयाच स्वगोचरार्थकरणानि देहान्॥ चलंति हिभ्रामक सन्निधानेलोहं स्वयं

दुरगतंयथैव॥ ३१॥ स्पष्टार्थः॥ उक्तं च॥ निमित्तं मनश्चक्षुरादि प्रवृत्तौ निरस्तावि लो पाधिराकाश कल्पः॥ रविर्लोकचेष्टानिमित्तं यथायः सन्नियोपलाध्यस्वरूपोहमात्मेति ॥ ३१॥ येनात्मनात्र व्यवहारसिद्धिः पश्येन्नतंपश्यति पंडितोपि॥ केयंमहाभ्रांतिरहोकु तोस्यानांतोनचादिर्नचसंप्रतिष्ठा॥ ३२॥ श्लोकं॥ योहमस्वाप्संस्वप्नमद्राक्षंसोहंजा गमिति प्रत्यभिज्ञा यानुसंधात्चैतन्यंपश्यन्नपितेनव्यवहरन्नपितदेवतुरीयत्वेन पंडितोपि शास्त्रज्ञोपिनपश्यति कुतःसर्वज्ञइत्यर्थः॥ अहोइत्याश्चर्येकेयंमहाभ्रांतिः॥ कुतश्चेत्यर्थः॥ शेषंस्पष्टं॥ ३२॥ एवंमुंजादिषीकान्यायेनत्वंपदलक्ष्यमात्मानमुद्धृत्यत त्रवादिविप्रतिपत्तिजंसंशयंनिराकरोति॥ श्लोक॥ किंगौतमीयैःकणभुक्चचौभिर्न

८६ त्मागुणी[illegible]नापिगुणा यथार्था:॥सच्चिस्करवात्मन्यपनिर्वि शेषेगुणानसंश्चेवस्क
खादयोये॥३३॥अथशब्दः पूर्वोक्तानंतर्यार्थः॥श्रुत्यनुभवविरुद्धत्वात्तमाणाभा
सरूपैःकणभुग्वचोभिःकिंनकिंचिदित्यर्थः॥तथागोतमीयैर्वचोभिरितिशेषः॥नि
र्गुणंनिष्क्रियंशांतमितिश्रुतेः॥नात्मागुणीत्यर्थः॥स्पष्टमन्यत्॥३३॥एतदेवदर्शयति
॥श्लोक॥इच्छादयोयेपरिकल्पितागुणाबुद्धेस्तुतेनात्मनएवनिश्चयः॥विज्ञानमानं
दमितिश्रुतेर्वचस्तथाप्रमाणंखलुकामइत्यपि॥३४॥कामःसंकल्पोविचिकित्सा
श्रद्धेत्यादिश्रुतेःनइच्छादयोआत्मधर्मागुणाइत्यर्थः॥इच्छाद्वेषसुखंदुःखंसंघा ८६
तश्चेतनाधृतिः॥एतत्क्षेत्रमितिस्मृतेश्च॥तस्माच्छ्रुतिस्मृतिविरुद्धत्वादुभयथा

दिमनःप्रमाणमितिभावः॥३४॥किंच॥श्लोक॥यद्यात्मनिसंसुखदुःखरागप्रयत्न ध
र्मादिगुणान्ब्रवीषी॥सुषुप्तिकालेनुभवोनतेषामात्मातदानीतवनिर्विशेषः॥३५॥तदुक्तं
आचार्यैः॥रागेछासुखदुःखादिबुद्धौसत्यांप्रवर्त्तते॥सुषुप्तौनास्तितन्नाशेतस्माद्बु
द्धेस्तुनात्मनइति॥नचसुषुप्तौआत्ममनःसंयोगावोभौत्नज्ञानादिगुणाभिव्यक्ति
रितिवाच्यं॥आत्ममनःसंयोगस्येवाचटमानत्वात्आत्ममनसोर्नित्ययोर्वोभ्यु
पगमेनसंयोगोनसंभवति॥तस्याव्याप्यवृत्तित्वांगीकारात्नहिनःप्रदेशेसंयोगःसं
भवतीति॥यत्रैतत्पुरुषःस्वपितिनाम॥सतासोम्यतदासंपन्नोभवतीतिश्रुतेःतदानी
निर्विशेषात्मेति॥३५॥किंच॥श्लोक॥आत्मान्यत्वादंतरिक्षंमनोणुनैतेनित्यामेदिनीवत्त

८७ धान्ये॥ यच्चानित्यंतन्मृषानैवसत्यंन्यायात्सिद्धं शुक्तिरूप्येणतुल्यं॥३६ अत्रायंप्रयो
गः॥आकाशमनःपरमाणवोन्योपिनित्याआत्मान्यत्वान्मेदिनीवत्॥एवंअनुमानेना
नित्यत्वसिद्धेतेनैवहेतुनामृषात्वंसाध्यते॥यच्चेति॥आकाशादिप्रपंचःमिथ्याअनि
त्यत्वाच्छुक्तिरजतादिवदिति॥३६॥किंच॥श्लोक॥आकाशादेर्नित्यताकल्प्यतेचेदेक
ज्ञानात्सर्वज्ञानप्रतिज्ञा॥वेदेनोक्तासद्विरुक्ताविचारात्तस्याहानिःसाचनेष्टाद्विजानां
॥३७॥येनाश्रुतंश्रुतंभवत्यमतंमतंविज्ञातंविज्ञातमितियेकविज्ञानेनसर्वविज्ञानंप्रतिज्ञा ८७
तंभवति॥तच्चब्रह्मभिन्नस्यानादेर्बाधितंस्यात्॥नचतद्दृष्टंमृदादिदृष्टांतेनकार्यस्य
कारणाद्व्यतिरेकेणैतदुपपादनमनर्थकंस्यात्॥तस्माद्ब्रह्मभिन्नंसर्वंउपपद्यतेविकी



यतेचइतियुक्तं॥सद्भिर्व्यासादिभिरपिश्रुत्यर्थविचारादुक्तं॥तथाचसूत्रं॥प्रतिज्ञाहानिर
व्यतिरेकाच्छब्देभ्यः॥चकारात्आकाशादयःउपपद्यंतेविभक्तत्वात्॥घटवदितिप्रयोगो
पिसूचितः॥अत्रेदंचिंत्यं॥शुक्तिसादृश्यरूपपदार्थयोःसत्वेनषद्रूपदार्थाइतिनसंभवति॥
नचशुक्तिसादृश्यसद्भावेमानाभावइतिवाच्यं॥करतलानलसंयोगेसतिमण्यादिसमव
धानेदाहानुकूलशक्तिविनाशोत्पत्योरावश्यकत्वेनशक्तिसिद्धेः॥नचप्रतिबंधकाभावेनदाहोत्पत्युपपत्तौकथंशक्तिसिद्धिरिति वाच्यं
प्रतिबंधकाभावोस्यदाहकारणत्वेमानाभावात्॥तदन्वयव्यतिरेकयोःकार्यानुपादस्या
ग्निसंयोगसमवायसंपादकत्वेनान्यथासिद्धत्वात्॥कथमसतःसज्जायतेतिश्रुत्याऽसतोदृष्टत्वा

८८ दिति न्यायेन चाभावकारणत्वस्यनिराकृतत्वाच्च ॥ तस्मात्कारणेकार्यानुकूलाशक्तिर
भ्युपगंतव्या ॥ असतोऽभावात्कार्योत्पत्तिर्नयुक्ता अदृष्टादितिन्यायार्थः ॥ एवंचंद्रवन्मुख
मित्यादयनुभवात्सादृश्यसिद्धिस्तस्मात्षट्पदार्थाइत्यसंगतं ॥ किंच ॥ नवैवद्रव्याणीत्य
संगतं ॥ अंधकारस्यदृशाद्रव्यस्यसत्वात् ॥ नचांधकारस्यालोकाभावतयाकथंद्रव्य
त्वमितिवाच्यं ॥ प्रतियोगिनिरपेक्षतयाप्रतीयमानस्याभावत्वकल्पनायांमानाभावात् ॥
नीलंतमश्चलतीतिप्रत्यक्षप्रतीत्यारूपादिमत्वेनतस्यद्रव्यत्वोपपत्तेश्चतस्माद्द्रव्याणि
नवैवेत्यनुपपन्नमिति ॥ ३७ ॥ केचिद्बुद्धिलक्षणोगुणित्वंवदंतिनन्नसंभवतीत्याह ॥ श्लोक ॥ ८८
सत्यंसत्यगुणंवदंतिभगवद्बुद्धेतिकेचिद्बुधाज्ञानंज्ञानगुणंस्फुरंवंस्फुरत्गुणंव्याख्या

श्रुतेर्नेदृशी ॥ सामानाधिकरण्यमत्रगद्यतंत द्दीयतेऽतोनतच्चैवंकल्पनेप्रमाणमपिनो
तस्माद्गुणित्वंनहि ॥ ३८ ॥ भगोविद्यतेयस्यतद्भगवत् ॥ ऐश्वर्यस्यसमग्रस्यज्ञानस्य
यशसःश्रियः ॥ वैराग्यस्याथमोक्षस्यषण्णांभगइतीरणा ॥ १ ॥ एवंनिरूपीतंभगवत्वं
मायोपहितचैतन्यस्येश्वरस्यनशुद्धस्येतिसूचितं ॥ तथाचभगवद्बुद्धेतिकेचिद्वदंति ॥
तदपिनेति ॥ विशेषणीभूतभगवच्छब्दोनसूचितं ॥ ननुशुद्धस्यापिसच्चिदानंदस्वरू
पबद्दैश्वर्यमपिनित्यस्वरूपमस्तिति चेन्नश्रुतिषुरैश्वर्यवर्णनंकृत्वापश्चान्नेतिनेतीति
तन्निषिध्यतेऽतोनैश्वर्यादिकं शुद्धस्वरूपमिति ॥ शेषंसुगमं ॥ ३८ ॥ श्लोक ॥ सांख्यास्फुस
त्वपुरुषान्यतयाहिमोक्षंज्ञानेनचाहुरितितन्नमतंविमानं ॥ तत्त्वंपदार्थपरिशोधनसा

धनायुक्तंभविष्यतिनमुक्तिसाधानाय॥ ३९॥ विमानंविगतंमानंयस्मादितिवि
मानंअप्रमाणमित्यर्थः॥ सत्वपुरुषयोरन्यत्वेनविवेकेनयज्ज्ञानंतेनज्ञानेनमोक्षमा
हुरितितन्नसंभवतीत्यर्थः॥तथाचसारव्यसूत्रं॥तद्विपरीतःश्रेयानिति॥तस्मादानु
श्राविकादुःखोपघाताद्धेतोर्विपरितःसत्वपुरुषान्यतःसाक्षात्कारोदुःखोपघात
कोहेतुरतएवश्रेयानित्यर्थः॥त्रिगुणात्मकप्रकृतिसत्वगुणाद्विवेकेसतितदुपलक्षि
तान्यतत्वविवेचनेनेदमेवतंपदशोधनमस्मन्मतेतत्रसारव्यमतमुपयोक्ष्यतेइतिभा
वः॥ शेषंसुगमं॥३९॥श्लोक॥श्रुतिस्मृतिन्यायजनेषुसिद्धंसर्वेश्वरंयेनभजंतिसां
ख्याः॥मीमांसकाःकर्मरतास्तेषामनीश्वराणांन सुखंविलोक्यं॥४०॥एषसर्वेश्वर

एषोंतर्याम्येषयोनिः॥इत्यादिश्रुतयः॥ईश्वरःसर्वभूतानांहृद्देशेर्जुनतिष्ठति॥भ्रामयन्स
र्वभूतानियंत्रारूढानिमाययेत्यादिस्मृतयः॥ क्षित्यादिकंईश्वरकर्तृकंकार्यत्वादिति
न्यायः॥दुःखिनःईश्वरंस्मरंतीत्येवंश्रुतिः स्मृतिन्यायसिद्धमित्यर्थः॥स्पष्टमन्यत्
॥४०॥श्लोक॥ज्ञानेनज्ञानेःहृन्मितिप्रतीतेर्जडोजडात्मानमुवाचभारः॥द्विरूपतै
कस्यनयस्कृतःस्यात्कदापिकुत्रापिनदृष्टमेतत्॥४१॥पातंजलंयोगमतेसमस्तंसां
ख्येनतुल्यंपरिहार्यमेव॥योयोगउक्तःसतुचित्तवृत्तिनिरोधरूपःखलुकर्मचैतत्॥४२॥
नन्वस्तुकर्मणामोक्षइत्यत्राहुः॥श्लोक॥ज्ञानेनमोक्षःश्रुतिलोकसिद्धोनकर्मणाज
न्यतयाह्यनित्यः॥शिष्टैःसमस्तैरपरिग्रहेणदुःस्वार्कीकाणांनमतंतुचारु॥४३॥सार्ध

श्लोकेनपतंजलमतदुषणंअंत्यार्द्धेनैतेनशिष्टापरिग्रहाअपिव्याख्याताइतिन्यायेन तन्मतंनयुक्तमित्युक्तंइति॥४२॥जीवेश्वरजगद्भेदखंडणायसर्ववेदांतानांप्रवृत्तिः अतःतदुपयुक्तं॥जीवेश्वरभेदखंडणंसंक्षेपेणक्रियते॥श्लोक॥येदृक्सुपर्णेतिव चोनलेनजीवेशयोर्भेदमुशंतिमंदाः॥जीवस्यभोक्तृत्वमथेश्वरस्यनास्तीतितात्पर्य मिदंश्रुतेर्हि॥४३॥वैराग्यबोधायहिकामिनांतद्ज्ञानिनांसाश्रुतिराहमाता॥साहं कृतिवान्निरहंकृतिस्त्रीरास्यनास्तीत्यभिसंधिरत्र॥४४॥अत्रश्रुतौअभिसंधिर्गृ ह्यमाणप्रायइत्यर्थः॥४५॥किंच॥श्लोक॥बद्धीभिरन्याभिरभेदबोधेबलीयसीभिः श्रु तिभिर्विरोधात्॥उपेक्षणीयानवकाशहेतोस्तासांश्रुतीनांचविचारणेन॥४५॥

तत्त्वमस्यहंब्रह्मास्मीत्याद्यनेकश्रुतिभिःसहविरोधात्॥यतोऽत्रविषयदानेनसाश्रुतिरुपेक्ष णीया॥लजेर्देकंकुलस्यार्थइतिन्यायेनेत्यर्थः॥चेत्परंसावकाशानिरवकाशयोर्मध्येनिर वकाशंबलीयइतिन्यायेनपूर्वश्रुतिवैराग्यबोधनेसावकाशाऽन्यासांश्रुतीनांनिरवका शत्वाद्बलीयस्त्वमभिप्रायः॥४६॥ब्रह्मात्मनोर्भेदेनप्रमाणंदूषयतआह॥श्लोक॥ब्र ह्मात्मनोश्चक्षुरादेरयोग्योनातोभेदस्तद्गतस्तेनसिध्येत्॥लिंगंकिंचिन्निर्विशेषत्वहे तोस्ताभ्यांव्यावर्तनेवतत्रप्रतीमः॥४७॥श्लोक॥भेदंविनाकानुपपत्तिरस्तियतोत्रभेदः परिकल्पनीयः॥जीवेशयोर्वास्तवभिन्नतायांमानंनकिंचित्परिदृश्यतेऽतः॥४७॥ स्पष्टार्थौश्लोकौ॥किंच॥तर्कस्तावन्मानानुग्राहकत्वान्न स्वतःप्रमाणंयेनाप्रतिष्ठिततर्के

ध्येय णमानो छेदः स्यात्तादृशस्तर्कोनानुसं [ध्येय] इत्याह॥श्लोक॥तर्कोप्रतिष्ठोनहियेनमा
नोछेदःसमायातितथाविचिंत्यः॥अत्रप्रमाभ्यांसकाशाद्विलक्षणाधीवृत्तिःसतर्कःस्व
लुकामवृत्तिवत्॥४८॥अत्रपूर्वार्द्धेनतर्कस्यस्वतोऽप्रामाण्यंउत्तरार्द्धेनतस्य
रूपमाह॥अत्रेतिकामादिवृत्तिवद्भ्रमप्रमाविलक्षणामनोवृत्तिस्तर्कइत्यर्थः॥४८॥
जीवेश्वरयोर्भेदश्रुतिंबाधंदर्शयति॥श्लोक॥उदरमंतरकंकुरुतेयदाभवतितस्य ११
भयंश्रुतिशासनात्॥कथमयंभवभीतिपरंपरांपरिहरिष्यतिभेदविशालधीः॥४९॥
यदाह्येवैषएतस्मिन्नुदरमंतरंकुतेअथतस्यभयंभवतीति तैत्तिरीयश्रुतिः॥४९॥किंच
॥श्लोक॥जीवाद्भिन्नंब्रह्मयुष्मन्मतेचेन्नित्यंयद्भ्रमणंतस्यहानिः॥यद्यज्जी

वाद्भिन्नंतच्चतच्चानित्यंह्येषाव्याप्तिरस्मन्मतेस्ति॥५०॥ब्रह्मयदिजीवाद्भिन्नंतर्ह्यनित्यं
भवितुमर्हतिजीवचैतन्यान्यत्वात्घटवत्इतियुष्मन्मतमनुमानप्रमाण
बाधितमितिभावः॥जीवब्रह्माभेदसाधकस्यब्रह्मयदिजीवाद्भिन्नंस्यान्तर्ह्यनित्यंस्यादितनुकू
लतर्कोप्यनुसंधेयः॥५०॥किंच॥श्लोक॥यस्याभासोव्यापकस्यासुपाधौतस्माद्भिन्नोनैव
तस्मात्सएव॥यद्यद्घोमाभासतःस्वंनभिन्नमेवंव्यापेर्नास्तिजीवेशभेदः॥५१॥स्पष्टार्थः॥स्यान्न
प्रत्यक्षसिद्धस्यश्रुतिरौपाधिकंदर्शयतीत्याह॥श्लोक॥यथाह्ययंज्योतिरितिश्रुतिस्म
तौऔपाधिकंभेदमुवाचरेवी॥एकंमुखंदर्पणतोविभिन्नंकथंद्वितीयंपरमार्थतःस्यात्
॥५२॥श्रुतिस्त्वेकंपठते॥यथाह्ययंज्योतिरात्मावित्स्यानपोभिन्नाबहुधैकोनुकुर्वन्उ

१२ पाधिनाक्रियतेभेदरूपोदेवःक्षेत्रेष्वेवमजोयमात्मा॥ एकएवहिभूतात्माभूतेभूतेव्यवस्थितः॥ एकधाबहुधाचैवदृश्यतेजलचंद्रवत्॥ जीवेशावाभासेनकरोतिमायाचाविद्याचस्वयमेवभवतीतितापिनीयेशतिश्रुतिमुराहार्यंयुक्तिमप्युराहरतिएकंमुखमिति॥५२॥किंच॥ श्लोक॥ उपाधिसत्वात्प्रतिबिंबसत्वमित्यन्वयेनव्यतिरेकतश्च॥ लोकप्रसिद्धंचतथैववेदालक्थंनुसत्यःप्रतिबिंबएषः॥ ३॥ वेदात्श्रुतेश्चान्वयेतिरेकोज्ञेयो॥ तथाचबृहदार ध्य
ण्यकेश्रूयते॥ अरेइदंमहद्भूतमनंतमपारंविज्ञानघनएवैतेभ्योभूतेभ्यःसमुत्थाय ६२
तान्येवानुविनश्यतीति॥ श्रुत्यर्थस्तु॥ अरेमैत्रेयिविलीनस्वित्यभावमिदंब्रह्मात्मतत्वंमहदनवछिन्नंभूतंकूटस्थंअनंतंनविद्यतेअंतंकारणंपूर्वावछिभूतंयस्य

नरनंतंअपारंनविद्यतेपारउत्तरावछिभूतंकार्यंयंयस्यतदपारंविज्ञानघनएवविज्ञानमेवविज्ञानंचनोजांयंतरानन्यविद्यस्वभावः॥ विज्ञानंचासौघनश्चेतिविज्ञानघनोविशुद्धज्ञानमात्रैकरसएवात्माएतेभ्योभूतेभ्यः शरीरकरणविषयाकारपरिणतेभ्योनिमित्तभूतेभ्योमनुष्योहंब्राह्मणोहमित्यादिस्वित्यभावेनसमुत्थायजलचंद्रादिप्रतिबिंबवत्तत्रप्रकटीभूयतानिस्वित्यभावसंपादकानिभूतानिविनश्यंतिसंतिअनुश्चादुदकाद्यपगमे प
चंद्रादिप्रतिबिंबवत्स्वित्यभावोविनश्यतितथाचअविद्यातत्कार्यरूपस्वित्यहेत्वपगमेप्रसगात्मापरमात्मैकत्वेनसंसारधर्मानास्कंदतोनंतोपारोज्ञप्तिमात्रस्वरूपेवेत्यर्थः॥५३॥किंचप्रतिबिंबस्यानिर्वचनीयत्वंदर्शयति॥ श्लोक॥ नबिंबधर्मोनचया

९३ प्युपाधेर्नयो भयस्यापितथानभानात्॥ नसन्न चासन्नुभयंविरोधात्न स्मात्स्वरू
पंनहिवस्तुतोस्य॥५३॥तथानभानात्तथाननुभवादित्यर्थः॥५३॥अपिच॥श्लोक॥
भगवत्प्रतिबिंबएषजीवः श्रुतिसिद्धोत्रविगानमस्तिनेषत्॥ बतकल्पितमेवत
त्स्वरूपंनहितेनास्यविभिन्नतायथार्था॥५५॥रूपंरूपंप्रतिरूपोबभूवेति श्रुत्याभगव ९३
त्प्रतिबिंबोजीवोदर्शितस्तस्यचस्वरूपंवतस्वेदकल्पितमेवहिअतस्तेनास्यब्रह्म
णःविभिन्नताभिन्नभावोनयुक्तः॥५५॥किंच॥श्रुतंतरप्रामाण्यान्नजीवेशयोर्भे
दइहसह॥श्लोक॥नान्योतोस्तीत्यादिवेदेनिषेधात्दृष्टुर्भेदोनास्तिसिद्धांतएषः॥तस्मा
जीवेशानयोर्भिन्नतांयेब्रुवुस्तेवेदबाह्याभवंति॥५६॥नान्यदतोस्तिद्रष्टृनान्य

दतोस्तिश्रोतृनान्यदतोस्तिमंतृनान्यदतोस्तिविज्ञातृइत्यादिश्रुतोद्रष्टृतरनिषेधान्नजीवेशयो
र्भेदइत्यर्थः॥५६॥किंच॥श्रुतिरुपाधिनाबहुधासंतंपरमार्थतएकमेववदतीत्याह॥श्लो
क॥इंद्रंमित्रमितिश्रुतिश्चबहुधासंतंवदत्येकधातस्माद्वेदमतिंविहायकृपणामेकं
हरिंस्वीकुरु॥आकाशंहियथास्वरूपविलक्षणाद्भिन्नंभवेन्नस्वतस्तद्वद्ब्रह्मपरंस्वरूपविल
क्षणाद्भिन्नंभवेन्नस्वतः॥५७॥श्रुतिः॥इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यःससुपर्णोगरुत्मान्॥
एकंसद्विप्राबहुधावदंत्यग्नियमंमातरिश्वानमाहुरितिऋक्शाखीयश्रुतिः॥तथाक
ठवल्लीषुश्रूयते॥एकोवशीसर्वभूतांतरात्मैकंरूपंबहुधायःकरोति॥तमात्मस्थं
येनुपश्यंतिधीरास्तेषांसुखंशाश्वतंनेतरेषां॥तमात्मस्थंस्वशरीरहृदयाकाशेबुद्धे

चैतन्याकारेणाभिव्यक्तंनहि शरिरस्याधारत्वमात्मनः संभवति॥ आकाशवदमूर्त्तत्वा
७७ दर्शीस्व मुखमिवत दूदित्यर्थः॥हिकारः पादपूरणार्थः॥ आकाशमिति॥ अत्रेदमनुमानंसू
चितंआत्मानस्वतोभिव्यतेस्वोपाधिपरामर्शमंतरेणाविभाव्यमानभेदत्वादाकाश
दित्यर्थः॥५७॥ श्लोक॥किंच॥सतोहिभेदः परिकल्पनीयोनासत्सतोर्वास्तवभिन्नतास्या
त्॥ गंगोदकस्याघमर्शोदकस्यभेदः कथंवास्तवतामुपेति॥५८॥स्पष्टार्थः किंच॥य
द्ब्रह्मलक्षणंतत्प्रतीच्येवपर्यवसन्नं॥अतोपिनभेदावसरइत्याह॥श्लोक॥यद्ब्रह्म १७
साक्षादपरोक्षमुक्तं श्रुतोयआत्मेतिचलक्षणंयत्॥प्रतीचिनद्दर्शनतएवकस्माज्जीवे
शयोर्भेदममीवदंति॥यत्साक्षादपरोक्षाद्ब्रह्मयआत्मा सर्वांतरस्तंपेव्याचक्षस्वेति

॥५८॥

---

॥श्रुतोब्रह्मअपरोक्षस्वभावमुक्तंतत्प्रतीचिएववर्त्ततेअतोनभेददशंकेत्यर्थ॥५९॥त्रिविधभे
दशून्यत्वरूपमखंडत्वंस्वात्मनोदर्शयति॥श्लोक॥प्रपंचमिथ्यात्वंस्वदर्शनेननमेविजा
तीयकृतोस्तिभेदः॥ब्रह्मात्मनोरैक्यसुदर्शनेननमेसजातीयकृतोस्तिभेदः॥६०॥श्लो
नेष क॥प्रज्ञानघनात्स्वगतोपिभेदोनसत्स्वतोव्येकरसस्वभावात्॥तस्मादखंडंपरमात्मव
स्तुनदेवचाहंनहिभेदलेशः॥ लोकेवृक्षशिलानांविजातीयभेदः प्रतीयते॥यस्माद्वृ
क्षस्यसजातीयभेदः प्रतीयेत॥पत्रपुष्पादीनांस्वगतोभेदः एवंपरमात्मनिनास्तीत्यर्थः॥
यथासैंधवघनोनंतरोबाह्यः कृत्स्नोरसघन एवैवंवाअरेयमात्मानंतरोबाह्यः कृत्स्नः
प्रज्ञानघन एवेति श्रुतेः प्रज्ञानघनत्वान्नस्वगतभेदइत्यर्थः॥प्रकारांतरेणदैभेत्रयंनो

९५ त्यानिरसीनीयं॥भोक्तृवर्गस्यपरस्परभेदःसजातीयभेदः॥भोग्यप्रतियोगिकोभेदो
विजातीयभेदःतत्तत्सुखादिप्रत्येनभेदःस्वगतोभेदइति॥अन्योपिदंभेदप्रकारःविशे
यः॥जीवेश्वरभेदोजीवजगद्भेदो॥जीवपरस्परभेदईश्वरजगद्भेदोजगत्परस्परभेद
इति॥पंचविधोवस्तुपरिछेदइति॥६१॥किंच॥ब्रह्माहमस्मीतिचवाक्यशेषइदंसर्वं
भवतीतिवाक्यं॥तस्मान्नभोक्तानचभोग्यमीषत्प्रतीयतेभिन्नतयास्वरूपात्॥६२॥ ९५
यएवंवेदाहंब्रह्मास्मीतिसइदंसर्वंभवतितस्यहनदेवाश्चनाभूत्याईशतआत्माह्येषा
ंसभवति॥स्वतःप्रमाणवेदवाक्याद्भोग्यादित्यंस्वरूपात्तंनास्तीत्यर्थः॥६२॥ रि
श्चैतान्यतरोपनिषद्यप्येवंश्रूयतइत्याह॥श्लोक॥भोक्ताभोग्यंप्रेरितारंचमत्वासर्वं



भोक्तृत्रिविधंब्रह्मचेतत्॥जीवेशानेरज्यमानंजगच्चशुद्धंब्रह्मेत्याहवेदांतवाक्यं॥६२॥
स्पष्टार्थः॥किंच॥सुषुप्तिकालेनतुसद्वितीयंततोस्तिभिन्नंखलुयत्प्रपश्येत्॥स्वाभाविकेस्मिन्
प्रलयेनभिन्नमायंतिकेभिन्नतयाकुतस्यं॥६४॥प्रलयोद्विविधःस्वाभाविकोआयंति
कश्च॥तत्रस्वाभाविकःशक्तिशेषः॥आयंतिकःसर्वेमात्मेतिसम्यक्धीजन्मनेवास्यि
लभ्रमेनष्टेनश्यतिजीवत्वंजलेप्रक्षिप्तसक्षित्ववत्॥इतिआयंतिकप्रलयः॥स्वाभावि
केसुषुप्तिकालेनिद्राप्रलयेततोनभिन्नंजगद्यत्रनास्तितत्रायंतिकप्रलयेकुतोन
कस्माद्विहेतोरित्यर्थः॥६५॥नवविधोपिसंसारोविशिष्टत्वान्मिथ्येत्याह॥श्लोक॥मातृ
मानंमेयमेतद्विशिष्टंकर्त्राकार्यकरणंतद्विशिष्टं॥भोक्ताभोज्यंभोजनंतद्विशि

ष्टंमिथ्यासर्वंतद्विशिष्टत्वहेतोः॥६५॥सर्वस्यचैतन्याभासविशिष्टत्वान्मिथ्ये
त्यर्थः॥६५॥विशिष्टत्वेश्रुतिंप्रमाणयति॥श्लोक॥अंतर्बहिश्चेतिवचःप्रमाणात्सर्वंविसृष्टंगति
रत्रनान्या॥विशेषणंत्वपरिहृत्यसर्वंविशेष्यबुध्यारजेत्समस्तान्॥६६॥विशेष्यज्ञानेनविशेषणंत्वं
जउजानंसंस्त्यजसमस्तंजउभागाद्विरजेत्॥तदानीत्वपरलक्ष्यसेइत्यर्थः॥अंतःकर्णावच्छिन्नंचैत
न्यंप्रमाता॥तत्रांतःकरणंस्वावच्छिन्नेचैतन्येध्यस्तमितिबुध्याविशेषणंत्वंजउजानंसंस्त्यक्त्व
थकूस्थशुद्धविशेष्यबुध्याज्ञानेनसमस्ताद्विरजेदितिसूत्रार्थः॥एवमानात्मन्यपिबोध्यं॥६६॥सर्व ७६
स्यमिथ्यात्वेस्वयमेवचोद्यंप्रदर्श्यसमाधत्ते॥चतुर्भिःश्लोकैः॥श्लोक॥सर्वंचैतद्यधितंचेत्स
दुक्त्यामिथ्याभूतंसर्ववेदांतवाक्यं॥मिथ्याभूताद्वैतविज्ञानसिद्धेर्दृष्टासाक्षेपेमद्वचस्तथ्य
मुष्ट॥६७॥

प्यः श्रवंत्यः सृजतेसहि कर्मेति श्रुतेः॥ स्वप्नोनुभवो न स्मृतिरित्यर्थः स्वप्नस्य भ
गवान्मिथ्यात्वं सूत्रकृदाह॥ मायामात्रंतु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्॥सू
त्रस्यायमर्थः॥तुःसर्वपक्षनिरासार्थः॥स्वप्नसृष्टिर्मायामात्रं॥शुक्तिरजतादिवत्
॥कुतः



कात्स्न्र्येन उचितदेशकालादिसंपत्त्या अनभिव्यक्तस्वरूपत्वात् नहिरथादीनां उचितोदेशः
स्वप्नेसंभवति॥देहांतर्नाडीप्रविष्टमनोवहिन्नसाक्षिनिष्टत्वात्॥नोपयुक्तःकालोस्ति॥
घटिकामात्रवर्तिनिस्वप्नेबहुसंवत्सरसाध्यसंचरणस्यदर्शनात्तस्मात्प्रातिभासिकए
वस्वप्नः॥सूचकश्चाहश्रुतेराचक्षतेचतद्विदः॥इतिसूत्रात्स्वप्नस्यशुभाशुभसूचकत्वं॥
यदाकर्मसुकाम्येषुस्त्रियंस्वप्नेषुपश्यतिसमृद्धिंतत्रजानीयात्तस्मिन्स्वप्ननिदर्शने
इतिश्रुतेः॥शुभाशुभसूचकत्वमतःस्वप्नःसत्यइतिचेन्न॥नहिसूचकत्वमात्रेणस्व
प्नस्यसत्यत्वंवक्तुंशक्यतेयथामिथ्याभूतरजतस्यहर्षादिजनकत्वेपितस्यसत्यत्वंव
क्तुंनशक्यतेतद्वत्॥तस्मात्स्वप्नस्यसूचकत्वंहुरुशास्त्रस्यमिथ्यास्वरूपत्वेपिस

 स्वयस्फुरणेनकिंचिद्बाधकत्वमितिभावः॥ ७०॥श्लोक॥अज्ञानसंशयविपर्ययचे
तनानांतेजोस्तिभासकमयंपरमार्थआत्मा॥तद्भासकंकिमपिनोकलयामिलोके
तस्मात्स्वयंप्रभमिदंपरमार्थवस्तु॥७१॥चेतनशब्देनस्मृतिरूपंप्रमाणरूपंचज्ञा
नंसंगृह्यतइत्यर्थः॥तथाचसर्वप्रत्ययसाक्षीपरमार्थआत्मास्वयंप्रकाशइत्यर्थः॥स्व
प्रकाशत्वंनामापरोक्षत्वेसतिचेतन्याविषयत्वं॥७१॥ननुस्वयंप्रकाशंयदिआत्म
तत्वंतर्हिशास्त्रस्यकिंप्रयोजनमित्यआह॥श्लोक॥अविद्यानिवर्तकत्वेवेहशा 
स्त्रंप्रवर्तनंनतुस्वप्रकाशप्रबोधे॥तिरोधाननाशायथादीपभानंस्वयंजायतेत
त्रनान्यव्यपेक्षा॥७२॥स्पष्टार्थः॥ननुकिंतद्धास्त्रेणअविद्यानिवर्त्याअखंडैक

---

रसब्रह्मबोधोभवतिइत्यपेक्षायामाह॥पंचभिःश्लोकैः॥श्लोक॥वेदांतवाक्यज
निताप्रतिपत्तिरेनंब्रह्मेतिबोधयतिलक्षणयाहिरत्ना॥अज्ञाननाशसकलविनिहन्तिचेषा॥लोये
स्वयंकनकरेणुवरत्नपूर्णे॥७३॥तत्वमसीत्यपदशब्दवाक्यश्रवणानंतरंब्रह्माकारवृत्तिः॥
ज्ञानंपरोक्षाधिकारिणस्संविदाभासरूपंजीवइत्यर्थः॥विद्योवाक्यसेचैतन्यंत्रयेणबोधय
तीत्यत्रअभियुक्तैः॥सामानाधिकरण्यमत्रत्वंपदयोर्मुख्यभागान्वयःपश्चाद्दृग्विशेषणे
नरत्नयापश्चाद्विरोधोद्वयोः॥उपलक्षेचविरोधेकरसैकवस्तुन्यखंडात्मकेवृत्तिर्लक्षणयाभव
तिहमिहज्ञेयःक्रमःसूरिभिः॥१॥सामानाधिकरण्यमत्रपदयोर्ज्ञेयंस्तदीयार्थयोः सब
धस्तुविशेषणेनरत्नयातास्यांसहास्यात्मनः॥सबंधोप्यत्रलक्षणयास्यलक्षणयावि

९९ स्येय एवं बुधैरेतान्यर्थपदानि बुद्धिपदवीमारोहणीयानि तु ॥ शब्दाभ्यांउभाभ्यांवि
शेषणविशेषाभ्यांसहास्यआत्मनः शुद्धस्यलक्ष्यलक्षणसंबंधः ॥ शब्दलक्षो लक्ष
णलंआत्मनोलक्ष्यतेसोर्थः ॥ अर्थपदानिचैंजेप्रतिपत्तिस्थानानीत्यर्थः ॥ लक्षण
येसत्रजहदजहल्लक्षणा ॥ इयमेवभागलक्षणेतिसंज्ञिता ॥ न त्वभिहितान्वयवा
१० देगामानयेत्यादिवाक्येषुलक्षणयावत्याधिनापिवाक्यार्थोदृश्यते ॥ यथालोकेगा
मानयेत्यादिपदैः स्मारितानामाकांक्षायोग्यतासंनिधिमतांगवादिपदार्थानाम १९
न्वयोवाक्यार्थत्वेनस्वीकृतः ॥ यथावाअन्विताभिधानवादेनीलंमहत्कुंडि
लमित्यादौनीलत्वादिविशिष्टस्योत्पलस्यवाक्यार्थत्वंविनाविशेषणंस्वीकृतं ॥

---

तथाप्रकृतेपिविनालक्षणांसंसर्गोविशिष्टोवावाक्यार्थोस्वित्यतआह ॥ लक्षणया
हिरत्नेति ॥ तथाचसजातीयविजातीयस्वगतभेदशून्यवस्तुमात्ररूपेणास्वीकर
त्वेनवावाक्यार्थोजात्रसंमतः ॥ अखंडैकरसत्वेनवावाक्यौविदुषांमतः ॥ संसर्गस्यवि थो
शिष्टस्यवाक्यार्थत्वेभेदस्फुरणादस्फुटदावाक्यार्थः ॥ प्रकृतेतादृशार्थोनसंगच्छते ॥ आस
पदेनोभयोःपदार्थयोरेकसत्ताकत्वेबोधव्यव्यर्थापत्तेरितिभावः ॥ ननुगंगायांघोषइ
तिवदत्रजहल्लक्षणास्तितिचेन्न ॥ तत्राधाराधेयभावलक्षणस्यवावाक्यार्थस्यसर्वो
रोविरोधान्नीरपदानुपस्थितेश्चदंतेर्थजहल्लक्षणायुक्ता ॥ अत्रपरोक्षापरोक्ष
चैतन्यैकत्वस्यवावाक्यार्थस्यैकधर्म्मिमात्रेविरोधात्नसर्वोहिविरोधोस्तीति

जहत्स्वार्थलक्षणानसंगच्छते॥ तत्रपदांतरानुपस्थितस्यतदर्थस्यप्रतीतौतद
१०० र्थेजहल्लक्षणासंभवतिप्रकृतेनुपरक्तस्यश्रूयमाणस्यानदर्थप्रतीत्यर्थपदां
तरापेक्षानास्तीतिनजहल्लक्षणासंभवति॥नापि शोणोधावतीतिवद्जहल्ल
क्षणापिसंगच्छते॥ तत्र शोणगुणगमनलक्षणस्यवाक्यार्थस्यविरुद्धस्यान
दपरित्यागेनतदाश्रयलक्षणयातद्विरोधपरिहारःसंभवत्तो३जहल्लक्षणा १००
संभवति॥ अत्रनुपरोक्षत्वा परोक्षत्वादिविशिष्टचैतन्यैकत्वस्यवाक्यार्थस्य
विरुद्धस्यानदपरित्यागेनतत्संबंधिनोयस्यकस्यचिदर्थस्यलक्षितस्वेपितद्विरोधपरि
हारानावाद्जहल्लक्षणानसंगच्छते॥ नचतत्पदंत्वंपदंवास्वार्थविरुद्धंशपरित्यागे

नाशांतरसहितंतत्पदार्थंत्वंपदार्थंवालक्षयतीतःकथंप्रकारांतरेणभागलक्षणेतिवाच्यं॥
एकेनपदेनस्वार्थोशपदार्थांतरोभयलक्षणायाअसंभवात्॥ पदांतरेणतदर्थप्रतीते
र्लक्षणयापुनःप्रतीत्यपेक्षाभावाच्च॥ इदंलक्षणात्रयंलोकवद्वेदेपिदृष्टमस्ति॥तथाहि॥
सएषयज्ञायुधियजमानोंजसास्वर्गंकल्पोयातीत्यत्रयज्ञायुधिविशिष्टदेहस्यस्व
र्गगमनाभावात्स्वार्थदेहस्यत्यागेनयजमानात्मस्वरूपंयज्ञायुधिशब्देनलक्ष्यते
तथाचैश्चानरंउपास्वेतिवाक्येवैश्वानरशब्देनजाठराग्निवाचिनास्वार्थंगृहीत्वैवप
रमात्मोपास्यत्वेनलक्ष्यते॥ भागलक्षणोक्ततुतत्त्वमसिवाक्ये॥ अत्रहितत्पंपदयोःस्वा
र्थशबलंगतपारोक्ष्यसद्यत्वभागद्वयवर्जनेनप्रत्यक्षाद्यत्वभागद्वयोपादाने

१०१ नाखंडात्मप्रतीतिजननेजहदजहल्लक्षणैवसमर्था॥ अत्रकेचित्पंडितंमन्याश्चोदयंति॥तथाहि॥तत्त्वमस्यादिवाक्येत्वंपदस्यांतःकरणविशिष्टशक्तिस्तयाचविशिष्टस्यत्वंपदादुपस्थितिः एवंतत्पदस्यापिमायाविशिष्टशक्त्यामायाविशिष्टस्यैवतत्पदादुपस्थितिः॥ विशिष्टयोस्तुतत्त्वंपदार्थयोरभेदान्वयेअयोग्यत्वाद्विशेष्यांशमात्रयोरेवाभेदान्वयोवाच्यः॥ एवंसतिअभेदान्वयोपपत्त्यर्थंशुद्धेविशेष्यमात्रेलक्षणा॥ अतएवान्यियोघटइत्यादौशक्त्याउपस्थितेघटत्वविशिष्टेविशेष्यांशमात्रयोरेवा १०१
अन्वयोपपत्तेर्नविशेष्यमात्रेलक्षणेतितन्न॥ शाब्दबोधेह्ययंनियमोयःपदार्थोयेन
५ रूपेणेदंरादुपस्थितःतेनैवरूपेणापरपदार्थेऽन्वेति॥ यथापर्वतोवह्निमाननितिबोधेवह्नित्वघटत्वादिरूपेणवह्निघटादेरूपस्थितत्वात्तेनैवरूपेणपर्वतादावन्वयोनतुतदुपरिष्यज्येति॥ तथाचतत्त्वमादिपदेनशक्त्यानिर्वाहः॥ शक्त्यातत्तद्धर्मपुरस्कारेणैवोपस्थितेस्तेनरूपेणाभेदान्वयोवाचितएवेतिशुद्धस्यविशेष्योपरक्तस्यतत्त्वमादिपदेलक्षणावश्यकी॥ तेनलक्षणयोपस्थितयोःशुद्धयोरभेदान्वयोपपत्तिरितिसिद्धं॥ननुतथाप्यखंडाकारवृत्तिसहस्रद्वयत्वप्रतीतेरभेदान्वयोसिद्ध्यतिचेत्सदृष्टांतमाह॥ यथाकतकरेणुर्निम्लीबीजंजलगतकालुष्यंविनाश्रयस्वयमपितत्रैवलीयेत्॥तद्वद्वाक्योत्थवृत्तिरपिपूर्णैःत्रिखंडनिस्तरंगस्वभावेप्रत्यक्चैतन्यमणिलीयेदितिसिद्धं॥७३॥
एतदेवस्पष्टयति॥श्लोक॥वाक्योत्थवृत्तापरमार्थवस्तुसंव्याप्यतेनतुतथोहान्येः॥एतैः

१०२ प्रज्ञाघात्यवलुप्तदृतंयच्चैतन्यमात्रंपरिशिष्यतेतत्॥७४॥तदतमोरूपहान्येपुरुषगतंय
मौढ्यंतन्ना शायपरमात्मवस्तुघटादिवच्चाप्यतेतत श्चाज्ञानहान्यातदंतर्गतवृत्ति
रपिबाधिताभवति॥तदाश्रयीभूतवृत्तिबाधात्तत्र स्वंचैतन्यमात्रमवशिष्यते॥मुखा
भासाश्रयदर्पणनाशेमुखमिवेत्यर्थः॥७४॥अत्र वृत्तिव्याप्यत्वमात्रमपेक्षितंन
तुफलव्याप्यत्वमपिप्रयोजनाभावादित्या॥श्लोक॥प्रयोजनंनास्तिफलस्यकिंचि त्स्ते
यंपरब्रह्मयतः स्वयंप्रभं॥जडेफलव्याप्तिरपेक्षितास्तिघटादिकेनात्रपरप्रकाशने॥ स्ति
७५॥परप्रकाशनेपरब्रह्मप्रकाशनइत्यर्थः॥लक्षणयाब्रह्मबोधेपिज्ञानकर्मत्वंनसंभ
वतीत्याह"श्लोक॥प्रत्यक्भावाद्यत्स्यवल्लक्षणयामार्गेणापिज्ञानकर्मत्वमस्य॥ १०२

नैवंवाच्यंकर्मयत्परोक्षंस्यात्तन्नसलडुनैवदृष्टंकदापि॥७६॥अस्यबुद्ध्यआत्म
नस्तिसदृवल्लक्षणामार्गेणापिज्ञानकर्मत्वंनैववाच्यं॥कुतःप्रत्यक्भावात्प्रत्यक्॥य त्य
द्यस्माद्यत्परोक्षंतत्प्रत्यक्न दृष्टमित्यर्थः॥यत्परोक्षंतस्यैवज्ञानकर्मत्वंसंभवतिनप्रती
चइतिभावः॥तदुक्तं॥आत्मानंनतुकर्मतामुपनयन्शब्दोवदेल्लक्षणामार्गेणापियतः परा
क्विषयवन्नास्येष्यतेकर्मता॥प्रत्यक्ताहिविरुध्यतेयदिभवेदस्यात्मनः कर्मतायद्यत्कर्म
नतस्यतत्स्यभवतिप्रत्यक्स्वभावोयतः॥१॥वागादेःखलु
वाह्यकृत्स्नविषयोनात्मापतोनात्मनिव्यापारंकरणत्वकस्यचिदपिप्रेक्षामहेन्याय
तः॥यत्किंचित्करणंजगतितत्तत्वगात्मेक्षितंवाह्येवस्वनिवर्तते॥नुभवनंतत्रप्रमा

१२ णंमतं॥२॥न सगूपमतोन शब्दविषयोबुद्धेरवेद्योयतोबुद्धिर्यत्र हि विद्यते सविषयः
शब्दस्यनात्मन्यसौ॥तेनात्मानमसौनगोचरयितुं शब्दः क्षमोमुख्ययोद्दृश्यावेतरयापि
तेननतयाप्यस्यात्मनःकर्मता॥३॥इति॥७९॥फलमाह॥श्लोक॥आनंदं शेयत्समाछा
दनंतन्नष्टज्ञानात्स्वप्रभानंद आत्मा॥नित्यःशुद्धोबुद्धमुक्तःस्वभावःपूर्णोनंतःसत्सआ
विर्भवेत्सः॥७७॥चिदाभासस्य जीवस्ययदानंदं शेविज्ञानमानंदंब्रह्मेति श्रुतेः॥आ
नंदरूपेब्रह्मं शेयत्समाछादनंआवरणंतज्ज्ञानमाहावाक्यादखंडार्थानुभव १२
ज्ञानान्नष्टं॥ज्ञानाज्ञानयोर्विरोधान्नष्टमित्यर्थः॥ततःकिमित्यतआह॥स्वप्रभानंदेसा
दि॥सोहमित्यपरोक्षतयाविर्भवेदित्यर्थः॥तत्राहंब्रह्मास्मीत्यनुभवोवाक्यार्थेसांप्र

राधिकाआहुःअतध्यानेरूपेणसाक्षाद्बुद्धिमुखेनच॥वेदतानांप्रवृत्तिःस्यात्बुद्धे
र्याचार्यभाषितं॥१॥अहमर्थपरित्यागादहंब्रह्मेतिधीःकुतः॥नैवंशास्याहित्यागोभौमं ग
लक्षणयोदितः॥२॥अंतःकरणसंत्यागादवशिष्टेचिदात्मनि॥अहंब्रह्मेतिवाक्येनब्रह्मलं
क्षिणीक्ष्यते॥३॥स्वप्नकाशोपिसाक्ष्येषःधीवृत्याव्याप्यतेन्यवत्॥फलव्याप्यत्वमेवास्य
शास्त्रकृद्भिर्निवारितं॥४॥बुद्धितत्स्थचिदाभासौद्वावपिव्याप्नुतोघटं॥तत्राज्ञानंधियान
क्ष्येदाभासेनघटः स्फुरेत्॥५॥ब्रह्मण्यज्ञाननाशायवृत्तिव्याप्तिरपेक्षिता॥स्वयंस्फुरणरू
पत्वान्नभासउपयुज्यते॥६॥चक्षुर्दीपावपेक्षेतेघटादेर्दृश्यनेयथा॥नदीपदृश्यनेकिंतुच
क्षुरेकमपेक्षते॥७॥स्थितोप्यसौचिदाभासोब्रह्मण्येकीभवेत्सदं॥ननुब्रह्मण्यतिशयंफलं

कुर्याद्ब्रह्मादिवत्॥८॥ अत्रप्रेयमनादिचेत्यत्रश्रुतेरयमीरितं॥मनसैवेदमाप्तव्यमितिधी व्याप्यताश्रुतेति॥९॥तथाचदक्षिणामूर्त्तिके॥त्वमिंद्रोसीतिवद्वाक्यंनखलुस्फुटितत्परं॥ नसादृश्यपरंवाक्यप्राप्तिप्रतीणवकादिवत्॥१॥नकार्यकारणत्वस्यसमानंरज्जुटादिवत्॥ नजातिव्यक्तिगमकंगोखंडइतिवद्वचः॥२॥गुणगुण्यात्मकंवाक्यंनैतन्नीलोत्पलादिवत्॥ नोपासनापरंवाक्यंप्रतिमास्त्रीराजबुद्धिवत्॥३॥नचोपचारिकंवाक्यंराजवद्राजपूरुषे॥ जीवात्मनाप्रविष्टोसाविश्वरःश्रुयतेयतः॥४॥इति॥७७॥केषांचिद्ब्रह्मादिनामस्थानामुप १०४
हासंनिराकरोति॥श्लोक॥संविद्रूपंब्रह्मचात्मापिसंविद्व्याक्यादन्यासंविद्दृश्यंनवाच्यं ॥वाक्योद्भूतावृत्तिरप्यानमात्रंह्यात्मश्याखिव्यतेसंविदेका॥७८॥स्पष्टार्थः॥७८॥

अथसर्वविचारफलंनिगमयतिश्लोक॥तस्माद्रखंडैकरसंविशुद्धंब्रह्माहमस्मीतिम मानुभूतिः॥नह्यत्रसंशीतिविपर्ययौस्तोवेदांतवाक्यैर्गुरुभिःप्रबोधात्॥७९॥शास्त्रगु र्वनुभवैरखंडब्रह्मस्थितिरितिभावः॥७९॥स्पष्टार्थः॥ननुजीवेशयोर्भेदोनादित्वेन पूर्वाचार्यैरंगीकृतस्तद्विरुद्धमखंडत्वंकथंमुच्यतेइत्यतआह॥श्लोक॥अनादिषट्कस्य निरूपणंबुधैर्बोधोदयायागुरवोरीकृतंहि॥वाक्यार्थबोधेनहिसादिनाधुनाप्रबाधितं तत्सकलंनिरूपणं॥८०॥जीवईशोविशुद्धचित्तथाजीवेशयोर्भिदा॥अविद्यातच्चितो र्योगःषडस्माकमनादयइति॥बुधैःसांप्रदायिकैरनादित्वंस्वीकृतंतन्नबोधोत्पागैव॥ व्युत्पत्त्यर्थंतत्सकलंनिरूपणंसादिनाभ्रहावाक्योत्थेनबोधेनप्रकर्षेणबाधितंना

१०५ तस्तदुक्तेनसहविरोधइत्यर्थः॥८०॥अथभिद्यतेहृदयग्रंथिःछिद्यंतेसर्वसंशयाः॥
क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरे॥तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्य
तेयनायेत्यादिश्रुतिभिर्ब्रह्मज्ञानेनमोक्षंदर्शयंतीभिस्तद्व्यज्ञानेनत
संसारनिवृत्तिरित्याह॥श्लोक॥ब्रह्मात्मविज्ञानमतेनराणांज्ञानांतरेकुतरेमया
सः॥नैवोचितोयेनहिगर्भवासपरंपरांयांत्यतिनैवतेषां॥८१॥कुतरेनिःसारेइत्यर्थः॥उक्त
त्रार्थेश्रुतिर्विदुषोनुभवंअनुवदति॥इहैवसंतोथविद्मस्तद्वयंनचेदवेदिर्महतीविनष्टिः॥ १०५
येएतद्विदुरमतास्तेभवंत्यथेतरेदुःखमेवापियंति॥अयमर्थः श्रुतेः॥इहैवदेहेएवाज्ञा
ननिर्द्वारहिताःसंतोवयंअथकथंचित्तद्ब्रह्मतत्त्वमात्मत्वेनविद्मजानीमोनचेद्विदितवंत

स्तदानवेदिःस्यांवेदनंवेदःसोस्यास्तीतिवेदीवेदेचवेदिर्नवेदिरवेदिःस्यांतदामहतीअनंतप्र
रिणामाजन्ममरणादिलक्षणाविनष्टिर्विनाशःस्यात्॥उक्तमेवप्रपंचयती॥यइतिएवंयेप्य
न्येतद्ब्रह्मविदुःतेप्यमृतामुक्ताभवंति॥अथपुनःयेनैवंविदुः॥तेइतरेजन्ममरणादिलक्षण
मपियंतिपद्यंतइत्यर्थः॥८१॥अतएव॥श्लोक॥अध्यात्मविद्यापरमाहिविद्यापरंपरासाध
नमन्यविद्याः॥विद्यांतराणामथमोक्षवादःसत्यर्थवादःखलुपर्ण॥८२॥अथपरायत्तात्तदिवर
दक्षरमधिगम्यतइतिमुंडकश्रुतेः॥अध्यात्मविद्याविद्यानांसर्वासामितिगीतोक्तेश्च॥हिनिश्चये
येनपरमाउत्कृष्टा॥ननुतर्हिअन्यविद्यानांव्यर्थतास्यादित्यतुआह॥परंपरेति॥अन्यविद्याः
परंपरयासाधनीभूताअंगभूताःतासांयोमोक्षवादःसहिनिश्चयेनअर्थवादः॥अंगे

१॰६ षुफल श्रुतिरर्थवादइतिन्यायात्॥ तत्र दृष्टांतं आह॥ यथापर्णवत्ता याजुहूद्वारा अंगीभूता याज्यापशूलोकफल श्रुतिरर्थवादस्तद्वदिहार्थः॥ विद्यास्तावदृष्टादृष्टा॥ तथाहि॥ ऋग्वेदोथयजुर्वेदःसामवेदोथर्ववेदइतिचत्वारोवेदाः शिक्षाकल्पोव्याकरणंछ सूत्र
दोनिरुक्तंज्योतिषमितिषडंगानि॥ पुराणन्यायमीमांसाधर्मशास्त्राणिचेतिचत्वार्युपांगानिएतत्रोपपुराणानामपिपुराणेऽंतर्भावः॥ पुराणंनाम॥ सर्गश्चप्रतिसर्गश्चवंशोमन्वंतराणिच॥ वंशानुचरितंचेतिपुराणंपंचलक्षणं॥ यैशेषिकशास्त्रस्यन्यायेनांतर्भावः॥ १॰६
वेदांतशास्त्रस्यचतुरध्यायात्मकस्यमीमांसायां॥ माहाभारतरामायणसांख्यपातंजलपाशुपतपैष्णवादीनांधर्मशास्त्रेषु॥ एवंमिलित्वाचतुर्दशविद्या॥ तथाचोक्तं॥

चतुर्वेदो शास्त्र

पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः॥ वेदाःस्थानानिविद्यानांधर्मस्यचचतुर्दशेति॥ एताएवआर्युर्वेदोंगांधर्वोचार्थशास्त्रमिति॥ चतुरुपवेदमिश्रिताअष्टादशविद्याइति॥ तत्रोपांगेषुन्यायादिषुमोक्षस्तन्नशास्त्रज्ञानेनवदंति॥ तथाहि॥ तत्रन्यायोपांगांतर्भूतवैशेषिकशास्त्रप्रणेताकणादोदेहेंद्रियव्यतिरिक्तंविभुमात्मानंनवविशेषगुणाश्रयंजल्पन्नाह॥ द्रव्यगुणकर्मसामान्यविशेषसमवायानांषण्णांपदार्थानांसाधर्म्यवैधर्म्याभ्यांतत्वज्ञानंतपूर्वकात्मसाक्षात्काराद्बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारेतिनवविशेषगुणानांप्रागभावासैहवृत्तिप्रध्वंसएवात्मनः॥ कैवल्यमिति॥ तथैवउपांगपरिशिष्टन्यायशास्त्रविदःप्रमाणप्रमेयसंशयप्रयोजनदृष्टां

प्रागभावासहवृत्तिश्चासौप्रध्वंसश्च पुनरुत्पत्तिभावोऽर्थः

१०७ तसिद्धांतावयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासछलजातिनिग्रहस्थानानांषो
डशपदार्थानामुद्देशलक्षणपरीक्षाभिरात्मशरीरेंद्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभाव
ज्ञानेन फलदुःखापवर्गाख्यद्वादशविधप्रमेयनिर्झर्षणात्साक्षात्कारात् श्रवणमन
ननिदिध्यासनपूर्वकं॥ सचासानमिथ्याज्ञाननिबर्तीतत्कार्याणांरागद्वेषमोहानांनि
वर्त्तितत्कार्ययोःप्रवृत्तिपूर्वकयोर्धर्माधर्मयोस्ततःपूर्वार्जितकर्मणांकायव्यूहपूर्वक
पा भोगेनक्षयाच्छरीरांतरानारंभस्तदनंतरंधर्मोपलक्षणःषडिंद्रियषड्विषयषट्बुद्धिसुख १०८
दुःखशरीररूपैकविंशतिभेदभिन्नस्यदुःखस्यात्यंतिकविमोक्षोपवर्गइतिकल्पयंति॥
अपरेतुरे कभविकन्यायेनात्मज्ञानमंतरेणापिनिषिद्धकाम्ययोरननुष्ठानान्नि



त्यानुष्ठानाच्चनागामिकर्मोत्पादेविद्यमानस्यचोपभोगेनक्षयात्सकलकर्मोच्छेद
लक्षणमपवर्गमाहुः॥ मीमांसकैकदेशिनस्तूपांगांतर्गतमतप्राभाकराः॥ वैदिक
कर्मानुष्ठानाद्विहितात्मज्ञानपूर्वकाद्दुःखेंद्रियादिसबंधस्यधर्माधर्मपरिक्ष
यनिमित्तमात्यंतिकोच्छेदमपवर्गमाहुः॥ भाट्टास्तु ज्ञानकर्मसमुच्चयादेवात्म
नोजडबोधात्मकस्यनित्यज्ञानंनित्यसुखंचोदेतितस्यविषयविशेषानपेक्ष
यानित्यज्ञानेननित्यसुखाभिव्यक्तिर्मुक्तिरित्याहुः॥ सांख्यास्तूपांगधर्मशास्त्रां
तर्गताःप्रकृतिपुरुषवदनाद्यविवेकनिबंधनौपुरुषंप्रतिचरितार्थिकारायाःप्र
कृतेर्नपुनस्तद्भोगार्थाप्रवृत्तिरितित्रिविधदुःखस्यात्यंतनिरोधएवस्वभाव

१०७ तः केवलस्यापि पुरुषस्य कैवल्यमित्याहुः"पातंजलाः सूत्रं॥ प्रकृतिपुरुषविवे
केनाभ्यासवैराग्यपरिपाकाद्यमनियमासनप्राणायामप्रत्याहार
धारणाध्यानसंप्रज्ञातसमाधिपूर्वकात्परमेश्वरप्रसादज्ज्ञानप्राप्तिरविपर्ययवि
कल्पस्मृतिनिद्राव्यपंचवृत्तिनांनिरोधादेवधर्ममेघसंज्ञादृढतरसंप्र
ज्ञातसमाधेः कैवल्यमिति कल्पयंति॥त्रिदंडिसूत्रं जीवब्रह्मणोर्भेदाभेदम
प्युपेत्यज्ञानकर्मसमुच्चयादेवकारणात्मकब्रह्मणिकार्यात्मकजीवस्यक १०८
र्मवासनासहितभेदांशानिवृत्तिर्मोक्षइतिवदंति"परमेश्वरप्राप्तिरित्यन्ये॥
सतरंगनिस्तरंगभेदेनसमुद्रद्वैविध्यंसविकारनिर्विकाररूपेणावस्थाद्



यंब्रह्मणःपरिकल्प्यज्ञानकर्मसमुच्चयाभ्यासादेवसविकारावस्थापरित्यागेननिर्वि
कारावस्थाप्राप्तिरेवमोक्षइत्यपरे॥उपांगधर्मशास्त्रांतर्गतमताःपाशुपाताःपशुपति
धर्माचरणात्पशुपतिगमनमेवमोक्षइत्याहुः॥एवमुपांगधर्मशास्त्रांतर्गतमतावैष्णवाः
वैष्णवधर्माचरणाद्विष्णुलोकगमनमेवमोक्षइतिवदंति॥पंचाग्निविद्याद्युपासनेर
र्चिरादिमार्गेणहिरण्यगर्भप्राप्तिरेवमोक्षइतिहैरण्यगर्भाः॥एवंअपरेस्वकपोलपरिक
ल्पितश्रुतियुक्तिभिरीशमेवमोक्षंबहुधाजल्पंति॥औपनिषदास्तुनिरतिशयाद्यानंद
बोधआत्मेयानाद्यविद्यानिवृत्तिपूर्वकमोक्षइत्याहुः॥अविद्यायाश्चसर्वदुः
खोपादानत्वान्निवृत्याऽत्यंतिकदुःखनिवृत्तिरप्युपपद्यतइति॥तस्मादुपांगपठितमोक्ष

१०६ कथनमर्थवादः॥ श्रौतमार्गविरोधादुपेक्ष्यइति सिद्धं॥८२॥ अष्टादशविधावहिर्भूतका
व्यादिषु निरूपिताष्टोरसस्यसेवनादनर्थप्राप्तिरेवेत्याह॥ श्लोक॥ अष्टोरसान्यान्मधुरादि
र षड्डँसान्यीत्यापिपासापरिवर्द्धनेभ्यः॥ एकस्यशांत्यादिरसस्यपाननोननःपिपासात
वलैशाविध्नः॥८३॥ शृंगारवीरकरुणाद्भुतहास्यभयानकाःबिभत्सरौद्रोचरसाएते
षांतन्नलक्षविमुखाध्रुवंस्वयंग्रंथावलोकनंवापानंयथा॥ अनुच्छिष्टोदधेरपरिदृ
तोराहुरशनैःकलंकेनास्पष्टोनखलुपरिभूतोदिनकृता कुहूभिर्नोलुप्तोनचयुव १०६
तिवक्त्रेणविजितःकलानाथःकोयंकनकलतिकावीमुदयते॥ एवमादिरसमाननःभ
र्शंपिपासावर्द्धनइतिरसिकानुभवसिद्धं॥ तथाचैषयिकाणांमुधुरादिषड्डँसपाननःपिपा
र

सावर्द्धनएव॥ एकस्यशांत्याख्यरसस्यनिर्विकल्पकात्मसाक्षात्काररूपस्यपाननःसेवना
न्नोस्माकंपिपासायाक्षयःनस्यापिलेशःतत्कृतोयोविघ्नोमोहःसनास्तीत्यर्थः॥८४॥इ
दानीश्रुत्यर्थमाह्मणकृपणोदर्शयति॥ श्लोक॥ एतन्मनुष्येषुजनुःसुदुर्लभंतत्रापिवि
प्रेषुमहत्सुदुर्लभं॥ सात्रशुद्धंपरमंतनेसजेत्सब्राह्मणोऽन्यःकृपणोबतास्महा॥८५॥
योहवाएतदक्षरंगार्ग्यविदित्वास्माल्लोकात्प्रैतिसकृपणोथयाएतदक्षरंगार्गीविदित्वा
स्माल्लोकात्प्रैतिसब्राह्मणइतिश्रुतेः॥ कृपणब्राह्मणोस्तेयी॥ अस्यर्थोनामतेलोकाअं
धेनतमसावृताः॥ तांस्तेप्रेत्याभिगच्छंतिएकेचात्महनोजनाः॥ श्रुत्यर्थस्तु॥ येकेचन॥
अनात्मज्ञास्तेअंधेनाद्यैनात्मकेनतमसाअज्ञानेनआवृतालोकाःकर्मफलानितानि

११० यथा कर्म यथा श्रुतं कर्मफलानि लोकान्य इयंति ते आत्महनः आत्मानं घ्नंतीति आत्महनः
कथं आत्मानं हिंसंतीत्यभिनिवेशिनं॥ उच्यते॥ अविद्यादोषेण विद्यमानस्य आत्मनः
निरस्करणाद्विद्वांसो जानाआत्महन उच्यंत इत्यर्थः॥८५॥ ज्ञानं विना न कुत्रापि मो
क्ष इत्याह॥ श्लोक॥ का इयं मूढो मोक्ष इत्याहुरेके तत्रापी शास्त्रकस्योपदेशात्॥ स
र्वाजीवांस्तारयेदिश्वनाथस्तस्मात् ज्ञानं मोक्षदंनैवमन्यः॥८५॥ स्पष्टार्थः॥ तथा चस्म
र्यते॥ प्राणांस्त्यजंतोमणिकर्णिकायांमद्भक्तंतारकमुच्चरंतः॥ ऋ त्वानुवेदांतमुपा ११०
स्यवाच्यंपरयंतिप्राप्नेवहिविश्वनाथमिति॥१॥ यस्यपरिच्छेदविहीनात्मज्ञानंनास्ति
श्लोक तेनतीर्थगमनंकर्त्तव्यमित्याह॥ का इयं मूढोदूरकायांप्रभासेनाहंतत्रास्मीतियस्या



स्तिबुद्धिः॥ सोयंदेहीगच्छतांतत्रतत्रनाहंगंताव्यापकत्वादनंतः॥८६॥ देहीदेहात्माभि
मानवानित्यर्थः॥ तदुक्तंयावद्देहात्मविज्ञानंबाध्यतेनप्रमाणतः॥ प्रामाण्यंकर्मकां
डस्यतावदेवोपपद्यतइति॥ परिच्छिन्नात्मज्ञानवत्स्त्रियाश्चशुद्ध्यर्थंतीर्थादिगमनंक
र्मानुष्ठानंचयुक्तमितिभावः॥ शेषंस्पष्टं॥८६॥ उपासनरूपकर्मभिः नमोक्षोबाध
कप्राप्तेरित्याह॥ श्लोक॥ उपासनानांबहुतारतम्यंश्रूयतेतत्रचतत्रवेदे॥ तार्भि
र्मोक्षः परिकल्प्यतेचेन्नैतारतम्यंलभतेऽपिकल्प्यं॥८७॥ विरट्हिरण्यगर्भइत्य
रोपासनादिषुतारतम्यदर्शनात्प्रोक्षेपितारमंतेकल्पंतश्चानिष्टंमोक्षस्येक रूपत्वादित्यर्थः॥ तंयथायथोपासतेतथैवभवंतीतिश्रुतेःदेवोभूत्वादेवानप्येती

॥॥ ति श्रुति श्च॥ ईदृशाबाधकसत्वान्नाभिनिवेशइत्यभिप्रायः॥८७॥ तदेवदर्शयति॥ श्लोक॥ अहंग्रहोपासनयानराणांसायुज्यसालोक्यसमीपतादि॥ प्रायःप्रतीकस्यफलंनसम्यग्विनाशिसर्वत्रहिकामचारः॥८८॥ द्विविधमुपासनंअहंग्रहोपासनंप्रतीकोपासनंच॥तत्रविधिज्ञोभयोःफलंदर्शयति॥ अहंग्रहोपासनेनोपास्यदेवतातादात्म्यरूपसाक्षात्कारेणसायुज्यंसामीप्यंततःसलोकतांजयतीतिश्रुतेः॥ततोत्यध्यानवशात्सामीप्यंततःसलोकता॥ आदिशब्देनसार्ष्टिंसंग्रहो ॥॥
ग्यार्थस्रष्टिकर्तृत्वंतच्च॥जगद्व्यापारवर्जंप्रकरणादसंनिहितत्वाच्चेतिसूत्रात्॥य
द्विदुषश्चैश्वर्यंतन्निरंकुशंसातिशयंवेतिसंदेहे॥जगद्व्यापारवर्जंसातिश

---

वमेव॥यच्चणिमाद्यैश्वर्यंविदुषः॥जगद्व्यापारस्यपरमेश्वरस्यैवसृष्टिवाक्येषुसर्वत्रतस्यैवप्रकरणात्॥विदुषश्चतन्नासन्निहितत्वात्॥निरंकुशंहिपरमेश्वरस्यनिरंकुशमैश्वर्यंकथंवाविदुषईश्वरप्रसादायत्तमागन्तुकमैश्वर्यंनिरंकुशमितिवक्तुंनशक्यं॥तस्मात्सातिशयमैश्वर्यंविदुषइतिसूत्रार्थः॥तस्योपासकस्यश्रुताविमंमानवमावर्ततइति॥ रममितिविशेषणान्मन्वंतरे॥ आदृतिरितिवदंति॥तदुक्तं॥यदिवासमुच्चयवशात्पुरुषः॥कमलासनंव्रजतिकामुकधीःपुनरेवमानवमिमंतुविनापरिवर्तमाव्रजतिमूढमतिरिति॥एवंसतितत्वमस्यादिजन्यसाक्षात्कारेणाज्ञाननिवृत्तौनविमानंअतोऽत्रैवयतितव्यमितियुक्तंप्रतिभासते॥प्रायोवा

११२ हुत्येन प्रतीक स्य प्रती कोपा सन स्य वि ना शि फलं सर्व त्र का मचा र रू पेन स म्य
क्॥ यथा शत क्र तू नां प्रती कोपा स का नां ना म ब्रह्मे सा क पा स का नां शा ङ्क रा स्त्रा क्ति
रू पेणा म वि षये स्वा तं त्र्य म न्ये षा म पि त था का म चा र ए व फलं तु छ ला न्न यु
क्त मि ति भा व यः॥ ८८॥ ए वं श्री प्र पं च कृ त नि र्मि त तं त्रे षु प्रती कोपा स न मे वो प सं ह्य
ते न ल हं ग हो पा स न मि त्या ह॥ श्लोक॥ शा लि ग्रा मे धा तु रे हे थ यं त्रे पू जा का र्या मू
ल मं त्रै: प्रति के॥ तं त्रे षे वं शं भू ना प्रो क्त मे त न्ना न्य त्रा हं ग हो पा स ना स्यं॥ ८७॥ स्प ११२
ष्टा र्थ॥ ८७॥ उपा स ना भि: क्र म मु क्ति रु क्ता त त्रा पि ज्ञा ने नै व मु क्ति र्न भा व ना मा त्रे
णे त्या ह॥ श्लोक॥ उपा स ना भि: क्र म मु क्ति रु क्ता त त्रा पि मु क्ति: प र मा त्म बु द्धि त: अ ज्ञा

न हा नं न वि ना स्ति मु क्ति र ज्ञा न ना शो न हि भा व ना द्व ला त्॥ ७॥ अ त ए वो क्तं शा री र चा
र्नि के॥ अ थ वा स त त्र प र मा त्म म ति: प रि मु च्य ते स क ल ब न्ध न त:॥ क्र म यो ग मु क्ति
रु दि ता श्रु ति षु प्र ति शा ख मे व मु प प न्न त रे ति॥ अ त ए व श्री बा द रा य णो क्तं॥ अ
पा दृ त्ति: शा द्धा दृ ना व त्ति: शा द्धा दि ति॥ त स्मा त्स र्व त्र ज्ञा ना दे व मो क्ष इ ति सि द्धं॥
अ न्य था ना न्य: पं था वि द्य ते य ना ये त्या दि श्रु ति वि रो ध इ ति ज्ञे यं श्रु तौ नि र्गु ण स गु
ण वि द्या यो: फ लं उ क्तं ज्ञा त्वा ए वं स र्व पा शा प हा नि: स्त्री णे: क्लै शे: ज न्म म र मु प्र हा
पि: त स्या भि ध्या न्त्त नी यं दे ह भे दे वि ज्ञे य यं के व ल आ त्म का म इ ति श्रु त्यर्थ स्तु
दे व मी श्व रं ज्ञा त्वा आ त्म ले न सा क्षा त्कृ त्य स र्व पा शा ना म ज्ञा न रा गा दी नां क्लै शा ना

११३ मग्रहानिः क्षयोस्मिन्संभवति॥ एवंक्षीणेः क्लेशैस्तत्कार्यजन्ममरणयोः क्षयो
भवति॥निर्गुणविद्याफलमुक्तासगुणविद्याफलमाह॥तस्येति॥तस्येश्वरस्या
भिमुख्येनध्यानादुक्तहानिद्वयोपेक्षयातृतीयमणिमाद्यैश्वर्यदेहभदेहहे
यिशेषसिद्धदेहप्राप्तंमुक्तानिर्गुणविद्योदयेकेवलोद्वितीयआत्मकामोनिर
तिशयानंदात्मनैवावतिष्ठते॥इतिक्रममुक्तिवाक्यार्थः॥८॥स्वानोत्तरंवास ११३
नाभिर्नबंधस्तासांबाधितत्वादित्याह॥श्लोक॥सवासनांतःकरणस्यसास्तीनमे
धुनावासनयास्तिबंधः॥यदाययोदेतिनरात्मभावात्स्वयमस्तमेति॥
"८॥वासनोदयसमयएवात्मनिश्चयाद्विकारभावादंतःकरणविकारत्वा



च्चेतिविचोस्मरणात्॥ उत्पन्नापिसास्वयमस्तंनाशमेतिश्रयमेवजीवन्मुक्तिरितिभावः
॥९॥इदानीमुपासकानत्वज्ञानिनोविशेषमाह॥श्लोकाप्राणोक्रांतिर्नाधुनामे
भवित्रीप्राणाःपूर्णलीयमानाभवेयुः॥रज्जौसर्पन्यायतःसंप्रबोधान्नैवोत्क्रा
मेयुस्तिनाशं॥१०॥प्राणशब्दोपलक्षितंगमनागमनहेतुभूतंलिंगंपूर्णब्रह्म
णिलीयमानंस्यात्॥कथंलीयइत्यपेक्षायामाह॥यथारज्जौसर्पउत्पन्नएवनास्ति
॥नासतोविद्यतेभावइत्यादिस्मरणात्॥तस्यनाशःकुतएवंप्राणाइत्यर्थःसर्गा
दावेवनोत्पन्नंदृश्यंनास्त्येवतत्सदेत्यादिनासर्वथाजगन्नास्त्येवेत्युक्तत्वात्॥अ
थाकामयमानोयोकामोनिष्कामआप्तकामआत्मकामोनतस्यप्राणाउत्क्रामंति

ब्रह्मैवसन्ब्रह्माप्येतीतिश्रुतेः॥श्रुत्यर्थस्तु॥बाह्यविषयकामनाशून्यत्वमकामत्वं॥मानसिकविषयकामनाशून्यत्वंनिष्कामत्वं॥प्रमस्वरूपानंदत्वमत्वंआप्तकामत्वं॥तत्रसर्वत्रहेतुरात्मकामइत्यर्थः॥विद्वद्देहादेवप्राणोत्क्रांतिनिषेधोयमितिसिद्धांतः उपासकस्यतुगतयोर्ध्वमायन्नमृतत्वमेतीतिश्रुतेः॥मूर्धन्यनाडीद्वारा उत्क्रांतिरस्तिनेयंतत्वज्ञानिनइतिविवेकैक्यः॥९२॥किंच॥श्लोक॥यदानास्तिबोधेनबाधोजडानांतदावासनाभीतिरंत्यप्रयाणे॥यदोपासकःकश्चिदन्योनरो वाप्रयंतस्यतान्निर्जनुःकारणत्वात्॥९३॥यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरं॥तंतमेवैतिकौंतेयसदातद्भावभावितइतिस्मरणादित्यर्थः॥९३॥किंच॥नवासना



नांवशेवर्तितास्यप्राणास्तुसर्वेवशवर्तिनोंस्य॥प्रारब्धभोगायहिवासनायासाज न्महेतुर्नफलप्रदाच॥९४॥दशेंद्रियाणिमरुतःपंचप्राणसंज्ञिताइति॥वार्तिकोक्तेः प्राणेंद्रियाणिवशवर्तिनीत्यर्थः॥९४॥ज्ञानिनःकोपिविधिर्नास्तीत्याह॥श्लोक॥ ज्ञानेसमाप्तंसकलंहिकर्मतस्मिन्पुनः कोपिविधिर्नचास्य॥समाधिमंतःकरण स्यधर्मकरिष्यतेचेत्तकरोतुमावा॥९५॥सर्वंकर्माखिलं पार्थज्ञानेपरिसमाप्यते ॥इतिस्मरणान्नतत्त्वज्ञानिनःकोपिविधिरित्यर्थः॥समाधिंउत्कलक्षणंजीवन्मु क्तिसुखार्थंकरिष्यतेचेत्करोतुवाऽधिकत्वात्तत्यइत्यर्थः॥९५॥यस्यज्ञेयकार्थंसमाप्तिर्जातासएवतत्त्वविन्मुख्योऽन्यस्तुतत्त्वस्याभासइत्याह॥श्लोक॥यस्य

ज्ञेयंकार्यज्ञातंसमासंतत्रज्ञानांतत्रचिन्मुख्यएष॥ज्ञेयंकार्यशिष्यतेयस्यपुं
११५ सस्तत्रस्याभासतांयातिदुःखी॥९६॥स्पष्टार्थः॥ननुयद्यदाचरतिश्रेष्ठस्त
त्तदेवेतरोजनःसयत्प्रमाणंकुरुतेलोकस्तदनुवर्त्ततइतिस्मरणात्॥ब्रह्मज्ञ
स्यकर्मानुष्ठानादर्शनात्कर्मोच्छेदःस्यादित्यतआह॥श्लोक॥स्वातोनतेषां
किमपीहकार्यंतथापिलोकस्यहिसंग्रहार्थं॥कुर्वंतिसंतःसकलंस्वधर्मंश्रीकृ
ष्णवत्तेकृपयाजनार्थं॥९७॥स्वधर्मंप्रियत्नेनप्रवृत्तश्चेदग्निहोत्रादिलोकसंग्र
हार्थं॥निवृत्तश्चेत्तूष्णीमासीतासतीवाधकेयथाकालेऽपिस्मारणस्ना
नादीतिज्ञेयं॥श्रीकृष्णवत्तेकृपयाजनार्थंस्वधर्मंकुर्वंतीत्यर्थः॥नानवाप्तम॰ ११५

वाप्तव्यंवर्त्तएवचकर्मणीत्यादिश्लोकेश्रीकृष्णस्यकर्मानुष्ठानदर्शनात्श्रीकृष्णव
दित्युक्तं॥९७॥एवंकर्मानुष्ठानेलोकानुग्रहसंसार्यमितिवदेयुरितिचेत्॥ब्रु
वंतुनामपरमार्थतोनकापिहानिरितिस्वानुभवेनाह॥श्लोक॥स्वदृष्ट्यास्वयंनि
र्विशेषत्वहेतोर्नकर्त्तानभोक्तानमातानाहंमास्मि॥परैःसर्वसंसारआरोप्यतेचेत्क
स्वंसर्वसंसारमारोपयंतु॥९८॥एवंयथोक्तसाधनसंपन्नस्याधिकारिणोयतेःस
र्वोत्कृष्टत्वंदर्शयति॥श्लोक॥नित्यादिसाधनचतुष्टयसंपदुच्चैःसेनांप्रगृह्यच
तुरंगबलोपपन्नां॥अज्ञानशत्रुविजयेनपरात्मलाभेराज्येस्थितोविजयतेयति
चक्रवर्ती॥९९॥नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसंपदेवचतुरंगानिहस्य

श्चरणपरतंत्रितेषांबलेनोपपन्नांपरिपूर्णांउच्चैःप्रहर्तीसेनांप्रकर्षेणस्वाधीनां कृत्वेत्यर्थः॥ शेषंस्पष्टं॥ ८७॥ प्रारब्धराज्यस्करराजामद्यपानांतःपुरसेवनादिनायथेष्टवर्तीभवेत्ननथायमित्याह॥ श्लोक॥ राज्येस्थितोपियतिराप्तनयथेष्टवर्तीस्वानंदनिष्यपरिपूर्णतयातिशुद्धः॥ प्रारब्धभोगमनुभूयविषादहर्षौहित्वाप्रयातिपरमांहिविदेहमुक्तिं॥ २००॥ नयथेष्टवर्तीतत्रहेतुःस्यानंदेत्यादिप्रारब्धेनकर्मणा भोगोयस्यप्रारब्धभोगोजीवश्चिदाभासस्तंअनुभूय॥ अयमर्थः॥ चिदाभासोजीवएवसुखदुःखभोक्ताअहंतद्विलक्षणस्तत्साक्षित्वात्इदंअनुभूयअनएवहर्षविषादौत्यक्त्वाविदेहमुक्तिंप्रयातिप्राप्नोतीत्यर्थः॥ २००॥तस्ययथेष्टाचरणेनप्रवृत्तिरितिसप्रमाणमाह॥ श्लोक॥ दृष्ट्वापरंब्रह्मरसानिवर्तिरित्याहगीतासुहृदिःकृपालुः॥ अतोयथेष्टाचरणंनतस्ययद्यस्तिचेज्ज्ञानविपाकितान॥ २०८॥ विषयाविनिवर्ततेनिराहारस्यदेहिनः॥ रसवर्जंरसोप्यस्यंदृष्ट्वानिवर्त्ततेइतिभगवद्वचनान्नयथेष्टाचरणमित्यर्थः॥ २०९॥ किंच॥ श्लोक॥नैवाश्लेषःपुण्यपापक्रियायाःयद्वत्वेवंशुद्धसंस्कारहेतोः॥ पुण्येश्रद्धापापनोनैवबुद्धिःतत्वज्ञस्यप्रायशोयंनिसर्गः॥ २१०॥ तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशौतद्व्यपदेशादितिसूत्रात्पुण्यपापक्रियायानाश्लेषोनसंबंधोऽकर्तात्मबोधस्यदृढतायद्वत्वेवंतथाविदस्ययथेष्टाचरणंनसंभवतीत्याह॥ कुतःशुद्धसंस्कारहेतोःतस्य

पुण्येश्रद्धा पापस्य बुद्धिर्नअनेकजन्मससिद्धत्वान्तत्त्वज्ञस्यायंयथोक्तो
११७ निसर्गःस्वभावएवेत्यर्थः॥ यथोक्ताधिकारीसन्यासीदुर्लभएवेत्याह॥ श्लोक॥सं
न्यासिनःफलहृतैरताःसदंडाद्यैर्वेनदूषितधियःश्रवणादिदूराः॥ दृश्यंतएव
बहवःपरमार्थनिष्ठाःशांतःसमोयतिवरःक्वचिदेवधन्यात्॥३॥श्रवणंअतिदुरंयेषां
तेतथामननंनिदिध्यासनेततोपिदूरेसाक्षात्कारोपिदूरतरइतिकिमुतवक्तव्य
मित्यभिप्रायः॥४॥स्वस्यगुरुत्वप्रसादोत्थापरोक्षप्राप्त्यानंनमस्कारोति॥श्लोक॥
यस्यामतंतस्यमतंविशुद्धंमानेनवाक्येनगुरोःपरंयत्॥मौनेनबोधःपरमःरु ११७
तोयमस्मीतितस्मैगुरुवेनमोस्तु॥५॥गुरोर्वाक्येनमानेनयत्परंब्रह्मय

स्याधिकारिणःअमतंज्ञानकर्मत्वेनामतंतस्यमतंज्ञानंविशुद्धंनेतरस्येतिसं
बंधः॥तथाचश्रुतिः॥यस्यामतंतस्यमतंमतंयस्यनवेदसः॥यस्यब्रह्मामतंअविषय
इतिनिश्चयस्तस्यतन्मतंसम्यक्ज्ञानं॥यस्यमतंविषयतयाज्ञातुंशक्यं॥ब्रह्मेति
धीःनासौतद्विरुद्धेर्धीमत्वात्एवमेवेतिनियमार्थमुक्तार्थमनुवदति॥अविज्ञातं
विजानतांविज्ञातमविजानतामि॥एतादृशोबोधोयेनगुरुणाअयमहमस्मीति
स्वापरोक्षंयथातथामौनेनावाग्विषयत्वान्ममसंपादितःतस्मैनमस्कारार्थः॥५॥ननु
वागविषयत्वेपिप्रमाणांतरेणबोधःकुतःस्यान्नेत्याह॥श्लोक॥अरूपवदस्पर्शम
रूपमव्ययंतथारसंनित्यमगंधवच्चयत्॥अनाद्यनंतंमहतःपरंध्रुवं

स्वानुभवैकगम्यं ॥५॥ स्पष्टार्थः ॥५॥ नाप्यनुमानगम्यमित्याह ॥ श्लोक ॥ नन्वस्या
प्यलिंगंकिमप्यस्तितस्मिन्नतोनानुमानेनगम्यंस्वरूपं ॥ सदृस्पंनवस्त्वंतरंतेनकिंचिद्
तोनोपमानेनगम्यंस्वरूपं ॥६॥ स्पष्टार्थः ॥ श्लोक ॥ प्रमाणजन्यातिशयोनशुद्धप्रमा
णतोस्यत्रनतेनगम्यं ॥ नतद्विनात्रानुपपन्नमस्तिनातःप्रकल्प्यंपरमार्थसिद्धं ॥७॥
स्पष्टार्थः ॥ श्लोक ॥ आभावेनभावस्यसिद्धिर्नहिस्यात्स्वरूपं स्पष्टप्रमाणेनयेन ॥ अ
तःकेवलंस्वानुभूतिप्रमाणंपरंवैष्णवंप्रलगात्मस्वरूपं ॥८॥ येनस्पष्टप्रमाणेनाभाव ११८
स्यसिद्धिस्तेनाभावप्रमाणेननभावसिद्धिरित्यर्थः ॥८॥ गुरुणासहयःशिष्यस्य
संगस्तद्वैचित्र्यमाह ॥ श्लोक ॥ जातप्रबोधेनगुरुर्युवैवशिष्योतिवृद्धोगलितेंद्रिया

दिः ॥ अंतोविचित्रंगुरुशिष्यसंगाज्ज्ञातंनतद्वर्णयितुंसुशक्यं ॥९॥ चित्रंवटतरोर्मूले अतीव
लेवद्धःशिष्योगुरुर्युवेतिवद्ववचनादयमर्थउन्मीलनुभवसिद्धइत्यर्थः ॥९॥ ननुश्रेयः
श्रुतिभक्तिमुदस्यतेविभोःक्लेशंतियेकेवलबोधलब्धये ॥ तेषामसौक्लेशलएव
शिष्यतेनान्यद्यथास्थूलतुषावघातिनामितिभागवतोक्तेः ॥ हरिभक्तिंवि
नाकेवलज्ञानंक्लेशमात्रमेवेत्यत्रनिरूपणंतथेवेत्यतआह ॥ श्लोक ॥ ज्ञानीत्वा
त्मेवेतिकृष्णस्यवाक्यात्तज्ज्ञानीकृष्णतोनेवभिन्नः ॥ कृष्णस्तुतज्ज्ञानितोनेव
भिन्नस्तस्मादेकाज्ञानभक्तिर्विशिष्टा ॥१०॥ चतुर्विधाभजंतेमांजनाःसुकृ
तिनोर्जुन ॥ आर्तोजिज्ञासुरर्थार्थीज्ञानीचभरतर्षभ ॥ तेषांज्ञानीनित्ययुक्तएक

भक्तिर्विशिष्यते॥श्रियोहि ज्ञानिनो ऽर्थमहंसचममप्रियः॥उदाराः सर्वएवैतेज्ञा
॥७ नीत्वात्मैवमेमतमितिचतुर्विधभक्तिनिरूपणेतुरियोभक्तोविशिष्यतइत्युक्तं॥
तत्रहेतुः॥परस्परपरमप्रेमास्पदत्वात्॥ज्ञानित्वात्मैवमेमतमित्युक्तंभगवता
तस्माद्ज्यभजकयोरेकत्वेनाभेदभक्तिर्विशिष्यतेऽतएवज्ञानभक्तिः फल
भूताविशिष्टेत्यर्थः॥अतः फलभक्तिनिरूपणान्नक्लेशमात्रमेतदितिभावः॥
१०॥किंचश्लोका॥विज्ञानभक्तिः परमापवित्रंज्ञानयत्रभेदावसरः कथंचित्॥न ॥७
तोन्यथाभक्तिनिरूपणंयत्साकर्मभक्तिःखलुभेदभानात्॥१२॥स्पष्टार्थः॥श्लो
क॥श्रेयान्द्रव्यात्यज्ञतोज्ञानयज्ञोयेवंकृष्णःप्राहगीतासुदेवः॥तस्मादेषा



ज्ञानभक्तिर्विशिष्टामुख्यापुंभिःपुंपुंजेनलभ्या॥१२॥स्पष्टार्थः॥१२॥किमेतावताऽऽ
तआह॥श्लोक॥निर्मथ्यवेदांतसमुद्रमेतत्स्वयोधरत्नंस्फुटभंमनोज्ञं॥प्रकाशितं
माधवभिक्षुणेतन्मुमुक्षुभिर्धार्यमतिप्रयत्नात्॥१३॥स्पष्टार्थः॥इदानींग्रंथक
र्तृलादिमानपरिहारपूर्वकंसंप्रदायकर्त्राचार्यनमस्काररूपंमंगलमाचरति॥
श्लोक॥१पूर्वाचार्योच्छिष्टलेशोयमुक्तोबुद्धिस्थोमेस्वस्यनप्रौढिवारः॥विद्वांसोये
नुग्रहार्थंसमर्थास्तेभ्योभक्त्यामेप्रणामोयमस्तु॥२७॥स्पष्टार्थः॥यस्यश्रीपरमे
ष्ठिसंज्ञगुरुरित्यासीत्सरामाश्रमः किंचासीत्सरमोगुरुःस्मरतरुर्नारायणेत्याश्रमः

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

स्वानु

॥साक्षान्माधवआश्रमोगुरुतरः पूर्णपरब्रह्मयोववर्तिप्रथितोयतेनलिखितो
ग्रंथोतिविग्रंथिकृत्॥१॥॥श्रीमन्नारायणाश्रमशिष्यमाधवाश्रमविरचितं
॥२॥स्वानुभावार्शीरव्यंप्रकरणसमाप्तं॥ ॥श्रीसच्चिदानंदसद्गुरूचरणार्पणम
स्तु॥इदंपुस्तकंराजारामशास्त्रिभिः कन्नडग्रामस्थसांवशास्त्रि
णेतैःकृपयादत्तं श्रीरामप्रसन्न॥शुभंभूयात्॥शके१७७८नल
नामसंवत्सरे आश्विनमासे